THE
VENÎSAṂHÂRA
BY
BHATTA NÂRÂYAṆA
With the Commentary of Jagaddhara
AND
VARIOUS READINGS.

EDITED
BY
KÂS'INÂTH PÂNDURANG PARAB.
REVISED BY
WÂSUDEV LAXMAN SHÂSTRÎ PANSÎKAR.

Fourth Edition

PUBLISHED BY
TUKARÂM JÂVAJÎ,
PROPRIETOR OF THE "NIRNAYA SÂGAR" PRESS,
BOMBAY

1915.

Price 12 Annas.

[All rights reserved by the publisher]

Published by Tukaram Javaji and Printed by Ramchandra Yesu Shedge,
at the Nirnaya sagar Press, 23, Kolbhat Lane,
BOMBAY

॥ श्रीः ॥

भट्टनारायणप्रणीतं

वेणीसंहारम् ।

जगद्धरकृतया टिप्पण्या समेतम् ।

परबोपाह्वेन पाण्डुरङ्गात्मजेन काशीनाथेन संस्कृतं

तस्येदं चतुर्थं सस्करणम् ।

पणशीकरोपाह्वलक्ष्मणशर्मात्मजवांसुदेवेन
पाठान्तरैः सहितं संशोधितम् ।

तच्च

शाके १८३७ सवत्सरे

मुम्बापुर्यां

तुकाराम जावजी,

इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये
रामचद्र येसू शेडगेद्वारा मुद्रयित्वा
प्रकाशितम् ।

मूल्यं १२ आणका० ।

॥ श्रीः ॥

वेणीसंहारम् ।

जगद्धरकृतया टिप्पण्या समेतम् ।

प्रथमोऽङ्कः ।

निषिद्धैरप्येभिर्ललितमकरन्दो मधुकरै
करैरिन्दोरन्तश्छुरित इव सम्भिन्नमुकुलः ।
विधत्तां सिद्धिं नो नयनसुभगामस्य सदस
प्रकीर्णः पुष्पाणां हरिचरणयोरञ्जलिरयम् ॥ १ ॥

कण्ठस्थाहिमणीविभूषिततनूः राजज्जटापल्लवो
हृष्यन्मौलिसुधाकरैककुसुमस्तत्पञ्चशाखाश्रयः ।
स्थाणुर्मे फलदोऽस्तु नित्यमधिक गौरीमुखेन्दुद्रव-
त्पीयूषद्रवपानदोहदवशात्कल्पद्रुमत्वं वहन् ॥
गुरूपदेशमासाद्य विभाव्य निपुणं हृदा ।
श्रीजगद्धरधीरेण टिप्पणी क्रियते शुभा ॥

इह तावन्निर्विघ्नं प्रारिप्सितसिद्धिमनुरुध्य कविः खेष्टदेवताकीर्तनरूपं मङ्गलं नान्दीमुखेनाह—**निषिद्धैरिति** । अयं पुष्पाणामञ्जलिर्नोऽस्माकं सिद्धिं विधत्तां करोतु । कीदृशीम् । अस्य सदसः सभायाः नयनसुभगां नेत्रप्रीतिजननीम् । तथा च सदस्यानामपि नेत्रानुरागं विदधातीति भावः । कीदृशोऽञ्जलिः । हरिचरणयोः कृष्णपदद्वये प्रकीर्णो विस्तीर्णः । इष्टदेवतापूजोपकरणीभूत इति भावः । अतएव तद्द्वारा देवता प्रीता स्यात्तथा च निर्विघ्नेष्टलाभ इति मङ्गलाचरणफलम् । अत्राञ्जलिपदेन लक्षणयाञ्जलिस्थपुष्पाणि लक्ष्यन्ते । पुनः कीदृशः । एभिर्मधुकरैर्ललितमकरन्दपुरोवर्तिभ्रमरैः पीतरसः । कीदृशैः । निषिद्धैरपि निवारितैरपि । करादिचालनेन निवारिता अपि प्रसभरसलोभात्पतन्तस्तैरिति भावः । यद्वा । निषिद्धैर्धर्मशास्त्रनिषिद्धैः । 'छिद्राणि कीटजुष्टानि कुसुमानि विवर्जयेत्' इति मनुवचनात् । पुनः कीदृशः । सम्भिन्नमुकुलः प्रफुल्लकलिकः । अत्रोत्प्रेक्षितं कारणमाह—अभ्यन्तरः इन्दोः करैश्चन्द्रकिरणैश्छुरित इव व्याप्त इव । तथा च सुधा-

अपि च ।

कालिन्द्या पुलिनेषु केलिकुपितामुत्सृज्य रासे रस
गच्छन्तीमनुगच्छतोऽश्रुकलुषा कंसद्विषो राधिकाम् ।
तत्पादप्रतिमानिवेशितपदस्योद्भूतरोमोद्गते-
रक्षुण्णोऽनुनय प्रसन्नदयिताद्दृष्टस्य पुष्णातु वः ॥ २ ॥

करकरसपर्कादिव प्रफुल्लतेति भाव । 'मकरन्द पुष्परस' इत्यमर । अत्र हिमकरकरसदृशान्मुकुलसमेदेन निशाकरप्रकाश्यानि कुसुमानि योग्यतया विवक्षितानीति केचित् । सामान्यत पुष्पाणीह विवक्षितानि । प्रफुल्लताहेतुश्चोत्प्रेक्षितोऽन्यत्रस्थ इव । अन्यथा चोत्प्रेक्षाया अप्रसङ्ग । उत्प्रेक्षा च—'अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा । अन्यथोत्प्रेक्ष्यते या तु तामुत्प्रेक्षा विदुर्बुधा ॥' इति लक्षिता । इवशब्दश्चोत्प्रेक्षाभिव्यञ्जक । तथा च दण्डी—'मन्ये-शङ्के-ध्रुव प्रायो नूनमित्येवमादिभि । उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृश ॥' इत्यपरे । 'मधुव्रतो मधुकरो मधुलिट्' इत्यमर । 'भानु करो मरीचि' इति च । 'भिन्नौ दारितसगतौ' इति च । 'सद समिति सयति' इति शाश्वत । 'तौ युतावञ्जलि पुमान्' इत्यमर । इह नान्दी त्रिभि श्लोकैर्द्वादशपदा । तदुक्त सगीतसर्वस्वे—'प्रशस्तपदविन्यासा चन्द्रसकीर्तनान्विता । आशीर्वादपरा नान्दी योज्येय मङ्गलान्विता ॥ कांचिद्वादशपदा नान्दी कांचिदष्टपदा तथा । सूत्रधार पठेदेना मध्यम स्वरमाश्रित ॥ चन्द्रसकीर्तन यत्र तदधीनो रसो मत । प्रीते चन्द्रमसि स्फीता रसश्रीरिति भाल्लकि ॥' इति । तत्रापि पद केचन विभक्त्यन्तमूचिरे । केचित्तु पद पद्यस्य चतुर्थभागमाहु । तदिह द्वितीयपक्षाश्रयणेन त्रिभि श्लोकैर्द्वादशपदा नान्दी । इह निषिद्धपदेन मित्रादिना निषिद्धा अपि सुयोधनादयो निजदर्पादगणिततन्निषेधा युद्धायैव लग्ना इति ध्वनितम् । सभिन्नमुकुलपदेन च युधिष्ठिरादीना वनवासादिदु खानन्तर सुखप्रकाशो दर्शित इति केचित् । नान्द्या वस्तुनिर्देशस्यानङ्गतया तत्सूचनमत्राकिंचित्करम् । सूचन तु 'सत्पक्षा—'(१।६)इत्यादिनाग्रे कर्तव्यमेव । तत्प्रतीकस्य तदर्थत्वादित्यन्ये ॥ १ ॥ बहुविघ्नशङ्कया तन्नाशार्थं पुनर्मङ्गलमाचरन्नान्दीनिर्वाहार्थमाह—**कालिन्द्या इति** । कंसद्विष कृष्णस्यानुनयो वो युष्मान्पुष्णातु पुष्टान्करोतु । कीदृश । अक्षुण्णोऽखण्डित । अत्र हेतुमाह—प्रसन्नदयिताद्दृष्टस्य । सप्रसादराधावलोकितस्येत्यर्थ । कीदृशस्य । केलिकुपिता कौतुक एव क्रोधवतीं राधिका कालिन्द्या यमुनाया पुलिनेषु तोयोत्थितदेशेषूत्सृज्य त्यक्त्वानुगच्छतोऽनुप्रयातस्य । कीदृशीम् । रासे गोपक्रीडाया रसमनुराग गच्छन्ती-

अपि च ।

दृष्ट सप्रेम देव्या किमिदमिति भयात्संभ्रमाच्चासुरीभि
शान्तान्तस्तत्त्वसारै सकरुणमृषिभिर्विष्णुना सस्मितेन ।

मत एवाश्रुकलुषा रुदतीम् । तथा च प्रणयकुपिता रासानुरागिणी रुदती चेति राधाया अवस्थात्रय सूचितम् । इदमालोक्य भगवतापि तदनुनय कृत इत्याशय । अतएव तत्पादप्रतिमासु तच्चरणपद्धतिषु निवेशितपदस्य दत्तपादस्य । तत्र चात्यन्तानुरागवशादुद्भूतरोमोद्भेतेर्जातरोमाञ्चस्य । अतएव प्रसादो राधयापि कृत । मत्पदसबन्धादेवाय भावाविर्भाववान्निति मत्सगमादिति मयि परमयमनुरक्त इति सप्रसाद कुपितयापि कान्तया दृष्ट इति भाव । 'तोयोत्थित तत्पुलिनम्' इत्यमर । 'रासो विदग्धगोष्ठ्या च क्रीडायामपि गोदुहाम्' इति विश्व । अत्र प्रथमार्धेन द्रौपद्या कोपरोदने सूचिते । उत्तरार्धेन च दुर्योधनवधानन्तर भीमकृततदीयानुनयस्याक्षुण्णता तस्याश्च प्रसादवत्त्व सूचितम् ॥ २ ॥

यत्र विवक्षितार्थस्यापर्यवसानादवशिष्टस्य कथन तत्र 'अपिच' इति शब्द प्रयुज्यत इति व्युत्पत्ति । एवमन्यत्रापि । कवेर्हरिहरनिमग्नमानसत्वेन हरौ स्तुतिमुक्त्वा हरे तामाह—**दृष्ट इति** । धूर्जटि शिवो युष्मान्पातु रक्षतु । कीदृश । मयपुरदहने त्रिपुरदाहे सप्रेम प्रीतिसहित यथा स्यादेव देव्या भवान्या दृष्ट । धन्याह यद्बलमेनायमतिबलो महासुरो निधूदित इति प्रीतिमत्या भगवत्या दृष्ट इति भाव । तदैवासुरीभिरसुरवधूभि किमिदमापतितमिति कृत्वा भयात्त्रासात्सभ्रमाद्वेगाच्च दृष्ट । आ कष्ट कथमीदृशस्याप्यसुरराजस्याय दशापरिपाक इत्यस्मत्स्वामिनामप्येव कदाचित्स्यादिति भीतिरुद्वेगश्च तामि कृत इति भाव । ऋषिभिर्वसिष्ठादिभि सकरुण दयान्वित यथा स्यादेव दृष्ट । अहह कथमय वराको जगदीशेन हरेण समूलमुन्मूलित इति तेषा दया । अत्रोपपत्तिमाह—शान्तेति । शान्तमुपशमवद्यदभ्यन्तर तेन तत्त्वमनारोपितरूप सारो बल येषा ते । शान्तमानसे रिपुनाशेऽपि करुणा युज्यत एव । सस्मितेन हास्यवता विष्णुना नारायणेन दृष्ट । यदयमधिकबलोऽसुरराजो हरेण ध्वस्तस्तन्मम दैत्यारेर्भारलाघवमेव जातमित्युत्साह एव हासहेतु । सगर्वैरहकारान्वितैर्दैत्यवीरैर्दृष्ट । गर्वे हेतुमाह—अस्त्रमाकृष्य कोदण्डादिकमुद्यम्योपशमितवधूसभ्रमै शान्तनिजकान्तोद्वेगै । आ क इह मदस्त्रप्रभावाद्विपक्षपक्षप्रसर इति मा भैषीरिति निजवधूमनुद्विग्नमानसा कुर्वाणैरिति भाव । देवतामिरिन्द्रादिभि सानन्द सहर्ष दृष्ट । अत्र प्रबलारातिवध एवानन्दहेतु । सर्वत्र मयपुरदहन इत्यन्वीयते । 'सभ्रमोऽत्र यमिच्छ-

---

१ 'सभ्रमादासुरीभि' इति पाठ २ 'शान्तोऽन्तस्तत्त्वसारै'. ३ 'सस्मित च'

[1]आकृष्यास्त्र सगर्वैरुपशमितवधूसभ्रमैर्दैत्यवीरै
सानन्द देवताभिर्मयपुरदहने धूर्जटि पातु युष्मान् ॥ ३ ॥

([2]नान्द्यन्ते)

सूत्रधारः—[3]अलमतिप्रसङ्गेन ।

न्ति भयमुद्वेगकारणम्' इत्यमर (१) । असुरीत्यत्र 'पुयोगादाख्यायाम्' इति ङीष् । मयो नाम दैत्यशिल्पी । तेन रचित पुर मयपुरम् । 'धूर्जटिर्नीललोहित' इत्यमर । भारतसग्रामोऽपि देव्या द्रौपद्या पूर्ववैरात्सप्रेम दृष्ट । असुरीभिरिवासुरीभिर्दुर्योधनादिवधूभिर्भयोद्वेगाभ्या दृष्ट । कारुणिकैर्नारदादिभि सदय दृष्ट । कृष्णेन हसता दृष्ट । दैत्यवीरैर्घटोत्कचादिभि सगर्व दृष्ट । सानन्दमिन्द्रादिभिश्च दृष्ट इत्यपि कविना कटाक्षितमिति वदन्ति । अतएव पत्रावलीरूपा नान्दीयम् । तदुक्त तत्रैव—'वाच्यार्थबीजरचिता शकरादिपदान्विता । सयुक्ता चन्द्रपद्माभ्या पत्रावल्यभिधीयते ॥' इति ॥ ३ ॥ **नान्द्यन्त इति ।** नन्विदमसगतम् । नहि नान्दीपाठानन्तर सूत्रधारो रङ्गभूमिं प्रविशति । किंतु प्रविश्य पठति । न चान्येनैव नान्दी पठनीया । सूत्रधारपठनीयत्वेन तस्या उक्तत्वात् । 'सूत्रधार पठेदेना मध्यम स्वरमाश्रित' इति वचनात् । उच्यते—नान्दी तावद्रङ्गप्रवेशानन्तर सूत्रधारेणैव पठनीया । नान्द्यन्ते सूत्रधार इति सूत्रधारसाम्यात्स्थापके प्रयोग । तदुक्तं तत्रैव—'नान्दीं प्रयुज्य निष्कामेत्सूत्रधार सहानुग । स्थापक प्रविशेत्पश्चात्सूत्रधारगुणाकृति ॥ पूर्वरङ्ग विधायादौ सूत्रधारे विनिर्गते । प्रविश्य तद्वदपर काव्यमास्थापयेन्नट ॥' इति । अतएव कुत्रचित्पु-

---

१ 'आदायास्त्र', 'आदृष्ट शीघ्रमुच्चै शमितनिजवधूसभ्रमै' इत्यपि क्वचित्पाठ

२ पाठान्तरे नान्दी—

जयति स नाभिर्जगता स्वनाभिरन्ध्रोद्भवज्जगद्बीज ।
दामोदरो निजोदरगह्वरनिक्षिप्तजगदण्ड ॥ १ ॥ (१ 'निविष्ट')
जयति स भगवान्कृष्ण शेते य शेषभोगशय्यायाम् ।
मध्येपथ पयोधेरपर इवाम्भोनिधि कृष्ण ॥ २ ॥

अपि च ।

उत्तिष्ठन्त्या रतान्ते भरसुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकबरीभारमसे वहन्त्या ।
भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा व
शय्यामालिङ्ग्य नीत वपुरलसलसद्बाहु लक्ष्म्या पुनातु ॥ ३ ॥

३ 'अलमतिविस्तरेण'.

श्रवणाञ्जलिपुटपेय विरचितवान्भारताख्यममृत य ।
तमहमरागमकृष्ण[1] कृष्णद्वैपायन वन्दे ॥ ४ ॥
(सेमन्तादवलोक्य ।) तत्रभवत[2] परिषदग्रेसरान्विज्ञाप्य न किंचिदस्ति[3] ।
कुसुमाञ्जलिरपर इव प्रकीर्यते काव्यबन्ध एषोऽत्र ।
मधुलिह इव मधुबिन्दून्विरलानपि भजत गुणलेशान् ॥ ५ ॥

स्तके 'नान्द्यन्ते स्थापक' इत्येव पाठ । केचित्तु—नावश्य नान्दी सूत्रधारेण पठनीया । किंतु मङ्गलार्था येनकेनचित्पठ्यते । सूत्रधारश्च रङ्गपूजार्थं प्रविष्ट इति स एव पठति । तदुक्तम्—'नाट्यस्य यदनुष्ठान तत्सूत्र स्यात्सबीजकम् । रङ्गदैवतपूजाकृत्सूत्रधार उदीरित ॥' इत्याहु । तन्न । 'सूत्रधार पठेदेना मध्यम स्वरमाश्रित' इति भरतविरोधात् । तत्र सूत्रधारस्योपलक्षणत्वे प्रमाणाभावात् । अन्ये तु—नान्द्यवसाने सूत्रधार प्रविशति वदति वा । तदन्ते सूत्रधारस्यैव श्रुतत्वात्सापि तेनैव पठनीया । प्रथम च सूत्रधार इति नोक्तम् । मङ्गलार्थं देवतानमस्कारादेरेव विधानादित्यूचु । ननु प्रस्तावनाया पूर्वं बहूनि नाट्याङ्गानि सन्ति तानि किमिति नोक्तानि । तदुक्त तत्रैव—'रङ्ग प्रसाद्य मधुरै श्लोकै काव्यार्थसूचकै । ऋतु कचिदुपादाय भारती वृत्तिमाश्रयेत् ॥ भेदै प्ररोचनायुक्तैर्वीथी प्रहसनामुखै । सूत्रधारो नटी ब्रूते मार्षं वाथ विदूषकम् ॥ स्वकार्यं प्रस्तुताक्षेपि चित्रोक्त्या यत्तदामुखम् ।' अत आह—**अलमिति** । अयमाशय —पूर्वोक्तान्यङ्गानि न भवन्ति । किंतु परिषदोऽभिमुखीकरणानि । सा चेत्स्वयमेव कृतावधाना नवनाटकदर्शनोत्सुका च तत्रान्यत्प्रयुज्यमान रसभङ्गाय भवेदिति कृत तत्प्रणयनेन । अन्यथा तस्या रसविच्छेद स्यादिति । इदानीं व्यासप्रशसामाह —**श्रवणेति** । त कृष्णद्वैपायन व्यासमह वन्दे नमस्करोमि । यत्तदोर्नित्यमभिसबन्धादाह—यो भारतनामकममृत विरचितवानकरोत् । आप्यायनादिकर्तृत्वेनामृतत्व भारतस्य । कीदृशम् । श्रवण कर्णरूपदेवाञ्जलिपुट तेन पेय श्राव्यमथ च पानीयम् । अन्यदप्यमृतमञ्जलिपुटेन पीयते । त कीदृशम् । अराग रागशून्यम् । विषयासक्तिहीनमित्यर्थ । अत एवाकृष्णं निष्कलुषम् । तदिह प्रतिपाद्यभारतकथाया आदिकर्ता व्यासस्तत्त्वविच्चेति तत्कीर्तन शुभकृदेव भवतीति तदेव कृतमिति भाव ॥ ४ ॥ तत्रभवतो मान्यान् परिषदग्रेसरान्सभापुरोगान् । विज्ञाप्य सबोध्यम् । **कुसुमाञ्जलिरिति** । एष काव्यबन्धोऽपर कुसुमाञ्जलिरिव प्रकीर्यते विस्तार्यते ।

१ 'अतृष्णम्' २ 'समन्तादवलोक्य' इति क्वचिन्नास्ति ३ 'तत्रवन्तः परिषदग्रेसरा. विज्ञाप्य न. किंचिदस्ति' 'भवन्त परिषदग्रेसरा विज्ञाप्य न. किंचिदस्ति', 'तत्रभवन्तः परिषदग्रेसरा विज्ञाप्य न, किंचिदस्ति', 'तत्रभवत परिषदग्रेसरान्सर्वान्विज्ञापयामि' इति नानापुस्तकेषु नानाविध पाठ .

[1]तदिद [2]कवेर्मृगराजलक्ष्मणो भट्टनारायणस्य [3]कृति वेणीसहारं नाम नाटक प्रयोक्तुमुद्यता वयम् । [4]तदत्र [5]कविपरिश्रमानुरोधाद्वा उदात्तकथावस्तुगौरवाद्वा [6]नवनाटकदर्शनकुतूहलाद्वा भवद्भिरवधान दीयमानमभ्यर्थये ।

अत्र काव्यबन्धे विरलानपि स्वल्पानपि गुणकणान्भजत गृह्णीत । हे सभ्या इति शेष । यथा मधुकरा कुसुमाञ्जलौ मधुबिन्दून्विरलानपि गृह्णन्ति तथेत्यर्थ । अनेन मदीयनाटके स्वल्पा अपि गुणा गुणिभिर्ग्राह्या इत्यौद्धत्यपरिहारोऽपि कृत इति ध्वनितम् ॥५॥ मृगराजलक्ष्मण सिंहचिह्नस्य नारायणभट्टस्य । कृतिनाटकशब्दयोरजहल्लिङ्गतया सामानाधिकरण्यम् । वेणीसहारमिति । वेण्या द्रौपदीकेशरचनाविशेषेण हेतुना सहारो विनाशो दु शासनादीना यत्र तत्तथा । यद्वा । वेण्या सहारो मोक्षण यत्र तत्तथा । भारतानन्तरमिह वेणीमोक्षणकथनात् । नाटकमिति । तदुक्त तत्रैव—'प्रकृतिलादथान्येषा भूयो रसपरिग्रहात् । सपूर्णलक्षणत्वाच्च पूर्व नाटकमुच्यते ॥ नाटके सूच्यमर्थ तु पञ्चमि प्रतिपादयेत् । विष्कम्भचूलिकाङ्कास्याङ्कावतारप्रवेशकै ॥ वृत्तवर्तिष्यमाणाना कथाशाना निदर्शक । सक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजित ॥ तद्वदेवानुदात्तोक्त्या नीचपात्रप्रयोजित । प्रवेशोऽङ्कद्वयस्यान्त शेषार्थस्योपसूचक ॥' अङ्कद्वयस्यान्तरिति प्रथमेऽङ्के न कर्तव्य इत्यर्थ । 'अन्तर्जवनिकासस्थैश्चूलिकार्थस्य सूचना । अङ्कान्तपात्रैरङ्कस्य छिन्नाङ्कार्थस्य सूचना ॥ अङ्कावतारस्त्वङ्कान्ते पातोऽङ्कस्याविभागत । एभि ससूचयेत्सूच्य दृश्यमङ्कै प्रदर्शयेत् ॥ दूराध्वान वध युद्ध राज्यदेशादिविप्लवम् । सरोध भोजन स्नान सुरत चानुलेपनम् ॥ अम्बरग्रहणादीनि प्रत्यक्षाणि न निर्दिशेत् । अङ्केनैव निबद्धीयानैवाङ्केन कदाचन ॥ नाधिकारिवध क्वापि त्याज्यभावश्यक न च । एकाहाचरितैकार्थमित्थमासन्ननायकम् ॥ पात्रैस्त्रिचतुरैरङ्कस्तेषामन्ते च निर्गम । एवमङ्का प्रकर्तव्या प्रवेशादिपुरस्कृता ॥ पञ्चाङ्कमेतदवर दशाङ्क नाटक वरम् ॥' इति नाटकलक्षण भरतोक्तम् । तत्रैव प्रसङ्गान्नायकनायिकयोर्लक्षणम्—'नेता विनीतो मधुरस्त्यागी दक्ष प्रियवद । रक्तलोक शुचिर्वाग्मी रूढवश स्थिरो युवा ॥ धृत्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः । शूरो दृश्यश्च तेजस्वी शास्त्रचक्षुश्च धार्मिक ॥ विनेय शीलसपत्तिर्मधुर प्रियदर्शन । त्याग सर्वस्वदान स्याद्दक्ष क्षिप्रकरो मत' ॥ प्रियवदोऽनुत्कटवाक्सस्नेहो लोकरञ्जन । मितप्रशस्तवाग्वाग्मी नित्यकर्मरत शुचि ॥ ख्यातवशो रूढवश षोडशाद्यैश्चतुर्भिरशको यु-

---

१ 'यदिदम्' २ 'रसकवे' ३ 'कृति', 'अभिनवकृतिम्' ४ 'तत्र च' ५. 'कविपरिश्रमानुरोधादुदात्तकथावस्तुगौरवान्नवनाटकदर्शनकुतूहलाच्च' इति पाठान्तरम् ६ 'नवनाटककुतूहलात्'.

(नेपथ्ये ।)

भाव, त्वर्यता त्वर्यताम् । एते खल्वार्यविदुराज्ञया पुरुषा सकल-

---

वा । वाङ्मन कर्मभिर्यश्च न चल स स्थिरो मत ॥ धृति सर्वेषु या प्रीतिरुत्साहोऽग्लानिरेव च । स्मृति कालान्तरे ज्ञान प्रज्ञा तीक्ष्णमतिर्मता ॥ कलाश्चात्र चतुषष्टिर्मानश्चित्तसमुन्नति । शूर सङ्ग्रामनिपुणो रूपवान्दृश्य उच्यते ॥ अतिप्रतापस्तेजस्वी शास्त्रचक्षुस्त्रयीपर । आत्मवत्परभूतानि य पश्यति स धार्मिक ॥ प्रख्यातवशो राजर्षिर्दिव्यो वा यत्र नायक । तत्प्रख्यात विधातव्य वृत्तमत्राधिकारिकम् ॥' अयमर्थ —नाटके भारतादिप्रसिद्धो राजर्षिर्दिव्यो वा नायक कर्तव्यो न तु कविना स्वयमुत्पाद्य कथा कल्पितो नायक कर्तव्य इति । 'स्वान्या साधारणस्त्रीति तद्गुणा नायिका त्रिधा । स्वकीया तत्र वक्तव्या मुग्धा मध्या प्रगल्भिता ॥ शीलार्जवादिसयुक्ताकुटिला च पतिव्रता । लज्जावती चापरुषा निपुणा च प्रियवदा ॥ साधारणस्त्री गणिका कलाप्रागल्भ्यधौर्त्ययुक् । रूपकेषु च रक्तैव कर्तव्या प्रहस विना ॥ अन्यस्त्री द्विविधा प्रोक्ता कन्यकोढा तथापरा । रसे प्रधाने कर्तव्या नान्योढा नाट्यवेदिभि ॥ कन्यानुरागमिच्छात कुयादङ्गादिसश्रयम् ॥' इति । 'नाटके वृत्तय प्रोक्ताश्चतस्रो नाट्यवेदिभि । भारती कैशिकी चैव सात्वत्यारभटी तथा ॥' तत्र शृङ्गारी कामकलावच्छिन्नो व्यापार कैशिकी । 'विशोका सात्वती सत्वशौर्यत्यागार्जवै पुन । मायेन्द्रजालसङ्ग्रामक्रोधोद्भ्रान्तादिचेष्टितै । भवेदारभटी नाम नाट्ये तिस्रस्तु वृत्तय ॥ भारती शब्दवृत्ति स्याद्रसे रौद्रे च युज्यते । शृङ्गारे कैशिकी वीरे सात्वत्यारभटी पुन ॥ एवमङ्गानि कार्याणि प्रधानस्याविरोधत । आदौ विष्कम्भक कुर्यादङ्क वा कार्ययुक्तित ॥ अपेक्षित परित्यज्य नीरस वस्तुविस्तरम् । यदा सदर्शयेच्छेष कुर्याद्विष्कम्भक तदा ॥ यदा तु सरस वस्तु मूलादेव प्रवर्तते । आदावेव तदाङ्क स्यादामुखाक्षेपसश्रय ॥ प्रत्यक्षनेतृचरितो बिन्दुव्यापिपुर सर । अङ्को नानाप्रकारार्थसविधानरसाश्रय ॥ अनुभावविभावाभ्या स्थायिना व्यभिचारिभि । गृहीतमुक्तै कर्तव्यमङ्गिन परिपोषणम् ॥ न चातिरसतो वस्तु दूर विच्छिन्नता नयेत् । रस वा न तिरोदध्याद्वस्त्वलकारलक्षणै ॥एको रसोऽङ्गीकर्तव्यो वीर शृङ्गार एव वा । अङ्गमन्ये रसा सर्वे कुर्यान्निर्वहणेऽद्भुतम् ॥ शृङ्गारहास्यकरुणरौद्रवीरभयानका । बीभत्सोद्भुत इत्येवमष्टौ नाट्ये रसा स्मृता ॥' यद्यपि 'अविकारस्थिति शान्त शान्तस्तु नवमो रस ' इत्यस्ति, तथापि न स सर्वसमतो न नाट्यविषयश्चेति न पृथगुक्त । स्थायिभावाभावादस्य नाट्यविषयता न सभवतीति । उदात्त हृद्यम् । कथावस्तु कथाप्रधान नायक । तस्य गौरवादाद्यादात् ॥ नेपथ्यं रङ्गभूमि । 'नेपथ्य रङ्गभूमौ स्यान्नेपथ्य तु प्रसाधने' इति विश्व । भावो

---

१ 'सर्वमेव'

मेव शैलूषजन व्याहरन्ति—'प्रवर्त्यन्तामपरिहीयमानमातोद्यविन्यासादिका विधय । प्रवेशकाल. किल तत्रभगवत. पाराशर्यनारदतुम्बरुजामदग्न्यप्रभृतिभिर्मुनिवृन्दारकैरनुगम्यमानस्य भरतकुलहितकाम्यया स्वय प्रतिपन्नदौत्यस्य देवकीसूनोश्चक्रपाणेर्महाराजदुर्योधनशिबिरसनिवेश प्रति प्रस्थातुकामस्य' इति ।

सूत्रधारः—(आकर्ण्य । सानन्दम् ।) अहो नु खलु भो, भगवता सकलजगत्प्रभवस्थितिनिरोधप्रभविष्णुना विष्णुनाद्यानुगृहीतमिद भरतकुल सकल च राजचक्रमनयोः कुरुपाण्डवराजपुत्रयोराहवकल्पान्तानलप्रशमहेतुना स्वय सधिकारिणा कसारिणा दूतेन । तत्किमिति पारिपार्श्विक, नारम्भयसि कुशीलवै सह सगीतकमेलकम् ।

मान्य । 'मान्यो भावेति वक्तव्य' इत्यमर । खलुशब्दो वाक्यभूषायाम् । आर्यश्चासौ विदुरश्चेति विशेषणसमास । विदुरोऽत्र नायक । तस्याज्ञयादेशेन । शैलूषो नट । अपरिहीयमानमपरित्यज्यमान यथा स्यादेवम् । विधय प्रकारा प्रवर्त्यन्ताम् । कीदृशा । आतोद्यविन्यासो वीणादिवादनमादौ येषा ते तथा । 'चतुर्विधमिद वाद्यं वादित्रातोद्यनामकम्' इत्यमर । किल निश्चये । तुम्बरुर्मुनिविशेष । 'वृन्दारकौ रूपिमुख्यौ' इत्यमर । भरतकुल युधिष्ठिरादिवंश । काम्या इच्छा । प्रतिपन्नदौत्यस्याङ्गीकृतदूतकर्मण । सूनो पुत्रस्य । 'सूनु पुत्रकनिष्ठयो' इति विश्व । शिबिरसनिवेश सैन्यविन्यास । त प्रति प्रवेशकालश्चक्रपाणेरित्यन्वय ॥ 'अहो नु खलु भो' इत्यव्ययसमुदायोऽत्याश्चर्यविष्कारे । निरोधो विनाश । प्रभविष्णुना प्रभुणा । राजचक्र क्षत्रियसघ । आहवो युद्धम् । कल्पान्तानल प्रलयाग्नि । स्वय प्रतिपन्नदौत्येनेत्यन्वय ।

---

१ 'अपरिहीयमानम्' इति क्वचिन्नास्ति २. 'तत्रभवत' ३ 'काङ्क्षया' ४ 'स्वयम्' इति क्वचिन्नास्ति. ५ 'प्रतिपन्नदूत्यस्य' ६. 'शिबिरप्रति' ७ 'भो' इति क्वचिन्नास्ति ८. 'जगदुत्पत्तिस्थिति', 'जगत्प्रभवस्थिति' ९ 'राजकम्', 'राजन्यकम्'. १० 'प्रशमनहेतुना अनेन' ११ 'स्वय प्रतिपन्नदौत्येन संधिकारिणा' इत्यपि पाठ. १२. 'तत्किमिति' इत्येतत्पूर्व '(नेपथ्ये ।)' इत्यधिक क्वचित् १३ 'सगीतकम्'

प्रविश्य ।

पारिपार्श्विकः—भवतु । आरम्भयामि । कतम[1] समयमाश्रित्य गीयते[2]ताम् ।

सूत्रधारः—नन्वमुमेव तावच्चन्द्रातपनक्षत्रग्रह[3]कौञ्चहससप्तच्छदकुमुदकोक[4]नदकाशकुसुमपरागधवलितदिङ्मण्डल[5] स्वादुजलजलाशय शरत्समयमाश्रित्य प्रवर्त्यता सगीतकम् । तथा ह्यस्या शरदि,

सत्पक्षा मधुरगिर प्रसाधिताशा मदोद्धतारम्भा ।
निपतन्ति धार्तराष्ट्रा कालवशान्मेदिनीपृष्ठे ॥ ६ ॥

पारिपार्श्विकः—(ससभ्रमम् ।) भाव, शान्त पापम् । प्रतिहतममङ्गलम् ।

कसारि कृष्ण । पारिपार्श्विक इति । 'सूत्रधारस्य पार्श्वे य प्रकरोत्यमुना सह । काव्यार्थसूचनालाप स भवेत्पारिपार्श्विक ॥' इति । भरत कुशीलवो नट । 'भरतास्तु कुशीलवा ' इत्यमर । सगीतकमेलकम् । ऐक्यमिति यावत् ॥ नक्षत्र मश्विन्यादि । ग्रहा सूर्यादय । क्रौञ्च 'हकूह' इति प्रसिद्ध पक्षी । सप्तच्छद 'तिमन' इति प्रसिद्धो वृक्ष । 'रक्तोत्पल कोकनदम्' इत्यमर । 'तथा हि' इत्यय शब्द उक्तविभावनार्थ । 'श्लेषच्छायोपशेषैश्च समुद्दिष्ट विसर्पति । यत्फलोदयपर्यन्त तद्बीजमिति कीर्तितम् ॥' इति भरतात् श्लेषेण बीजमाह—**सत्पक्षा इति** । धार्तराष्ट्रा हसविशेषा । कालवशाच्छरन्माहात्म्यान्मेदिनीपृष्ठे निपतन्ति । मानस सर परिहृत्यायान्तीत्यर्थ । अथ च धार्तराष्ट्रा धृतराष्ट्रपुत्रा दुर्योधनादयो भूमौ पतन्तीत्यर्थ । कीदृशा । सत्पक्षा श्रेष्ठपक्षयुक्ता श्रेष्ठसैन्यवन्तश्च । मधुरगिरो मधुरवाणीका । प्रसाधिता आशा दिशो यैस्ते तथा । पक्षे प्रकर्षेण साधिता आयत्तीकृता आशा दिश प्रत्याशा वा यैस्ते तथा । मदोद्धता आरम्भा येषा ते । मदो हर्षोऽहकारश्च । 'धार्तराष्ट्रा सितेतरै ' इत्यमर ॥ ६ ॥ इह श्लोके प्रवर्तकरूपा प्रस्तावना । यदुक्त तत्रैव—'प्रवृत्तकालमाश्रित्य वर्णना या विधीयते । तदाश्रयस्य पात्रस्य प्रवेशेन प्रवर्तकम् ॥' इति । आर्याच्छन्द । यत्र पटाक्षेपेण पात्रप्रवेशस्तत्र प्रविश्येति प्रयुज्यते ॥ 'शान्त पा-

---

१ 'कम्' २ 'सगीतकमारम्भयामि' इति पाठान्तरम् ३ 'ग्रह' इति क्वचिन्नास्ति ४ 'कोकनद' इत्येतस्य स्थाने 'पुण्डरीक' इति पाठ क्वचिद्दृश्यते ५ 'गगनदिङ्मण्डलम्'

सूत्रधारः—(सवैलक्ष्यस्मितम्।) मारिष, शरत्समयवर्णनाशसया हसा[1] धार्तराष्ट्रा इति व्यपदिश्यन्ते[2]।

पारिपार्श्विकः—नं[3] खलु न जाने। किंत्वमङ्गलाशसयास्य वो वचनस्य यत्सत्य कम्पितमिव मे हृदयम्।

सूत्रधारः—मारिष, ननु सर्वमेवेदानीं प्रतिहतममङ्गल स्वय प्रतिपन्नदौत्येन सधिकारिणा कसारिणा। तथा हि।

निर्वाणवैरदहना प्रशमादरीणा
　　नन्दन्तु पाण्डुतनया सह माधवेन।
रक्तप्रसाधितभुव क्षतविग्रहाश्च
　　स्वस्था भवन्तु कुरुराजसुता सभृत्या ॥ ७ ॥

पमनाकाङ्क्षे' इति भरत। तथा च न वक्तव्यमित्यर्थ ॥ सवैलक्ष्य सलज्जम्। 'किंचिन्न्यूनस्तु मारिष' इत्यमर। मारिष एव मर्षणान्मार्ष इति। 'मार्षो मारिष इत्यपि' इति शब्दभेद ॥ न खलु न जाने किंतु जानाम्येव। खलुशब्दो निषेधे। 'अलखल्वो प्रतिषेध—' इति सूत्रम्। वो युष्माकम्। 'यत्सत्यमसभाव्येऽर्थे' इति भरत। तथा च यत्सत्यम्। असभावनीयमिदमित्यर्थ ॥ **निर्वाणेति।** निर्वाणो निस्तेजीकृतो वैरमेव दहनो यैस्ते तथा। प्रशमादुपशमात्। विनाशादिति यावत्। रक्तेभ्य सानुरागेभ्य प्रसाधिता दत्ता भूर्यैस्ते तथा। अथ च रक्तेन रुधिरेण प्रसाधितालकृता भूर्यैस्ते तथा। विग्रहो युद्ध शरीर वा। स्वस्था सुस्थिता मृताश्च। 'विग्रह समराङ्गयो' इति धरणि। 'सुस्थिते च मृते स्वस्थ'

---

१ 'हसान्धार्तराष्ट्रानिति व्यपदिशामि न धृतराष्ट्रसुतान्' इति भिन्न पाठ २ एतदनन्तरम् 'तत्किं शान्त पाप प्रतिहतममङ्गलम्', अथवा, 'न तु राजपुत्रास्तत्किं प्रलपसि शान्त पाप प्रतिहतममङ्गलमिति' इत्यधिक कचित् ३ 'भाव, न खलु न जाने। किंत्वमङ्गलत्वादस्य वचसो यत्सत्य प्रकम्पितमिव मे हृदयम्', अथवा, 'न खलु जाने। अमङ्गलाशसयास्य वो वचनस्य यत्सत्य कम्पितमिव मे हृदयम्', अथवा, 'भवतु न जाने। अमङ्गलाशसयास्य वो वचनस्य कम्पितमिव मे हृदयम्', अथवा, 'भवतु न जाने। किंत्वमङ्गलाशसयास्य वचनस्य कम्पितमिव मे हृदयम्', अथवा, 'न जाने। अमङ्गलाशसयास्य वो वचनस्य कम्पितमिव मे हृदयम्' इति नानापुस्तकेषु नानाविध पाठ ४. 'प्रतिपन्नदौत्येन' इति कचिन्नास्ति

(नेपथ्ये । साधिक्षेपम् ।)

[1]आ दुरात्मन्वृथामङ्गलपाठक शैलूषापसद,
लाक्षागृहानलविषान्नसभाप्रवेशै
प्राणेषु वित्तनिचयेषु च न प्रहृत्य ।
[3]आकृष्य पाण्डववधूपरिधानकेशा-
न्स्वस्था [4]भवन्ति मयि जीवति धार्तराष्ट्रा ॥ ८ ॥

([5]सूत्रधारपारिपार्श्विकावाकर्णयत ।)

पारिपार्श्विकः—[6]भाव, कुत एतत् ।

सूत्रधारः—([7]पृष्ठतो विलोक्य ।) अये, [8]कथमय वासुदेवगमना-
त्कुरुसधानममृष्यमाण पृथुललाटतटघटितविकट[9]भ्रुकुटिना दृष्टिपाते-
नापिबन्निव न सर्वान्सहदेवेनानुगम्यमान क्रुद्धो भीमसेन इत एवाभिव-

---

इति विश्व ॥ ७ ॥ लेशगण्डोऽयम् । यदुक्त तत्रैव—'व्यर्थता यत्र वाक्याना लेशेनापि प्रतीयते । शब्दभङ्गीगतो योंशो लेशगण्ड स उच्यते॥' आ शब्द आक्षेपे । शैलूषो नट । अपसदोऽधम । **लाक्षेति** । जतुगृहाग्निविषलड्डुककपटद्यूतादि भिरस्मान्वित्तादिषु प्रहृत्येत्यन्वय । पाण्डववधूर्द्रौपदी । परिधान परिधानीयव-स्त्रम् ॥ ८ ॥ इहावसाने विद्धकम् । यदुक्त तत्रैव—'नाटकीयफले हेतुभूतस्याभ्य-क्षकीर्तनम् । आफलोदयमुत्साहावसानाभ्या हि विद्धकम् ॥' अये इति निपातो-ऽव्यासङ्गादिनानाकलितस्याकलने सभ्रमामिधायी । 'अये चित्रेऽवधारणे' इति भरत । कुटिलभ्रूभागो भ्रुकुटि । नोऽस्मान् । दृष्टिपातेनालोकितेन । पृथुल-लाटेत्याद्यस्यैव विशेषणम् । इत एवाभिवर्तत इहैव तिष्ठति ॥ निष्क्रान्तौ सूत्र-धारपारिपार्श्विकौ ॥ **प्रस्तावनेति** । प्रस्तावनामुखसधिपर्याय । यदुक्तं तत्रैव—'सूत्रधारेण सहिता सलाप यत्र कुर्वते । नटी विदूषकौ वापि पारिपार्श्विक एव वा ॥ आमुख नाम तस्यैव सैव प्रस्तावना मता ॥' इति । इय प्रस्तावना वा-

---

१ 'आ पाप दुरात्मन्' इति केचित् २ 'वित्तनिवहेषु' ३ 'आकृष्ट-पाण्डववधूपरिधानकेशा' इत्यपि पाठ ४ 'भवन्तु' ५ 'सूत्रधारपारिपार्श्विकौ—आकण्य ।', अथवा, 'सूत्रधार —(आकण्य समय नेपथ्याभिमुखमवलोक्य ।)' इति पाठान्तरे ६ 'आ कुत एतत्' इत्यपि पाठ ७ 'पृष्ठतोऽवलोक्य, सभयम्' इत्यपि पाठ ८ 'एष खलु' इति पाठान्तरम् ९. 'विकटकीलाशतोरणत्रिशूलायमान-भीषणभ्रुकुटिरापिबन्निव न सर्वान्दृष्टिपातेन' इति क्वचिदधिक पाठ

र्तते । तन्न युक्तमस्य पुरत स्थातुम् । [१]तदित आवामन्यत्र गच्छाव ।

(इति निष्क्रान्तौ ।)

प्रस्तावना ।

(तत प्रविशति सहदेवेनानुगम्यमान क्रुद्धो भीमसेन ।)

भीमसेनः—[२]आ दुरात्मन्वृथामङ्गलपाठक शैलूषापसद । ([३]'लाक्षागृहानल-'(१।८) इत्यादि पुन पठति ।)

सहदेवः—(सानुनयम् ।) आर्य, मर्षय मर्षय । अनुमतमेव नो भरतपुत्रस्यास्य वचनम् । पश्य । ([४]'निर्वाणवैरदहना '(१।७) इति पठित्वान्यथाभिनयति ।)

भीमसेनः—(सोपालम्भम् ।) न खलु न खल्वमङ्गलानि चिन्तयितुमर्हन्ति भवन्त कौरवाणाम् । [६]सधेयास्ते भ्रातरो युष्माकम् ।

सहदेवः—(सरोषम् ।) आर्य,

धृतराष्ट्रस्य तनयान्कृतवैरान्पदे पदे ।
राजा न चेन्निषेद्धा स्यात्क क्षमेत तवानुज ॥ ९ ॥

भीमसेनः—[७]एवमिदम् । अत एवाहमद्यप्रभृति भिन्नो भवन्द्य. । पश्य ।

क्यार्थकथोद्धातरूपा । 'सूत्रधारस्य वाक्य वा यत्र वाक्यार्थमेव वा । गृहीत्वा प्रविशेत्पात्र कथोद्धात स उच्यते ॥' इति भरत ॥ प्रविशतीति । सर्वत्र प्रवेशे पूर्वसूचितस्यान्वय । 'नासूचितस्य पात्रस्य प्रवेश' इति भरतवचनात् ॥ मषय क्षमस्व । भरतपुत्रस्य नटस्य । अन्यथा मरणार्थतया ॥ सोपालम्भ विसवादसहितम् । वीप्सितो नखलुशब्दोऽत्यन्तनिषेधवचन ॥ **धृतराष्ट्रस्येति** । पदे पदे । प्रतिस्थानमित्यर्थ । चेच्छब्दो यद्यर्थे । निषेद्धा नि-

---

१ 'तदित आवाम्' इत्यादि क्वचिन्न वर्तते २ 'आ पाप दुरात्मन्' इति क्वचित्पाठ ३ 'लाक्षागृहानल' इति पूर्वोक्त पठति' इति पाठान्तरम् ४ 'निवाणवैरदहना ' इति पठित्वा अन्यथाभिनयति इत्येतस्य स्थाने 'निर्वाणवैरदहना इति यथाथमेव । सभृत्या कुरव क्षतजालकृतवसुधरा क्षतशरीराश्च स्वर्गस्था भवन्विति ब्रवीति' इति पाठान्तर बहुषु पुस्तकेषु दृश्यते ५ 'सावेगम्' इति क्वचित्पाठ ६. 'यत. सधेयास्ते भ्रातरो युष्माकम्', 'सधेयाश्च ते भ्रातरो युष्माकम्' इति पाठान्तरे ७ 'भीमसेन —(सरोषम् ।) एवमिदम्' इति क्वचित्पाठ

प्रवृद्ध यद्वैर मम खलु शिशोरेव कुरुभि-
र्न तत्रार्यो हेतुर्न भवति किरीटी न च युवाम् ।
जरासधस्योर स्थलमिव विरूढ पुनरपि
क्रुधा सधिं भीमो विघटयति यूय घटयत ॥ १० ॥

सहदेवः[2]—(सानुनयम् ।) आर्य, एवमतिसभृतक्रोधेषु युष्मासु कदाचित्खिद्यते गुरु ।

भीमसेनः[3]—कि नाम कदाचित्खिद्यते गुरु । गुरु खेदमपि जानाति । पश्य ।

तथाभूता दृष्ट्वा नृपसदसि पाञ्चालतनया
वने व्याधै सार्धं सुचिरमुषित वल्कलधरै ।
विराटस्यावासे स्थितमनुचितारम्भनिभृत
गुरु खेद खिन्ने मयि भजति नाद्यापि कुरुषु ॥ ११ ॥

षेधक ॥ ९ ॥ इह श्लोके यद्यपि वाक्ये गर्भितनामालकारदोषस्तथापि रसान्तरद्योतनाय तद्वाक्यमिति न दोषकक्षामवगाहत इत्यवधेयम् ॥ इह 'अह भिन्नो भवद्भ्य ' इत्यनेन भेदसधि । यदाह—'भेदस्तु भिन्नता' इति । प्रभृतिशब्द आरम्भपर्याय ॥ **प्रवृद्धमिति** । प्रवृद्धमुपचितम् । खलु निश्चये । कुरुभिरिति सहार्थे तृतीया । आर्यो राजा । किरीटी अर्जुन । युवा नकुलसहदेवौ न हेतू भवत । विरूढ जात स्मृत च । 'सधिर्ना सघटनके सधानेऽपि च कथ्यते' इति विश्व ॥ १० ॥ **तथाभूतामिति** । तथाभूता ऋतुमतीं नग्ना च । पाञ्चालतनया द्रौपदीम् । वन उषितमस्मामिर्वास कृत । तद्दृष्ट्वा । स्थितमवस्थान कृतम् । तद्दृष्ट्वेत्यन्वय । अनुचितारम्भा कन्यालकरणादिकास्तैर्निभृत गुप्त यथा स्यादेव म् । मयि खिन्ने सति गुरुरद्यापि कुरुषु खेद न वहतीत्यन्वय ॥ ११ ॥

---

१ 'च कुरुत' इति पाठान्तरम् २ 'सहदेव —एवमतिसभृतक्रोधेषु युष्मासु कदाचित्खिद्यते गुरु ' एवविध पाठ क्वचित् ३ 'भीमसेन —(सहासम् ।) किं नाम मयि खिद्यते गुरु । (सामर्षम् ।) गुरु खेदमपि जानाति', अथवा 'भीमसेन —किं नाम मयि खिद्यते गुरु । वत्स, गुरु खेदमपि जानाति', अथवा 'भीमसेन —(सबाष्पक्रोधम् ।) किं नाम कदाचित्खिद्यते गुरु । (सामर्षम् ।) वत्स, गुरु खेदमपि जानाति', अथवा 'भीमसेन —(सहासम् ।) किं किम्, गुरु खेदमपि जानाति' इति नानापुस्तकेषु नानाविध पाठ ४ 'वहति'

तत्सहदेव, निवर्तस्व । एव[1]चापि चिरप्रवृद्धामर्षोद्दीपितस्य भीमस्य वचनाद्विज्ञापय राजानम् ।

सहदेवः—[2]आर्य, किमिति ।

भीमसेनः—

युष्मच्छासनलं[3]घ्नाहसि मया मन्येन नाम स्थित
प्राप्ता नाम विगर्हणा स्थितिमता मध्येऽनुजानामपि ।
[4]क्रोधोल्लालितशोणितारुणगदस्योच्छिन्दत कौरवा-
नद्यैक दिवस ममासि न गुरुर्नाह विधेयस्तव ॥ १२ ॥

(इत्युद्यत परिक्रामति ।)

सहदेवः—(तमेवानुगच्छन्नात्मगतम् ।) अये, कथमार्यः पाञ्चाल्याश्चतु शालक [5]प्रति प्रस्थित । भवतु तावदहमत्रैव तिष्ठामि (इति स्थित ।)

भीमसेनः—([6]प्रतिनिवृत्त्यावलोक्य च ।) सहदेव, गच्छ त्व गुरुमनुवर्तस्व । अहमप्यायुधागार प्रविश्यायुधसहायो भवामि ।

[7]सहदेवः—आर्य, नेदमायुधागारम्, पाञ्चाल्याश्चतु शालकमिदम् ।

भीमसेनः—([8]संवितर्कम् ।) कि नाम नेदमायुधागारम्, पाञ्चा-

युष्मदिति । अहसि पापे । नाम प्राकाश्ये । 'नाम प्राकाश्यसभाव्योपगमे कुत्सने तथा' इति विश्व । विगर्हणा निन्दा । स्थितिमता धैर्यवताम् । क्रोधेनोल्लासिता समुत्तोलिता शोणितेनारुणा रक्ता गदा यस्य । उच्छिन्दतो नाशयत । दिवस व्याप्य । 'काला'वनोरत्यन्तसयोगे' इति द्वितीया । अद्येदानीम् । 'इदानीमद्य' इति कलापसूत्रम् । अस्मिन्नहनीत्यर्थेऽनन्वय स्यादित्यवधेयम् ॥ १२ ॥ इह परिकररूप सधि । यदुक्तं तत्रैव—'कार्याकार्यस्य हेतूनामुक्ति परिकरो मत' इति ॥ चतु शालक 'चउसार' इति प्रसिद्धगृहम् ॥ अगारं गृहम् । आयुधसहा-

---

१ 'चातिचिरप्रवृद्धामर्षोद्दीपितस्य' इति पाठान्तरम् २ आर्य, किं विज्ञापयामि' इति पाठान्तरम् ३ 'लङ्घनाम्भसि' ४ 'क्रोधोच्छ्वासित', 'हेलोल्लासित' ५ 'इति साटोप परिक्रामति', 'इत्युक्त्वा परिक्रामति' ६ 'प्रविष्ट' ७ 'परानिवृत्य' ८ 'सहदेव'—आर्य, नेदमायुधागारम् । भीम —किं तर्हि। सहदेव —पाञ्चाल्याश्चतु शालकमिदम्' इत्यपि क्वचित्पाठ ९ 'सवितर्कम्' इति क्वचिन्नास्ति

ल्याश्चतु[1]शालकमिदम् । (विचिन्त्य,सहर्षम् ।) आमन्त्रयितव्यैव[2] मया पाञ्चाली[3] । (सप्रणय सहदेव हस्ते गृहीत्वा ।) वत्स, आगम्यताम् । यदार्य कुरुभि सधानमिच्छन्नस्मान्पीडयति तद्भवानपि पश्यतु ।

(उभौ प्रवेश नाटयत । भीमसेन सक्रोध भूमावुपविशति ।)

सहदेवः—(ससभ्रमम् ।) आर्य, इदमासनमास्तीर्णम् । अत्रोप[4]विश्यार्य पालयतु कृष्णागमनम् ।

भीमसेनः—(उपविश्य स्मृत्वा ।) वत्स, कृष्णागमनमित्यनेनोपो[5]द्घातेन स्मृतम् । अथ भगवान्कृष्ण केन पणेन सधि कर्तु सुयोधन प्रति प्रहित[6] ।

सहदेवः—आर्य, पञ्चभिर्ग्रामै[7] ।

भीमसेनः—(कर्णौ पिधाय ।) अहह[8], देवस्याजातशत्रोरप्ययमी-

योऽस्त्रद्वितीय ॥ आ स्वीकारे । आमन्त्रयितव्या सवेदनीया ॥ कृष्णागमन द्रौपद्यागमनमथ च हरेरागमनम् ॥ उपोद्घात उक्ति । तदुक्तममरे—'उपोद्घात उदाहार' इति । यद्वा प्रकृतानुकूलिनी चिन्ता उपोद्घात । भगवानैश्वर्यादिमान् । इह श्रीकृष्णो निगूढार्थो दूत । यदुक्त तत्रैव—'उद्देश्यकार्याबाधेन विपक्षे नायके स्वयम् । वाग्युद्धनिरतो यस्तु स निगूढार्थ उच्यते ॥' इति । पञ्चग्रामदानादानेन तयोस्तेन वैरप्रकाशनात् । 'अहहेत्यद्भुते खेदे'

---

१ '(किंचिद्विहस्य ।)' इति पाठान्तरम् २ 'एव' इति क्वचिन्नास्ति ३ एतदनन्तर केचित् '(सहदेव हस्ते गृहीत्वा ।)' वत्स, यदार्य कुरुभि संधानमिच्छन्नस्मान्पीडयति । पश्यतु । उभौ—(प्रवेश नाटयत ।) सहदेव —आर्य, इदमासनमास्तीर्णम् । अत्रोपविशत्वाय । पालयतु कृष्णागमनम्' इति पठन्ति, अन्ये च '(सप्रणय सहदेव हस्ते गृहीत्वा ।) वत्स, आगम्यताम् । सहदेव —यदादिशत्यार्य । भीमसेन —वत्स, यदार्य कुरुभि संधानमिच्छन्नस्मान्पीडयति तद्भवानपि पश्यतु । (परिक्रम्य उभौ गृहप्रवेश नाटयत । भीम सक्रोध भूमावुपविशति ।) सहदेव —(ससभ्रमम् ।) आय, इदमासनमास्तीर्णम् । अत्रोपविश्यार्य पालयतु कृष्णागमनम् ।' इति ४ 'अत्रोपविश्य मुहूतमाय' इति पाठ ५ (उपविश्य स्मृत्वा ।) इति क्वचिन्नास्ति ६ 'कथोद्घातेन' ७ 'तत्स्मृतम्' ८ 'प्रकारेण'. ९ 'प्रेषित'. १० 'अहह, हन्त, देवस्य', 'अहह, कथ तस्य देवस्य'.

दृशस्तेजोपकर्ष इति यत्सत्य कम्पितमिव मे हृदयम्। (परिदृत्य स्थित्वा।) तद्वत्स, न[1] त्वया कथित न च मया भीमेन श्रुतम्।

यत्तदूर्जितमत्युग्र क्षात्र तेजोऽस्य भूपते ।
दीव्यताक्षैस्तदानेन नून तदपि हारितम् ॥ १३ ॥

(नेपथ्ये।) Indeed dab

समस्ससदु[2] समस्ससदु भट्टिणी। (क)

सहदेवः—(नेपथ्याभिमुखमवलोक्यात्मगतम्।[3]) अये कथ याज्ञसेनी मुहुरुपचीयमानबाष्पपटलस्थगितनयना[4] आर्यसमीपमुपसर्पति। तत्कष्टतरमापतितम्।

यद्वैद्युतमिव ज्योतिरार्ये क्रुद्धेऽद्य सभृतम्[5]।
तत्प्रावृडिव कृष्णेय नून सवर्धयिष्यति ॥ १४ ॥

(क) समाश्वसितु समाश्वसितु भट्टिनी।

इत्यमर। यत्सत्य निश्चये। तदुक्त तत्रैव—'यत्सत्यमिति भावार्थम्' ॥ **यत्तदूर्जितमिति।** ऊर्जित बलवत्। क्षात्र क्षत्रियसबन्धि। दीव्यताक्षैर्द्यूतेन क्रीडमानेन। 'दिव कर्म च' इति चकारात्तृतीया। नून निश्चये। तदपि तेज ॥ १३ ॥ नेपथ्ये। भट्टिनि, समाश्वसिहि समाश्वसिहि। अपनेष्यति ते मन्यु नित्यानुवृद्धकुरुवैर कुमारो भीमसेन। अत्र 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमर ॥ आत्मगतम्। 'यत्तु श्राव्य न सर्वस्य स्वगत तदिहोच्यते' इति भरत। याज्ञसेनी द्रौपदी। अश्रुण पूर्वावस्था बाष्प। स्थगित पिहितम् ॥ **यद्वैद्युतमिति।** वैद्युत विद्युत्प्रभवम्। आर्ये भीमे। सभृत जातम्। प्रावृड्वर्षाकाल। नून निश्चये ॥ १४ ॥ द्रौपदी। साम्र सनयनजलम्। हञ्जे बुद्धिमतिके, अस्त्येवैतद्यदि महा

---

१ 'न मया श्रुत न त्वया कथितम्', 'न त्वया कथित न च भीमसेनेन श्रुतम्'। इति पाठान्तरम् २ 'समस्ससदु समस्ससदु भट्टिणी। अवणइस्सदि दे मण्णु निच्चाणुबद्धकुरुवेरो कुमालो भीमसेणो।' इति क्वचित्पाठ ३ 'कर्ण दत्वा, नेपथ्याभिमुखमवलोक्य, आत्मगतम्' इत्यपि पाठ ४ 'मुहुर्मुहुरुपचितबाष्पपटलस्थगितनयना आर्यस्य समीप समुपसर्पति। तत्कष्टात्कष्टतरमापतितम्', अथवा, 'मुहुरुपचीयमानबाष्पपटलनयना आर्यसमीपमुत्सपति। तत्कष्टतरमापतितम्', अथवा, 'मुहुरुपचीयमानबाष्पपटलावृतनयना आर्यसमीपमुपसर्पति। तत्कष्टतरमापतितम्' इति नानापुस्तकेषु नानाविध पाठ ५ 'आर्यक्रोधेन संभृतम्'

(तत प्रविशति यथानिर्दिष्टा द्रौपदी चेटी च ।)

(द्रौपदी [1]सास्र निश्वसिति ।)

चेटी—समस्ससदु समस्ससदु भट्टिणी । अवणइस्सदि दे मण्णु णिच्चाणुबद्धकुरुवेरो कुमालो भीमसेणो[2] । (क)

द्रौपदी—हञ्जे बुद्धिमदिए, होदि एद जइ [3]मेहाराओ पडिऊलो ण भवे । ता णाह पेक्खिदु तुवरदि मे हिअअ । ता अदेसेहि मे णाहस्स वासभवण । (ख)

चेटी—एदु एदु भट्टिणी । (ग)

(इति परिक्रामत ।)

चेटी—एद वासभवण । एत्थ पविसदु भट्टिणी । (घ)

द्रौपदी—हञ्जे, कहेहि णाहस्स मह आगमण । (ङ)

चेटी—ज देवी आणवेदि । (इति परिक्रम्योपसृत्य च ।) जअदु जअदु कुमालो । (च)

(क) समाश्वसितु समाश्वसितु भट्टिनी । अपनेष्यति ते मन्यु नित्यानुबद्ध-कुरुवैर कुमारो भीमसेन ।

(ख) हञ्जे बुद्धिमतिके, भवत्येतद्यदि महाराज प्रतिकूलो न भवेत् । तन्नाथं प्रेक्षितु त्वरते मे हृदयम् । तदादेशय मे नाथस्य वासभवनम् ।

(ग) एत्वेतु भट्टिनी ।

(घ) एतद्वासभवनम् । अत्र प्रविशतु भट्टिनी ।

(ङ) हञ्जे, कथय नाथस्य ममागमनम् ।

(च) यद्देव्याज्ञापयति । जयतु जयतु कुमार ।

राज प्रतिकूलो न भवेत् । तन्नाथ प्रेक्षितु त्वरते मम हृदयम् । तदादेशय मे नाथस्य वासभवनम् । अत्र 'हण्डे हञ्जे हलाह्वाने नीचा चेटी सखीं प्रति' इत्यमर ॥ एतु भर्तृका एतद्वासभवनम् । अत्र प्रविशतु भट्टिनी । अत्र एतु आगच्छतु ॥ हञ्जे कथय नाथस्य ममागमनम् ॥ यद्देव्याज्ञापयति । जयतु जयतु

---

१ 'सवाष्प निश्वसिति' २ एतदनन्तरम्, 'द्रौपदी—हञ्जे, होदि एद जइ महाराओ पडिऊलो ण भवे । चेटी—एसो कुमालो चिट्ठदि । ता ण उवसप्पदु भट्टिणी । द्रौपदी—हञ्जे, एव्व करेह्य । (उभे परिक्रामत ।) चेटी—जअदु जअदु कुमालो । भीम —(अपश्यन्निव 'यत्तद्भूजितम्' इति पुन पठति ।)' इति पाठो बहुपुस्तकेषु दृश्यत ३ 'महाराअस्स पडिऊलो हुविस्सदि' इति पाठान्तरम्

(भीमसेनोऽशृण्वन् 'यत्तद्दूर्जितम्' (१।१३) इति पुन पठति ।)

[1]चेटी—(परिवृत्य) भट्टिणी, पिअ दे णिवेदेमि । परिकुविदो विअ कुमालो लक्खीअदि । (क)

द्रौपदी—हञ्जे, जइ एव्व ता अवहीरणावि एसा म आसासअदि । ता [2]एअन्ते उवविट्ठा भविअ सुणोमि दाव णाहस्स ववसिद । (ख)

([3]उभे तथा कुरुत ।)

भीमसेनः—([4]सहदेवमधिकृत्य ।) कि नाम पञ्चभिर्ग्रामै सधि ।

मशामि कौरवशत समरे न कोपा-
द्दु शासनस्य रुधिर न पिबाम्युरस्त ।
सचूर्णयामि गदया न सुयोधनोरू
सधि करोतु भवता नृपति पणेन ॥ १५ ॥

(क) भट्टिनी, प्रिय ते निवेदयामि । परिकुपित इव कुमारो लक्ष्यते ।

(ख) हञ्जे, यद्येव तदवधीरणाप्येषा मामाश्वासयति । तदेकान्त उपविष्टा भूत्वा शृणोमि तावन्नाथस्य व्यवसितम् ।

कुमार । भट्टिनि, प्रिय ते निवेदयामि । परिकुपित इव कुमारभीमसेनो लक्ष्यते । अत्र जयत्विल्यत्र यद्यपि जयतेरनभिधानादुत्व न भवतीति रूपावतारे दृश्यते तथापि तस्य प्रायिकत्वम् । प्राकृते जयदु जयत्विल्यस्याभिधानात् । प्राकृतस्य च 'तद्भवस्तत्समो देशीत्यनेक प्राकृत क्रम' इति नियमात् । सस्कृत क्रमवत्त्वात् । अन्यथा क्रमहान्यापत्ते । कि च । 'जयतात् भवानीपति' इत्यादिदर्शनाज्जयत्विति साधु । अन्यथा 'तुह्योस्तातङाशिष्यन्यतरस्याम्' इति तातङोऽप्राप्ति । जयतीत्यत्रोकारस्याकरणादित्यवधेयम् ॥ हञ्जे यद्येवं ततोऽवधीरणाप्येव तस्य मा समाश्वासयति । तदेकान्त उपविष्टा भूत्वा शृणुमस्तावन्नाथस्य व्यवसितम् । को-ऽन्यो मम परिभवेण खिद्यते । अत्र व्यवसितमध्यवसाय ॥ **मशामीति ।**

---

१ 'चेटी—देवि, परिकुविदो विअ कुमालो लक्खिअदि' इति पुस्तकान्तरस्थ पाठ
२ 'एअन्ते' इति क्वचिन्नास्ति ३. 'इति तथा कुरुत', 'तथा कुरुत' ४ 'सक्रोधम्। सहदेवमधिकृत्य ।' इति क्वचित्पाठ ।

द्रौपदी—([1]सहर्षम् । जनान्तिकम् ।) [2]णाह, अस्सुदपूव्व क्खु दे एदिस वअण । ता पुणो पुणो दाव भणाहि । (क)

([3]भीमसेनोऽश्रूण्वन्नेव 'मश्नामि कौरवशत–'(१।१५) इति पुन पठति ।)

सहदेवः—आर्य, किं महाराजस्य सदेशोऽ[4]यमार्येणाव्युत्पन्न [5]इव गृहीत ।

भीमसेनः—का पुनर[6]त्र व्युत्पत्ति ।

सहदेवः—[7]आर्य, एव [8]गुरुणा सदिष्टम् ।

भीमसेनः—कस्य ।

सहदेवः—सुयोधनस्य ।

[9]भीमसेनः—किमिति ।

सहदेवः—

इन्द्रप्रस्थ वृकप्रस्थ जयन्त वारणावतम् ।
[10]प्रयच्छ चतुरो ग्रामान्कचिदेक च पञ्चमम् ॥ १६ ॥

(क) नाथ, अश्रुतपूर्व खलु ते ईदृश वचनम् । तत्पुन पुनस्तावद्भण ।

'वर्तमानसामीप्ये वर्तमानवद्वा' इति भविष्यति लट् । नकार सर्वत्र शिरश्चालने । मश्नामि विमर्दयिष्यामि । उरस्तो वक्ष स्थलात् । पञ्चम्या तसि सप्तम्या वा तसि । पिबामि सचूर्णयामीत्यत्रापि भविष्यति लट् ॥ १५ ॥ इह प्रतिमुखरूप सधि । यदुक्त तत्रैव—'आनुषङ्गिककार्येण क्रियते यत्प्रकाशनम् । नष्टस्येवेह बीजस्य तद्धि प्रतिमुख मतम् ॥' व्यवसायनामा वचनसधिरयम् । यदाह—'प्रतिज्ञाहेतुसयुक्त व्यवसायो वचो मत ' इति । जनान्तिकम् । 'अन्योन्यमन्त्रण यत्स्याज्जनान्ते तज्जनान्तिकम्' इति भरत । अश्रुतपूर्व खल्वीदृश आलापो नाथस्य । तन्नाथ, पुन पुंनस्तावदेव भण । अत्र 'खलु' निश्चये वाक्यभूषाया वा ॥ अव्युत्पन्न पञ्चग्राममात्रम् । इह भाषणरूपो निर्वहणसधि । यदुक्त तत्रैव—'सामवादादिसपन्न भाषण भाषण मतम् ॥' **इन्द्रप्रस्थेति** ॥ १६ ॥ विषभोजनेत्यादौ य-

---

१ 'श्रुत्वा । सहर्षम्' इति पाठ २ 'णाह, अस्सुदपूव्व ण्दिस वअण ता पुणोवि भणाहि' इति बहुपुस्तकेषु पाठ ३ 'भीम —सहदेव, पश्य । ('मश्नामि कौरवशत' इत्यादि पुन पठति ।)' इति क्वचित्पाठ ४ 'अयमार्येण' इति क्वचिन्नास्ति. ५ 'एव' ६ 'तत्र' ७ 'आर्य' इति क्वचिन्नास्ति ८ 'आर्येण' ९ 'भीमसेन —किमिति' इति क्वचिन्नास्ति १० 'देहि मे चतुरो ग्रामान्पञ्चम कचिदेव तु' इति भिन्न पाठ

भीमसेनः—तत किम् ।

सहदेवः—तदेवमनया प्रतिनामग्रामप्रार्थनया पञ्चमस्य चाकीर्तनाद्विषभोजनजतुगृहदाहद्यूतसभाद्यपकारस्थानोद्घाटनमेवेद मन्ये ।

भीमसेनः—(साटोपम् ।) वत्स, एव कृते किं भवति ।

सहदेवः—आर्य, एव कृते लोके तावत्स्वगोत्रक्षयाशङ्कि हृदयमाविष्कृत भवति, कुरुराजस्य तावदसधेयता तदैव प्रतिपादिता भवति ।

भीमसेनः—मूढ, सर्वमप्येतदनर्थकम् । कुरुराजस्य तावदसधेयता तदैव प्रतिपादिता यदैवास्माभिरितो वन गच्छद्भि सर्वैरेव कुरुकुलस्य निधन प्रतिज्ञातम् । लोकेऽपि च धार्तराष्ट्रकुलक्षय कि लज्जाकरो भवताम् । अपि च रे मूर्ख,

युष्मान्ह्रेपयति क्रोधाल्लोके शत्रुकुलक्षय ।
न लज्जयति दाराणा सभाया केशकर्षणम् ॥ १७ ॥

द्रौपदी—(जनान्तिकम् ।) णाह, ण लज्जन्ति एदे । तुम वि दाव मा विसुमरेहि । (क)

(क) नाथ, न लज्जन्त एते । त्वमपि तावन्मा विस्मार्षी ।

यायोग कुशस्थलेत्यादिसबन्ध । विषभोजनादेस्तत्तत्स्थाने वृत्तत्वात्तत्तत्स्मरणम् ॥ अन्यथा मन्यन्ते प्रकारान्तरेण जानन्ति । त इति शेष ॥ असधेयतासधानविषयता । निधन विनाश ॥ **युष्मानिति** । ह्रेपयति लज्जायुक्तान्करोति । 'दारा पुभूम्नि' इत्यमर । इह यद्यप्येकैव द्रौपदी बहुर्थवाचिदारशब्देनायोग्यतया प्रतिपादयितु न शक्यते तथापि लक्षणया तदपि शक्यत इत्यदोष । केशकर्षण कर्तृ ॥ १७ ॥ नाथ न लज्जन्त एते । त्वमपि पुनर्न मा विस्मरसि ॥ चिरयति

---

१ 'दाह' इति क्वचिन्नास्ति २ 'मन्यामहे' ३ 'कि कृत भवति' ४ 'लोकेऽप्य यश स्वगोत्रक्षयाशङ्कि' इति पाठान्तरम् ५ 'आविष्कृत, कुरुराजस्यासंधेयता च दर्शिता भवति' इति बहुपुस्तकेषु पाठ ६ 'मूढ' इति क्वचिन्नास्ति. ७ 'निवेदिता' ८ एतदनन्तर पुस्तकान्तरे 'प्रसिद्धश्च लोकेऽपि धार्तराष्ट्रकुलक्षय । (सहदेवो लज्जा नाटयति ।) भीम —'किं लज्जाकरो भवताम् । अपि च रे मूर्ख' इति पाठो दृश्यते

भीमसेनः—[1]वत्स, कथ चिरयति [2]पाञ्चाली ।

सहदेवः—आर्य, का खलु वेला[3]त्रभवत्या प्राप्ताया । किं तु रोषावेशवशाद्[4]आर्यागताप्यार्येण नोप[5]लक्षिता ।

भीमसेनः—([6]दृष्ट्वा, सादरम् ।) देवि, [7]वर्धितामर्षैरस्माभिरागतापि भवती नोपलक्षिता । अतो न मन्यु कर्तुमर्हसि ।

द्रौपदी—णाह, उदासीणेसु तुह्मेसु मर्ह[8] मण्णु, ण उण कुविदेसु । (क)

भीमसेनः—यद्येवमपगतपरिभवमात्मान समर्थयस्व । (हस्ते गृहीत्वा, पार्श्वे समुपवेश्य, मुखमवलोक्य ।) कि पुनरत्रभवतीमुद्विग्नामिवोपलक्षयामि ।

द्रौपदी—[9]णाह, कि वि उव्वेअकालण तुह्मेसु सण्णिहिदेसु । (ख)

भीमसेनः—किमिति नावेदयसि । ([10]केशानवलोक्य ।) अथवा किमावेदितेन ।

जीवत्सु पाण्डुपुत्रेषु दूरमप्रोषितेषु [11]च ।

(क) नाथ, उदासीनेषु युष्मासु मम मन्यु , न पुन कुपितेषु ।

(ख) नाथ, किमप्युद्वेगकारण युष्मासु सनिहितेषु ।

विलम्बते ॥ का खलु कियती । प्राप्ताया आगताया ॥ नाथ, उदासीनेषु युष्मासु मम मन्यु , न पुन कुप्यमानेषु ॥ समर्थयस्व जानीहि ॥ नाथ न खलु किमप्युद्वेगकारण युष्मासु सनिहितेषु जीवत्सु च ॥ **जीवत्स्विति** । 'यस्य च भावेन भाव-

---

१ 'वत्स' इत्येतत्पूर्वं '(ससरणम् ।) इति क्वचिदधिक पाठ २ एतदनन्तरम् 'त्वरते मे मन सङ्ग्रामावतरणाय' इति क्वचिदधिक पाठ ३ 'तत्रभवत्या' ४ 'आर्यागतापि' इति क्वचिन्नास्ति ५ 'न लक्षिता' ६ 'दृष्ट्वा', विवृत्यावलोक्य च, सादरम्', '(विवृत्यावलोक्य च ।) कथमागता । (सादरम्)' इति नानापुस्तकेषु नानाविध पाठ ७ 'समुद्धतामर्षै' ८ 'मह' इति क्वचिन्नास्ति ९ 'णाह, किं उव्वेअकालणम्', 'णाह, ण किं वि उव्वेअकालणम्' १० 'केशानवलोक्य, निश्चस्य' इति क्वचित्पाठ ११ 'अपि'

पाञ्चालराजतनया वहते[1] यदिमा दशाम् ॥ १८ ॥

द्रौपदी—हञ्जे बुद्धिमहिए, कहेहि[2] णाहस्स को अण्णो मह परिहवेण खिज्जइ । (क)

चेटी—ज देवी आणवेदि । (भीममुपसृत्य । अञ्जलि बद्ध्वा ।) सुणादु[3] कुमालो । इदोवि अहिअदर अज्ज उव्वेअकालण आसी देवीए । (ख)

भीमसेनः—कि नामासादप्यधिकतरम् । बुद्धिमतिके, कथय ।

कौरव्यवशदावेऽसिन्क एष शलभायते ।
बद्धवेणी स्पृशन्नेना कृष्णा धूमशिखामिव ॥ १९ ॥

(क) हञ्जे बुद्धिमतिके, कथय नाथस्य कोऽन्यो मम परिभवेण खिद्यते ।

(ख) यद्देव्याज्ञापयति । शृणोतु कुमार । इतोऽप्यधिकतरमद्योद्वेगकारणमासीद्देव्या ।

लक्षणम्' इति सप्तमी । दूरमिति क्रियाविशेषणमतिशयार्थम् । अप्रोषितेष्वपरदेशवासिषु ॥ १८ ॥ हञ्जे बुद्धिमतिके, कथय नाथस्य सर्वं व्यवसितम् । कोऽन्यो मम परिभवेण खिद्यते । यद्देव्याज्ञापयति । शृणोतु कुमार । इतोऽप्यधिकतरमद्योद्वेगकारण समासादित देव्या ॥ **कौरव्येति** । अत्र यद्यपि 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' इति ष्यञो लुक्प्रसङ्गस्तथापि दुर्योधन एकस्मिन्नेव 'कुर्वादिभ्यो ण्य 'इति कौरव्यशब्द व्युत्पाद्य 'तत्र साधु ' इति सूत्रेण तस्माद्यत्प्रत्यय एव 'कौरव्या पशव ' (१।२५) इत्यादावप्यूह्यम् । 'वने च वनवह्नौ च दवो दाव प्रकीर्तित ' इति शाश्वत । बद्धवेणीमित्यत्र भूतार्थक्तप्रत्ययस्यासाधुत्वमग्रे वेणीबन्धनादित्यदेश्यम् । वेण्यास्तदाबद्धत्वादग्र उन्मोकस्य कथनात् । अतएव वेण्या सहार उन्मोकोऽत्रेति ग्रन्थनामापि घटते । शलभायते पतङ्गवदाचरति । वेणी केशवेश प्रवाहश्च । 'एनाम्' इत्यत्रानन्वादेशात् 'एताम्' इति युक्त पाठ । तयोरनित्यत्वात् । कृष्णा द्रौपदी

---

१ 'वहतीयमिमा दशाम्' २ 'णिवेदेहि दाव णाहस्स' ३ 'कुमाल, इदोवि अहिअ अज्ज मण्णुकालण आसी देवीए', अथवा 'कुमाल, अदोवि अज्ज अत्थि अवर मण्णुकालण देवीए उप्पण्ण' इति भिन्न पाठ ४ 'मुक्तवेणीम्'

चेटी—सुणादु कुमालो अज्ज [1]क्खु देवी अम्बासहिदा सुभद्दाप्पमुहेण सवत्तिवग्गेण परिवुदा अज्जाए गन्धालीए पादवन्दण कादु [2]गेदा । (क)

भीमसेनः—[3]युक्तमे[4]तत् । वन्द्या खलु गुरव । ततस्तत ।

चेटी—तदो पडिणिवुत्तमाणा भाणुमदीए [5]देवी दिट्ठा । (ख)

भीमसेनः—(सक्रोधम् ।) [6]आ, शत्रोर्भार्यया दृष्टा । हन्त, [7]स्थान क्रोधस्य देव्या । ततस्तत ।

चेटी—तदो ताए देवी पेक्खिअ सँहीजणदिण्णदिट्ठीए सगव्व ईसि विहसिअ भणिअ । अइ जण्णसेणि, कीस तुह्माण अज्जवि केसा ण सजनीअन्ति । (ग)

(क) शृणोतु कुमार । अद्य खलु देव्यम्बासहिता सुभद्राप्रमुखेण सपत्नीवर्गेण परिवृता आर्याया गान्धार्या पादवन्दन कर्तुं गता ।

(ख) तत प्रतिनिवर्तमाना भानुमत्या देवी दृष्टा ।

(ग) ततस्तया देवीं प्रेक्ष्य सखीजनदत्तदृष्ट्या सगर्वमीषद्विहस्य भणितम् । अयि याज्ञसेनि, कस्माद्युष्माकमद्यापि केशा न सयम्यन्ते ।

श्यामा च ॥ १९ ॥ शृणोतु कुमार । अद्य खलु देव्यम्बासहिता सुभद्राप्रमुखेण सपत्नीवर्गेण परिवृतार्याया गान्धार्या पादवन्दन कर्तुं गता ॥ ततस्तस्मात्प्रतिनिवर्तमाना भानुमत्या देवी दृष्टा । अत्र 'खलु' वाक्यभूषायाम् । अम्बा माता कुन्ती । आ इत्याक्षेपे । ततस्तया देवी प्रेक्ष्य सखीजनदत्तदृष्ट्या सगर्वमीषद्विहस्य भणितम् । अयि याज्ञसेनि द्रौपदि, किमिति युष्माकमद्यापि केशा न सयम्यन्त इति । सयमनमिह बन्धनम् । कलत्रशब्दस्याजहल्लिङ्गतया कलत्र सेति

---

१ 'क्खु' इति क्वचिन्नास्ति, 'अज्ज क्खु भट्टिणी सहीए सहिदा' इत्यपि पाठ. २ 'गदा आसी' ३ 'युज्यते, यतोऽभिवन्दनीया गुरव', अथवा 'युज्यते । एवमेतत् । अभिवन्दनीया गुरव' इति पाठान्तराणि ४ 'देवी' इति क्वचिन्नास्ति ५ 'आ कथम्' ६ 'युक्त क्रोधस्थानम्', 'स्थान क्रोधस्य साम्प्रत देव्या', 'स्थान खेदस्य देव्या' इति पाठान्तराणि ७ 'सहीवअणदिण्णदिट्ठीए' ८ एतदनन्तर 'भीम —न केवल दृष्टा, उक्ता च । अहो किं कुर्मः । ततस्तत चेटी—अइ जण्णसेणि, पञ्चग्गामा पत्थीअन्ति त्ति सुणीअदि । ता कीस दाणीं वि दे केसा ण सजमीअन्ति' एवविध पाठो बहुपुस्तकेषु दृश्यते

भीमसेनः—सहदेव, श्रुतम् ।

सहदेवः—[1]आर्य,उचितमेवैतत्तस्या । दुर्योधनकलत्र हि सा पश्य ।

स्त्रीणा हि साहचर्याद्भवन्ति चेतासि भर्तृसदृशानि ।
मधुरापि हि मूर्च्छयते विषविटपिसमाश्रिता वल्ली ॥ २० ॥

भीमसेनः—बुद्धिमतिके, ततो देव्या किमभिहितम् ।

चेटी—कुमाल, जइ [3]पैंडिहीण मम वअण भवे तदो देवी भणादि । (क)

भीमसेनः—किं पुनरभिहित भवत्या ।

चेटी—[4]तदो मए परिकुव्विअ भणिअ । अइ भाणुमदि, तुह्माण अमुक्केसु केस[5]हत्थेसु कध अह्माण देवीए केसा सजमीअन्ति त्ति । (ख)

भीमसेनः—(सपरितोषम् ।) साधु बुद्धिमतिके, साधु । तदभि-

(क) कुमार, यदि परिहीन मम वचन भवेत्तदा देवी भणति ।

(ख) ततो मया परिकुप्य भणितम् । अयि भानुमति, युष्माकममुक्तेषु केशहस्तेषु कथमस्माक देव्या केशा. सयम्यन्त इति ।

सामानाधिकरण्यम् । 'कलत्र श्रोणिभार्ययो ' इति विश्व ॥ **स्त्रीणामिति** । साहचर्यान्नित्यसमाजात् । मधुरा कोमला मधुररसा वा । मूर्च्छयते मूर्च्छां करोति । यद्वा मूर्च्छयते जनमिति शेष । विषविटपो विषशाखाविस्तार । 'विस्तारो विटपोऽस्त्रियाम्' इत्यमर । क्वचित् 'विषविटपिसमाश्रिता' इति पाठ स तु मनोहर वल्या वृक्षसाहचर्यात् । वल्ली लता । आर्याच्छन्द ॥ २० ॥ कुमार, यदि परिहीन मम वचन भवेत्ततो देवी वदति ॥ ततो मया परिकुप्य भणितम् । अयि भानुमति, युष्माकममुक्तेषु केशहस्तेषु कथमस्माक देव्या केशहस्ता सयम्यन्त इति । अत्र केशहस्ता प्रशस्तकेशा ॥ 'साधु बुद्धिमतिके, साधु' इत्यनेन हर्षरूपशिल्पकमुक्तम् । यदुक्त तत्रैव—'चित्तप्रसादो हर्ष स्यात्तन्निमित्तस्य सगमे'

---

१ 'आर्य, किमिहोच्यते । दुर्योधनकलत्र हि सा' इति बहुपुस्तकेषु पाठ २ 'विषविटपसमाश्रिता' ३ 'परिजणहीणा भवे' इति बहुपुस्तकाना पाठ , 'जइ मम बुद्धिपडिहीणत्तण तदो देवी भणादि' इत्यपि क्वचित्पाठ ४ 'कुमाल, मए एव भणिद' इति पाठ ५ 'केसेसु'

हित[1] यदस्मत्परिजनोचितम् । (अधीरमासनादुत्तिष्ठन् ।)[2] भवति[3] पाञ्चालराजतनये, श्रूयताम् । अचिरेणैव कालेन ।

चञ्चद्भुजभ्रमितचण्डगदाभिघात-
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य ।
स्त्यानावपविद्धघनशोणितशोणपाणि-
रुत्तंसयिष्यति कचास्तव देवि भीम ॥ २१ ॥

द्रौपदी—किं णाह, दुक्करं तुए परिकुविदेण । सव्वहा अणुगेह्णन्तु एदं ववसिदं दे भादरो । (क)

सहदेवः—अनुगृहीतमेतदस्माभिः ।

नेपथ्ये महान्कलकलः । सर्वे सविस्मयमाकर्णयन्ति ।

(क) किं नाथ, दुष्करं त्वया परिकुपितेन । सर्वथानुगृह्णन्त्वेतद्व्यवसितं ते भ्रातरः ।

इति । सावष्टम्भं निर्भयम् ॥ **चञ्चदित्यादि** । हे देवि, तव कचान्केशान्भीमः उत्तम्भयिष्यति बन्धयिष्यति । कीदृशः सन् । सुयोधनस्य स्त्यानं स्तिमितमपविद्धं क्षिप्तं घनं निरन्तरं यच्छोणितं तेन शोणो लोहितः पाणिर्यस्य स तथा । 'स्त्यानं स्तिमितसघनयोः' इति विश्वः । 'आविद्धक्षिप्तेरिता समा' इत्यमरः । चण्डः प्रचण्डः ॥ २१ ॥ इह स्त्यानेत्यादिकः प्रतीकाररूपो गण्डः । यदुक्तं तत्रैव—'प्रतिक्रियान्वितं वाक्यं प्रतीकार इति स्मृतः' । इह परिन्यासरूपो मुखसन्धिः । यदुक्तं तत्रैव—'परिन्यासस्तु कार्यस्य भाविनो निश्चयाद्भवेत्' । नाथ, अतिदुष्करं त्वया परिकुपितेन व्यवसितम् । तदनुमन्यन्तामेतद्व्यवसितं देवताः ॥

---

१ 'अभिहितं भवत्या' इति पाठः २ '(अधीरमासनादुत्तिष्ठन् ।)' इत्यत्र क्वचित् '(स्वाभरणानि बुद्धिमतिकायै प्रयच्छति ।)' इति पाठो दृश्यते, '(स्वाभरणानि बुद्धिमतिकायै प्रयच्छति । अधीरमासनादुत्तिष्ठन् ।)' इत्यपि क्वचित्पाठः ३ 'अत्रभवति पाञ्चालराजतनये, किं बहुना । श्रूयताम् ।', अथवा 'अयि पाञ्चालराजतनये, अलं विषादेन । किं बहुना श्रूयताम् ।', अथवा 'भवतु । पाञ्चालराजतनये, श्रूयताम् ।' अथवा 'अयि पाञ्चालतनये, अलं विषादेन । किं बहुना, यत्करिष्ये तच्छ्रूयताम् ।' इति पाठान्तराणि ४ 'अवबद्धं', 'अवनद्धं' ५ 'उत्तम्भयिष्यति' ६ 'तुए परिकुविदे' इति पाठः ७ 'सव्वहा' इति क्वचिन्नास्ति ८ 'तधावि अणुगेह्णन्तु दे ववसिदं देवदाओ', 'अणुगेह्णन्तु तुए एदं ववसिदं देवदाओ' इति पाठान्तरम् ९ 'प्रतिगृहीतं मङ्गलवचनमस्माभिः' इति पाठः

भीमसेनः[1]—
मन्थायस्तार्णवाम्भ[2] ध्रुतकुहरचलन्मन्दर[3]ध्वानधीर[4]
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसघट्टचण्ड[5] ।
कृष्णाक्रोधाग्रदूत[6] कुरुकुलनिधनोत्पातनिर्घातवात[7]
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम्[8] ॥२२॥

(प्रविश्य सभ्रान्त ।)

कञ्चुकी—कुमार, एष खलु भगवान्वासुदेव ।

(सर्वे कृताञ्जलय समुत्तिष्ठन्ति ।)

भीमसेनः—(ससभ्रमम्[9] ।) कासौ[10] भगवान् ।

कञ्चुकी—पाण्डवपक्षपातामर्षितेन सुयोधनेन सयमितुमारब्ध[11] ।

(सर्वे सभ्रम नाटयन्ति ।)

भीमसेनः—कि[99] सयत ।

कञ्चुकी—नहि नहि, सयमितुमारब्ध ।

भीमसेनः[12]—कि कृत देवेन ।

कञ्चुकी—तत स महात्मा दर्शितविश्वरूपतेज सपातमूर्च्छित-

कलकलोऽकस्मादुत्थितो महाशब्द ॥ **मन्थेत्यादि** । मन्थो मन्थनदण्डस्तेनायस्त क्षिप्तो योऽर्णव समुद्रस्तदम्भसा ध्रुत व्याप्त यत्कुहरं मध्य तेन चलन्यो मन्दरमाना शैलस्तच्छब्दवदूर्म्मीरोऽय दुन्दुभि तेन ताडित इत्यन्वय । कोणाघातेषु सत्सु । 'ढक्काशतसहस्राणि भेरीशतशतानि च । एकदा यत्र हन्यन्ते कोणाघात स उच्यते ॥' इति भरत । घटा समूह । सघट्टो मिलनम् । अभ्रदूत प्रथमकथक । उत्पातनिर्घातवातोऽशुभ प्रचण्डपवन । प्रतिरसित प्रतिरव ॥ २२ ॥ कञ्चुकी महल्लक । सयतो बद्ध । 'बद्धे कीलितसयतौ' इत्यमर । इह समयरूपो निर्वहणसधि । यदाह—'विरोधस्याख्यान यद्वा दु खस्य समयो मत' । सावेग सस्नेहम् । हन्त हर्षे । विश्वरूप विश्वभरमूर्ति । सपातो

---

१ 'भीमसेन —(सानन्दम् ।) आर्ये, किमेतत्' इति क्वचिदधिक पाठ २ 'मन्थायस्तार्णवार्णे' २ 'ध्रुति' ४ 'वलन्' ५ 'कुरुपति' ६ 'समो' ७ 'ताड्यते ८ 'ससभ्रमम्' इति क्वचिन्नास्ति ९ 'कासौ कासौ भगवान्' १० 'सयन्तुम्' ११ 'कथ स भगवान्वासुदेव सयत' इत्यपर पाठ १२ 'भीम —(सपरितोषम् ।) हन्त, विघटित सधिर्भग्नावूरू च सुयोधनस्य । अथ किं कृत देवेन' इत्यपि क्वचित्पाठ

तमवधूय कुरुकुलमस्मच्छिबिरसन्निवेशमनुप्राप्त कुमारमविलम्बित द्रष्टुमिच्छति ।

भीमसेनः—(सोपहासम् ।) किं नाम दुरात्मा सुयोधनो भगवन्त सयमितुमिच्छति । (आकाशे दत्तदृष्टि ।) आ दुरात्मन्कुरुकुलपांसुल, एवमतिक्रान्तमर्यादे त्वयि निमित्तमात्रेण पाण्डवक्रोधेन भवितव्यम् ।

सहदेवः—आर्य, किमसौ दुरात्मा सुयोधनहतको वासुदेवमपि भगवन्त स्वरूपेण न जानाति ।

भीमसेनः—वत्स, मूढ खल्वय दुरात्मा कथ जानातु । पश्य ।

आत्मारामा विहितरतयो निर्विकल्पे समाधौ
ज्ञानोत्सेकाद्विघटिततमोग्रन्थय सत्त्वनिष्ठा ।
य वीक्षन्ते कमपि तमसा ज्योतिषा वा परस्ता-
त्त मोहान्ध कथमयममु वेत्ति देव पुराणम् ॥ २३ ॥

आर्य जयधर, किमिदानीमध्यवस्यति गुरु ।

मेलकम् । हतको निन्द्य । पांसुल पापकारिन् । मूढो मूर्ख । खलु वाक्यभूषाया निश्चये वा ॥ **आत्मेत्यादि** । सत्त्वनिष्ठा सात्विकभावापन्ना मुनयो य भगवन्त वीक्षन्ते साक्षात्कुर्वन्ति । कीदृशा । आत्मैवारामो वन येषा ते । तथा चात्मवनयोस्तुल्यत्वेनात्यन्तमौदास्यमाविष्कृतम् । यद्वा । आत्मन्यात्ममन्ताद्भावेन रमन्त इत्यात्मारामा । त्यक्तेतरसङ्गा इत्यर्थ । पुन कीदृशा । निर्विकल्पे निष्कलुषे निर्णीते त्यक्तभेदे वा समाधौ नियमविशेषे विहितरतय कृतानुरागा । 'विहितधृतय' इत्यपि पाठ । तत्र विहिता धृतिर्धारणा यैस्ते । इद खल्यन्ताभ्यासवैराग्याभ्या भवति । तथा च गीता—'असशय महाबाहो मनो दुर्निग्रह चलम् । अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥' इति । यद्वा । आत्मारामे आत्मनीवारामेऽप्यासमन्ताद्विहितरतय कृतानुरागा । यद्वा । आत्मैवारामो वनं तत्रासमन्ताद्भावेन विहितरतय । अस्मिन्नर्थद्वये निर्विकल्पे समाधौ सति यं

---

१ 'विहस्य' इति पाठ २ 'पासन' ३ 'सुयोधनो' ४ 'स्वेन रूपेण' ५ 'मयत', 'धृतय' ६ 'ज्ञानोद्रेकात्' ७ 'ध्यायन्ते' ८ 'किमपि' ९ 'मोहात्मा' १० 'वेत्तु' ११ 'आर्य मैत्रेय, किमिदानीमध्यवस्यन्ति गुरव' इति बहुपुस्तकाना पाठ

कञ्चुकी—स्वयमेव गत्वा महाराजस्याध्यवसितं ज्ञास्यति कुमार । (इति निष्क्रान्त ।)

(नेपथ्ये कलाकलानन्तरम् ।)

भो भो द्रुपदविराटवृष्ण्यन्धकसहदेवप्रभृतयोऽस्मदक्षौहिणीपतय कौरवचमूप्रधानयोधाश्च, शृण्वन्तु भवन्त ।

यत्सत्यव्रतभङ्गभीरुमनसा यत्नेन मन्दीकृत
यद्विस्मर्तुमपीहित शमवता शान्ति कुलस्येच्छता ।
तद्द्यूतारणिसंभृत नृपसुताकेशाम्बराकर्षणै
क्रोधज्योतिरिदं महत्कुरुवने यौधिष्ठिर जृम्भते ॥ २४ ॥

वीक्षन्त इत्यर्थ । पुन कीदृशा । ज्ञानोत्सेकात्तत्त्वज्ञानमाहात्म्याद्विनाशिततामसगुणा विनाशितमिथ्याज्ञाना वा । अनेन धृते फलमुक्तम् । 'ज्ञानोद्रेकात्' इत्यपि पाठ । उद्रेक प्रौढि । अनेन तत्रासङ्ग उक्त । अत्र तु प्रथम वनवास , तत समाधिलाभ , ततस्तत्त्वज्ञानेन मिथ्याज्ञानविनाश , तत सत्त्वनिष्ठता, तत साक्षात्कार इति तत्त्वज्ञानोत्पादक क्रमोऽपि बोद्धव्य । यद्वा । अन्यत्र सङ्गत्याग , ततो धृति , तत प्रज्ञाप्रौढि , ततोऽविद्यालक्षणतमोग्रन्थिभेद , ततो राजसप्रवृत्त्युच्छेदो मूलोच्छेदात् , तत सात्त्विकी प्रवृत्ति , तस्या फलमीश्वरप्रसाद , तेन भगवान्समस्ततम प्रकाशयो परतरो दृश्यते । तमेव तादृशपुरुषोऽपि न पश्यति । किं पुनर्मूढो दुर्योधन इति भाव । य कीदृशम् । कमप्यनिर्वचनीयम् । तमसा मिथ्याज्ञानाना ज्योतिषा तत्त्वज्ञानाना परस्तात्परम् । ताभ्यामप्यगम्यमित्यर्थ । अत एव कमपीत्युक्तम् । त देव कथमय मोहान्धो जानातीति । पुन कीदृशम् । पुराणमनादिसिद्धम् । तथा च यमनियमादिसिद्धपुरुषधौरेयगम्यमिति ध्वनितम् ॥ २३ ॥ जयधरनामा कञ्चुकी । अध्यवस्यति करोति ॥ **यत्सत्येति ।** अवश्यपालनीय सकल्पो व्रतम् । सत्यमेव व्रतम् । मन्दीकृतम् । मयेति शेष । मनसेति विशेषणद्वारा विशेष्यप्रतिपत्तिरिति वा । यत्क्रोधज्योति । शमवता शान्तेन मया । द्यूतमेवारणिर्यज्ञकाष्ठभेदस्त्र सभृत समुपचितम् । 'निर्मन्थ्यदारुणि त्वरणिर्द्वयो ' इत्यमर । नृपसुता द्रौपदी । कुरुरेव वनम् । यौधि-

---

१ 'नृपवधू' २ 'कुरुकुले

भीमसेनः—(आकर्ण्य । सहर्षम् ।)[1] जृम्भता[2] जृम्भतामप्रतिहतप्रसरमार्यस्य[3] क्रोधज्योति ।

द्रौपदी[4]—णाह, किं[5] दाणी एसो पलअजलहरत्थणिदमसलो[6] क्खणे क्खणे समरदुन्दुही ताडीअदि । (क)

भीमसेनः—देवि, किमन्यत् । यज्ञ प्रवर्तते ।

द्रौपदी—(सविस्मयम् ।) को एसो जण्णो । (ख)

भीमसेनः—रणयज्ञ । तथाहि ।

चत्वारो वयमृत्विज स भगवान्कर्मोपदेष्टा हरि
सङ्ग्रामाध्वरदीक्षितो नरपति पत्नी गृहीतव्रता ।

(क) नाथ, किमिदानीमेष प्रलयजलधरस्तनितमासल क्षणे क्षणे समरदुन्दुभिस्ताड्यते ।

(ख) क एष यज्ञ ।

ष्ठिर युधिष्ठिरसबन्धि । जृम्भते प्रकाशते ॥ २४ ॥ नाथ, किमिदानीमेष प्रलयजलधरमन्थरस्तनितमासलोद्घोषभीषण क्षणे क्षणे समरदुन्दुभिस्ताड्यते । अत्र मन्थरस्तनित गम्भीरगर्जित तद्वन्मासलोऽधिको य उद्घोष उच्चै शब्दस्तेन भीषण । इह विद्रवनामा गर्भसधि । यदाह—'शङ्काकलङ्कप्रभव सभ्रमो विद्रवो मत' इति । ननु भणामीत्यर्थे । अधुना 'बीजप्ररोह उद्भेदो यत्किंचित्प्रभवात्मक' इति भरतादुद्भेदरूप मुखसधिमाह—**चत्वार इति** । चत्वारो भीमार्जुनसहदेवनकुला । कर्मोपदेष्टाचार्य । दीक्षितो दीक्षा प्रापित । नरपतिर्युधिष्ठिर । पत्नी द्रौपदी । गृहीतव्रता कृतनियमा । कौरव्या कुरुकुलजाता । प-

---

१ '(आकर्ण्य । सहर्षामर्षम् ।)' इति क्वचित्पाठ २ 'भीमसेन —(सहर्षम् ।) जृम्भता जृम्भताम् । सप्रत्यप्रतिहतमार्यस्य क्रोधज्योति' इति दशरूपके पाठ ३ 'आर्यक्रोधज्योति' ४ 'द्रौपदी—(सविस्मयम् ।) णाह' इति क्वचित्पाठ ५ 'कह' ६ 'पलअजलहरघणत्थणिदमसलो क्खणे क्खणे समरदुन्दुही ताडीअदि', अथवा 'पलअजलहरक्कणिअमसलो क्खणे क्खणे चण्डघोसो समरदुन्दुही ताडीअदि', अथवा 'पलअजलहरघणत्थणिदमसलो क्खणे क्खणे समरदुन्दुही चण्डघोसो दालुणो ताडीअदि' इति नानापुस्तकेषु नानाविध पाठ

कौरव्या पशव प्रियापरिभवक्लेशोपशान्ति फल
राजन्योपनिमन्त्रणाय रसति स्फीत यशोदुन्दुभि ॥ २५॥

सहदेवः—आर्य, गच्छामो वयमिदानीं गुरुजनानुज्ञाता विक्रमानुरूपमाचरितुम् ।

भीमसेनः—वत्स, एते वयमुद्यता आर्यस्यानुज्ञामनुष्ठातुमेव । (उत्थाय ।) तत्पाञ्चालि, गच्छामो वयमिदानी कुरुकुलक्षयाय ।

द्रौपदी—(बाष्प धारयन्ती ।) णाह, असुरसमराहिमुहस्स हरिणो विअ मङ्गल तुह्माण होदु । ज च अम्बाकुन्दी आसासदि त तुह्माण होदु । (क)

उभौ—प्रतिगृहीत मङ्गलवचनमस्माभि ।

द्रौपदी—अण्ण च णाह, पुणोवि तुह्मेहि समरअदो आअच्छिअ अह समास्सासइदव्वा । (ख)

(क) नाथ, असुरसमराभिमुखस्य हरेरिव मङ्गल युष्माक भवतु । यच्चाम्बा कुन्त्याशास्ते तद्युष्माक भवतु ।

(ख) अन्यच्च नाथ, पुनरपि युष्माभि समरादागत्याह समाश्वासयितव्या ।

शवो यज्ञार्थं घातनीया । राजन्योपनिमन्त्रणाय क्षत्रियाह्वानाय । रसति शब्दायते । स्फीत मनोज्ञ यथा स्यादेवम् । यशोदुन्दुभिर्यश प्रधानो वाद्यविशेष । यद्वा । यशोदुन्दुभि पटह । 'स्याद्यश पटहो ढक्का मेर्यामानकदुन्दुभि' इत्यमर ॥ २५ ॥ अनुज्ञात इति पञ्चम्यास्तसि । इह 'देवी, गच्छाम' इत्यनेन कारणरूपो युगसधि । यदाह—'उद्यम प्रस्तुतार्थस्य कारण परिकीर्तितम्' ।

---

१ 'हतो दुन्दुभि' २ 'उद्यता एवार्यस्यानुज्ञामनुष्ठातुम्' इत्यपि पाठ ३ 'देवि, गच्छाम' ४ 'ज च अम्बाकुन्दी—' इत्यादि क्वचिन्नास्ति ५ एतद्वचन क्वचिन्नास्ति ६ 'चेटी—अण्ण च देवी भणादि । णाह, तुह्मेहिं पुणोमि समरादो आअच्छिअ अह आसासइदव्वा' इति बहुपुस्तकाना पाठ , दशरूपके, तु 'द्रौपदी—णाह, पुणोवि तुह्मेहिं अह आअच्छिअ समासासिदव्वा' एवविध पाठो वर्तते

भीमसेनः—ननु[1] पाञ्चालराजतनये, किमद्याप्यलीकाश्वासनया[1] ।
भूय[2] परिभवक्षान्तिलज्जाविधुरिताननम् ।
अनि[3] शेषितकौरव्य न पश्यसि[4] वृकोदरम् ॥ २६ ॥

द्रौपदी—णाह, मा[4] क्खु जण्णसेणीपरिहवुद्दीविदकोवाणला अणवेक्खिदसरीरा सचरिस्सध[5] । जदो अप्पमत्तसचरणिज्जाइ रिउबलाइ सुणीअन्ति । (क)

भीमसेनः—अयि[6] सुक्षत्रिये,

(क) नाथ, मा खलु याज्ञसेनीपरिभवोद्दीपितकोपानला अनवेक्षितशरीरा सचरिष्यथ । यतोऽप्रमत्तसचरणीयानि रिपुबलानि श्रूयन्ते ।

नाथ, असुरसमराभिमुखस्य हरेर्यन्मङ्गल वृत्त तद्युष्माक भवतु । यच्चाम्बा कुन्ती वदति तद्युष्माक भवतु । अन्यच्च नाथ, पुनरपि त्वया समरादागत्याह समाश्वासयितव्या । अलीक मिथ्या ॥ **भूय इति** । भूय परिभव प्रचुरपराभव । क्षान्ति क्षमा । विधुरित व्याप्तम् । वृकोदर भीमम् । 'न पश्यसि' इति पाठे भविष्यति लट् ॥ २६ ॥ मा खलु याज्ञसेनीपरिभवोद्दीपितकोपानला अनपेक्षित शरीरावरणा रणे पुन सचरत । यतोऽप्रमत्तमुखसचाराणि रिपुबलानीति श्रूयते । अत्र 'खलु' निषेधेऽवधारणे वा । सचरतेत्यत्र यूयमिति शेष । अप्रमत्त सावधान । प्रमत्त इत्यत्र 'रदाभ्या निष्ठातो न पूर्वस्य च द ' इति सूत्रेण न नत्वम् ।

---

१ 'देवि, किमिवालीकाश्वासनाभि ', अथवा 'देवि, किमद्याप्यलीकाश्वासेन', अथवा 'देवि, किमलीकाश्वासनेन', अथवा 'देवि, किमिवालीकाश्वासनेन' इति नानाविध पाठ २ 'परिभवक्षान्तिलज्जाबन्धुरिताननम्' इत्यपि पाठ ३ 'द्रक्ष्यसि' ४ 'मा क्खु मा क्खु' इति बहुपुस्तकेषु पाठ ५ 'परिक्रमिस्सध' ६ 'शृणु सुक्षत्रिये, समर्था वय सक्रमितुम्', अथवा 'अयि सुक्षत्रिये, समर्था वयमस्मिन्रणे परिक्रमितुम् । शृणु', अथवा 'अयि सुक्षत्रिये, समर्था वय सक्रमितुम्' इति नानाविध पाठ

अन्योन्यास्फालभिन्नद्विपरुधिरवसामासमस्तिष्कपङ्के
मग्नाना स्यन्दनानामुपरिकृतपदन्यासविक्रान्तपत्तौ ।
स्फीतासृक्पानगोष्ठीरसदशिवशिवातूर्यनृत्यत्कबन्धे
सङ्ग्रामैकार्णवान्त पयसि विचरितु पण्डिता पाण्डुपुत्रा ॥२७॥

(इति निष्क्रान्ता सर्वे ।)

इति प्रथमोऽङ्कः ।

'न ध्याख्यापूमूर्च्छिमदाम्' इति प्रतिषेधात् । **अन्योन्येति** । आस्फाल सघट्ट । भिन्नो दारित । मस्तिष्क गोर्द 'गोदी' इति लोके प्रसिद्धम् । स्यन्दनो रथ । कृतपदन्यासोऽत एव विक्रान्त पत्ति पदातिर्यत्र तादृशे । स्फीतासृग्दीप्तरक्त तत्पानगोष्ठीषु रसन्त्यशिवशिवामङ्गलश्रृगालिका सैव तूर्यो मर्दल तेन नृत्यत्कबन्धोऽपमूर्धकलेवर यत्र तादृशे ॥ २७ ॥ सर्वे निष्क्रान्ता इति सर्वत्राङ्के कर्तव्यम् । तदुक्त तत्रैव—'पात्रैस्त्रिचतुरैरङ्कस्तेषामन्ते च निर्गम ' इति ॥

असूत य रत्नधरो गुणीशस्तत्तद्गुणाढ्या दमयन्तिकापि ।
जगद्धरं तस्य कृतौ व्यरसीदाद्योऽयमङ्को वरटिप्पनेऽत्र ॥

इति प्रथमोऽङ्कः ।

---

१. 'वसासान्द्रमस्तिष्कपङ्के'

द्वितीयोऽङ्क ।

(तत प्रविशति कञ्चुकी ।)

कञ्चुकी—[1]आदिष्टोऽस्मि महाराजदुर्योधनेन—'[2]विनयधर,[3]सत्वरं गच्छ त्वम् । अन्विष्यता देवी भानुमती । अपि निवृत्ता अम्बाया पादवन्दनसमयान्न वेति । यतस्तां[4] विलोक्य निहताभिमन्यवो राधेय-[5]जयद्रथप्रभृतयोऽस्मत्[6]सेनापतय समरभूमि गत्वा [7]सभाजयितव्या' इति । तन्मया द्रुततर गन्तव्यमिति । अहो प्रभविष्णुता महाराजस्य, यन्मम जरसाभिभूतस्य मर्यादामात्रमेवावरोधनिवास । अथवा किमिति जरामुपालभेय, यत. [9]सर्वान्त पुरचारिणामयमेव वैहारिको वेषश्चेष्टा च । तथाहि ।

नोच्चै[11] सत्यपि चक्षुषीक्षितुमल[12] श्रुत्वापि नाकर्णित
शक्तेनाप्यधिकार इत्यधिकृता यष्टि[13] समालम्बिता ।

आदिष्टोऽस्मीति । 'सभावयितव्या' इत्यनेनान्वय । अन्विष्यतामनुसधीयताम् । अपि प्रश्ने सभावनाया वा । 'अम्बा माताथ जननी' इत्यमर । राधेय कर्ण । सभावयितव्या सनिहितीकर्तव्या । प्रभविष्णुता प्रभावशालिता । जरसा वार्धकेन । मर्यादामात्र मर्यादापर्यवसन्न । अवरोधव्यापारोऽन्त पुरकर्म । व्यावहारिको व्यवहारजन्य । उक्तोपन्यासे 'तथाहि' इति शब्दप्रयोग । **नोच्चैरिति** । चक्षुषि सत्यपि उच्चैरीक्षितु नालमह न समर्थं । नाकर्णित मयेत्यन्वय । शक्तेनापि मया यष्टि समाश्रिता । कीदृशी । अधिकारोऽय मम कञ्चुकिनो यष्टिसमालम्बनमित्यधिकृता योग्या । स्खलित व्यापारप्रच्यव ।

---

१ 'आज्ञापितोऽस्मि' इति पाठ २ 'यथा विनयधर' ३ 'सत्वरम्' इति क्वचिन्नास्ति ४ 'यतो मया तामवलोक्य' इति पाठ ५ 'द्रोणराधेयजयद्रथप्रभृतय' इति क्वचित्पाठ ६ 'असत्' इति क्वचिन्नास्ति ७ 'सभावयितव्या' ८ 'अवरोधव्यापार' ९ 'उपालभे', 'उपालभामहे' १० 'सर्वेषामेवायमन्त पुरचारिणा वैहारिको वेष', 'सर्वान्त पुरिकाणामयमेव व्यावहारिको वेष' इति पाठान्तरम् ११ 'चक्षुषीक्षितमलम्'. १२. 'नाकर्णितुम्' १३ 'समालम्ब्यते'

सर्वत्र स्खलितेषु दत्तमनसा जातं तथा नोद्धत
सेवान्धीकृतजीवितस्य जरसा किं नाम यन्मे कृतम् ॥ १॥

(परिक्रम्य दृष्ट्वा । आकाशे ।) विहङ्गिके, अपि श्वश्रूजनपादवन्दनं कृत्वा प्रतिनिवृत्ता भानुमती । (कर्णं दत्वा ।) किं कथयसि—आर्य, एषा भानुमती देवी पत्युः समरविजयाशंसया निर्वर्तितगुरुदेवपादवन्दनाद्यप्रभृत्यारब्धनियमा देवगृहे बालोद्याने तिष्ठतीति । तद्भद्रे, गच्छ त्वमात्मव्यापाराय, यावदहमप्यत्रस्था देवी महाराजस्य निवेदयामीति । (परिक्रम्य ।) साधु पतिव्रते, साधु, स्त्रीभावेऽपि वर्तमाना वरं भवती न पुनर्महाराज । योऽयमुद्यतेषु बलवत्सु, अथवा किं बलवत्सु वासुदेवसहायेषु पाण्डुपुत्रेष्वरिष्वद्याप्यन्तं पुरविहारसुखमनुभवति । (विचिन्त्य ।) इदमपरमयथातथं स्वामिनश्चेष्टितम् । कुतः ।

आ शस्त्रग्रहणादकुण्ठपरशोस्तस्यापि जेता मुने-
स्तापायास्य न पाण्डुसूनुभिरयं भीष्मः शरैः शायितः ।

उद्धत यथा स्यादेव मया न जातं नोद्धतेन मया भूतमित्यर्थः । नामानवक्लृप्तौ । जरसा मम किं नाम कृतम् । अपि तु न किमपि । कीदृशस्य । सेवान्धीकृतजीवितस्य । सेवार्थमन्धीकृतं निष्फलीकृतं जीवितं येन तस्येत्यर्थः । क्वचित् 'सेवास्वीकृतजीवितस्य' इति पाठः । तत्र सेवार्थं स्वीकृतं जीवितं जीवनं येन । तथा च सेवानिमित्तमेव ममान्ध्यादिकं न तु जराकृतमिति भावः ॥ १ ॥ आकाश इति । 'दूरस्थाभाषणं यत्स्यादशरीरं निवेदनम् । परोक्षान्तरितं वाक्यं तदाकाशं निगद्यते ॥' इति भरतः । विहङ्गिका पक्षिवधूः । देवगृहप्रधानमुद्यानवनम् । वरं मनागिष्टा । 'मनागिष्टे वरं यत्तु कश्चिदाह तदव्ययम्' इति विश्वः । विहारः क्रीडा । अयथातथमनर्हम् । **आ शस्त्रेति** । यदसौ भीष्मः पाण्डुसू-

---

१ 'मया', २ 'सेवास्वीकृतजीवितस्य', ३ 'कर्णं दत्वा, आकाशे' इति क्वचित्पाठः, ४ 'गुरुपादवन्दनं', ५ 'देवगृहे' इति क्वचिन्नास्ति ६ 'अहमपि महाराजस्य सदेशमावेदयामि' इति क्वचित्पाठः ७ 'अपि' क्वचिन्नास्ति ८ 'बलवत्सबलवत्सु वा वासुदेवसहायेषु' इति बहवः ९ 'अरिषु च' इति पुस्तकान्तरे पाठः, १०, 'अन्तः पुरविहारम्', 'अन्तःपुरसुखम्', ११ 'इदमपरमयथातथं चेष्टितं स्वामिनः' 'इदमयथातथं स्वामिनश्चेष्टितम्' इति पाठः

प्रौढानेकधनुर्धरारिविजयश्रान्तस्य चैकाकिनो
बालस्यायमरातिलूनधनुषः प्रीतोऽभिमन्योर्वधात् ॥ २ ॥

सर्वथा दैव नः स्वस्ति [1]करिष्यति । [2]तद्यावदत्रस्था देवी महाराजस्य निवेदयामि । (इति निष्क्रान्ता ।)

विष्कम्भकः ।

(तत प्रविश्यासनस्था देवी भानुमती सखी चेटी च ।)

सखी—सहि भाणुमदि, कीस दाणिं तुम सिविणअदसणमेत्तस्स द अहिमाणिणो महाराअदुज्जोहणस्स महिसी भविअ एव्व विअलिअधीरभावा अतिमेत्त सतप्पसि । (क)

चेटी—भट्टिणि, सोहण भणादि सुवअणं[3] । सॅविणअन्तो जणो किं ण क्खु प्पलवदि । (ख)

(क) सखि भानुमति, कस्मादिदानीं त्व स्वप्नदर्शनमात्रस्य कृतेऽभिमानिनो महाराजदुर्योधनस्य महिषी भूत्वैव विगलितधीरभावातिमात्रं सतप्यसे ।

(ख) भट्टिनि, शोभन भणति सुवदना । स्वपन्जन. किं न खलु प्रलपति ।

कृति. चौर. शत्रुसितस्यास्य तापाय तापार्थम् । तादर्थ्ये चतुर्थी । कीदृश । क्षत्रग्रहणादारभ्य सफलपरशोर्मुने परशुरामस्यापि जेता । यदयमभिमन्योर्वधात्प्रीत । कीदृशस्य । महारथविजयश्रान्तस्यैकस्य शत्रुच्छिन्नकोदण्डस्य च । एकाकीति । 'एकादाकिनिच्चासहाये' इत्याकिनिच्प्रत्यय ॥ २ ॥ 'दैव दिष्ट भाग्येयम्' इत्यमर. । स्वस्ति कल्याणम् । नोऽस्माकम् ॥ विष्कम्भक इति । 'कृतोऽपि स्वेच्छया कृतो बालस्तेनोभयोरपि । विष्कम्भकः स निर्देशः प्रवेशार्थसूचकः ॥' इति भरत ॥ सखि भानुमति, किमितीदानीं त्व स्वप्नमात्रस्य कृतेऽभिमानिनो महाराजदुर्योधनस्य महिषी भूत्वा विगलितधीरतातिमात्र सतप्यसे । अत्र 'कृताभिषेका महिषी' इत्यमर ॥ शोभनं वदतीति सुवदना । स्वपन्खलु जनो यत्किमपि विप्रलपति । अत्र खलु प्रसिद्धौ । विप्र-

---

१. 'करिष्यतीति' इति क्वचित्पाठ २. 'तद्यावदत्रभवत्या देवी भानुमतीं निवेदयामि महाराजस्य' इति क्वचित्पाठ . ३ एवदनन्तरम् 'भानुमती—एव्व एणेदं' इति क्वचित्पाठ . ४ 'सिविणअन्तो जणो ण हु किं वि ण प्पलवदि', अथवा 'सिविणअन्तो जणो ण हु किं किं ण प्पलवदि', अथवा 'सिविणअन्तो जणो किं किं ण प्पलवदि', अथवा 'सिविणिअन्तो जणो ण किं प्पलवदि' इति पाठान्तरम् .

भानुमती—हञ्जे, एव्व णेद । किणुं[1] एद सिविणअ अदिमेत्त अकुसलदसण मे पडिभादि । (क)

सखी—जइ[2] एव्व ता कहेदु पिअसही । जेण अह्मे वि पडिट्ठावअन्तीओ प्पससाए[3] देवदासकित्तणेण अ पडिहडिस्सामो । (ख)

चेटी—देवि[4], णेद । अकुसलदसणा[5] वि सिविणआ[6] पसंसाए[7] कुसलपरिणामा होन्ति त्ति सुणीअदि । (ग)

भानुमती—जइ[8] एव्व ता कहइस्सम् । अवहिदा[9] होध । (घ)

(क) हञ्जे, एवमेतत् । किन्वय स्वप्नोऽतिमात्रमकुशलदर्शनो मे प्रतिभाति ।

(ख) यद्येव तत्कथयतु प्रियसखी । येनावामपि प्रतिष्ठापयन्त्यौ प्रशसया देवतासकीर्तनेन च परिहरिष्याव. ।

(ग) देवि, एवमेतत् । अकुशलदर्शना अपि स्वप्ना प्रशसया कुशलपरिणामा भवन्तीति श्रूयते ।

(घ) यद्येव तत्कथयिष्ये । अवहिते भवतम् ।

लपति विसवादि वचो वदति ॥ सखि, एवमेतत् । कित्वेष मे स्वप्नोऽतिमात्रम कुशलदर्शन' प्रतिभासते ॥ यद्येव तत्कथयतु प्रियसखी । येन मया प्रतिष्ठा पयन्त्या प्रशसया देवतासकीर्तनेन च परिहरिष्यते । अत्र प्रतिष्ठापयन्त्या स्वप्न शुभार्थक कुर्वत्येत्यर्थ ॥ देवि, एवमेतत् । अकुशलदर्शना अपि स्वप्ना प्रशसया कुशलपरिणामा भवन्तीति श्रूयते यद्येव तत्कथयिष्ये । अवहिते भवतम् ॥ कथयतु प्रियसखी ॥ मुहूर्त तिष्ठ तावद्यावत्सर्व स्मरिष्या-

---

१ 'किं उण एद मे अकुसलदसण पडिभादि सिविणअ', अथवा 'मम उण अकुसलदसण पडिभादि सिविणअ', अथवा 'किं उण एद अकुसल पडिभादि सिविणअ' इति नानापुस्तकेषु नानाविध पाठ २ 'पिअसहि, जइ एव्व ता कहेहि सिविणअं । ज अह्मे वि पडिस्सावअन्तीओ धम्मप्पससाए देवदासकित्तणेण दुव्वादिपडिग्गहेण अपडिहडिस्सामो' इति पाठ'. ३ 'देवि, एव्व णेद' इत्यत्र 'भट्टिणि, सोहण क्खु भणादि सुवअणा', अथवा 'सोहण क्खु भणादि सुवअणा' इति पाठान्तरम् ४ 'वि' इति क्वचिन्नास्ति ५ 'देवदाण पससाए' इति बहुपुस्तकाना पाठ ६. 'जइ एव्व ता' इत्यत्र 'हला देण हि' इति क्वचित्पाठ· ७ 'अवहिदा दाव होहि' इति बहुपुस्तकाना पाठ.

[1]सखी—कहेदु भट्टिणि (क)

भानुमती—मुहुत्तअ चिट्ठ जाव सव्व सुमरिस्सम् । (इति चिन्ता नाटयति ।) (ख)

(तत प्रविशति दुर्योधन कञ्चुकी च ।)

दुर्योधनः—सूक्तमिद [2]कैस्यचित् ।

गुप्त्या साक्षान्महानल्प स्वयमन्येन वा कृत ।
करोति महती प्रीतिमपकारोऽर्पकारिणाम् ॥ ३ ॥

येनाद्य द्रोणकर्णजयद्रथादिभिर्हतमभिमन्युमुपश्रुत्य समुच्छ्वसितमिव [5]नश्चेतसा ।

कञ्चुकी—देव, [6]नैवमतिदुष्करमाचार्यस्य शस्त्रप्रभावात् । कर्णजयद्रथयोर्वा का [7]नामात्र श्लाघा ।

राजा—विनयधर, किमाह [8]भवान् । [9]एको बहुभिर्बालो लूनशरासनश्च निहत इत्यत्र का श्लाघा कुरुपुङ्गवानाम् । तदत्र न खलु कश्चिद्दोष । मूढ, पश्य ।

(क) कथयतु भट्टिनी ।

(ख) मुहूर्तं तिष्ठ यावत्सर्वं स्मरिष्यामि ।

मि ॥ सूक्त शोभनोक्ति । **गुप्त्येति** । अपकारिणा शत्रूणामपकारो गुप्त्या निभृत साक्षात्सर्ववेद्यो महान्स्वल्पो वा स्वय वान्येन वा कृतो महतीं प्रीतिं करोतीत्यन्वय ॥ ३ ॥ का नाम, अपि तु न कापि । नामानवक्लृप्तौ । लूनशरा-

---

१ 'सखी—अवहिदह्मि । कहेदु पिअसही ।' इति बहुपुस्तकाना पाठ २ एतदनन्तर केषुचित्पुस्तकेषु 'भानुमती—अज्ज किल मे पमदवणे आसीणाए अग्गदो केण वि अदिसइदद्विव्वरूवेण णउलेण अहिसद वावादिदम् । उमे—(अवधार्यात्मगतम् ।)सन्त पाव सन्त पावम् । पडिहदममङ्गलम् । (प्रकाशम् ।) देवि,तदो तदो । भानुमती—हला, भणण विसुमरिदह्मि । ता चिट्ठ जाव सव्व सुमरिअ कहइस्सम् । (इति चिन्ता नाटयति ।)'इति पाठो वर्तते, क्वचित्तु 'भानुमती—हला,भणण विसुमरिदह्मि । ता चिट्ठ जाव सव्व सुमरिअ कहइस्सम् । (इति चिन्ता नाटयति ।)' इति पाठ समुपलभ्यते. ३ 'कस्यापि' ४ 'अपकारिषु' ५ 'उच्छ्वसितमिव' ६ 'नेदमतिदुष्करमाचार्यशस्त्रप्रभावाणाम्', 'नेदमतिदुष्करमाचार्यस्यास्त्रप्रभावेण' ७ 'नाम' इति क्वचिन्नास्ति ८ 'भगवान्' ९ 'एकाकी बहुभिर्बालो लूनशरासनश्च निहत इति । पश्य' इति पाठ.

हते जरति गाङ्गेये पुरस्कृत्य शिखण्डिनम् ।
या श्लाघा पाण्डुपुत्राणा सैवास्माक भविष्यति ॥ ४ ॥

कञ्चुकी—(सवैलक्ष्यम् ।) देव[1], न ममाय सकल्प. । किं[2] तु वं[3] पौरुषप्रतीघातोऽस्माभिरनालोचितपूर्व इत्यतं एव विज्ञापयामि ।

राजा—एवमिदम्[4] ।

सहभृत्यगणं सबान्धव सहमित्र ससुंत सहानुजम् ।
स्वबलेन निहन्ति सयुगे नचिरात्पाण्डुसुत सुयोधनम् ॥ ५ ॥

कञ्चुकी—(कर्णौ पिधाय । सभयम् ।) शान्तं पापम्[5] । प्रतिहतमम-ङ्गलम् ।

राजा—विनयंधर, किं मयोक्तम् ।

कञ्चुकी—

सहभृत्यगणं[6] सबान्धवं सहमित्र ससुंत सहानुजम् ।
स्वबलेन निहन्ति[7] सयुगे नचिरात्पाण्डुसुत सुयोधन[8] ॥ ६ ॥

एतद्विपरीतमभिहित देवेन ।

राजा—विनयधर, अद्य खलु भानुमती यथापूर्वं मामनामन्त्र्य वासभवनात्प्रातरेव निष्क्रान्तेति व्याक्षिप्त[9] मे मन[10]. । तदादेशय तमु-द्देशं यत्रस्था भानुमती[11] ।

कञ्चुकी—इत[12] इतो देव[13] ।

सनश्छिन्नधनु ॥ हत इति । जरति वृद्धे । गाङ्गेये गङ्गापुत्रे भीष्मे । शिखण्डी क्लीबरूपो योधभेद । त पुरस्कृत्याग्रेकृत्य गाङ्गेये हते सतीत्यन्वय ॥ ४ ॥ स कल्प इच्छा । वो युष्माकम् । सहभृत्येति । सहभृत्यगणमित्यादौ सभावो वैक-ल्पिक । नचिरादित्यत्राचिरादित्यर्थ । नशब्द एवाय न तु नञ्समास ॥ ५ ॥ पठति । 'नचिरात्पाण्डुसुतं सुयोधन' इत्याकारेण ॥ ६ ॥ व्याक्षिप्त चपलम् ॥ इत इत ।

---

१ 'देव, नैवेदं कल्पयितुमर्हसि' इति पाठ २ 'यत' ३. 'तव' ४. 'साव-लोकितपूर्व', 'सावलोकितपूर्व' ५ 'यत एव ब्रवीमि' इति कोचित्पाठ: ६ 'एवमेवैतत्', 'एवमेतत्' ७ 'सबलम्' ८ 'शान्तं पापं शान्तं पापम्' इति कोचित्पाठ: ९ 'आत्मानम्'. १० 'आक्षिप्तम्', 'आक्षिप्तमिव' ११ 'चेत', १२ 'इत इत इतु देव', 'इतं एतु देव:'.

(उभौ परिक्रामत ।)

कञ्चुकी—(पुरोऽवलोक्य । समन्ततो गन्धमाघ्राय ।) देव, पश्य पश्य । एतत्तुहिनकणशिशिरसमीरणोद्वेल्लितवृन्तबन्धुरशेफालिकाविरचितकुसुमप्रकरमीषदालोहितमुग्धवधूकपोलपाण्डुफलिनीविजितश्यामलतासौभाग्यमुन्मीलितबहुलकुन्दकुसुमसुरभिशीतल प्रभातकालरमणीयमग्रतस्ते बालोद्यानम् । तदवलोकयतु देवः । तथाहि ।

प्रालेयमिश्रमकरन्दकरालकोशै
पुष्पैः समं निपतिता रजनीप्रबुद्धैः ।
अर्काशुभिन्नमुकुलोदरसान्द्रगन्ध-
सम्मूर्च्छितानि कमलान्यलयः पतन्ति ॥ ७ ॥

राजा—(समन्तादवलोक्य ।) विनयधर, इदमपरमुष्मिन्नुषसि रमणीयतरम् । पश्य ।

जृम्भारम्भप्रविततदलोपान्तजालप्रविष्टै-
र्भाभिर्भानोर्नृपतय इव स्पृश्यमाना विबुद्धाः ।

गम्यतामिति शेषः ॥ तुहिन हिमम् । शिशिर शीतलम् । उद्वेल्लित चपलीकृतम् । वृन्त प्रसवबन्धनम् । बन्धुरं निम्नोन्नतम् । शेफालिका पुष्पभेदः । 'शेफालिका तु सुवहा निर्गुण्डी नीलिकापि सा' इत्यमरः । 'स्त्रियां तु फलिनी फली' इत्यमरः । श्यामलता 'सर्तुल' इति प्रसिद्धा । **प्रालेयेति** । प्रालेय हिमम् । मकरन्दः पुष्परसः । 'करालौ दन्तुरे तुङ्गे' इत्यमरः । कोशौ मध्यम् । मुकुलं कलिका । अलयो भ्रमराः । कमलानि पतन्ति गच्छन्ति ॥ ७ ॥ उषसि प्रभाते । **जृम्भेति** । जृम्भारम्भो विकासारम्भः इत्यर्थः । दलोपान्तः पत्रसमीपम् । तदेव जालमानायो गवाक्षो वा । भातीति भाः । 'अन्येभ्योऽपि दृश्यते' इति क्विप् । 'पुलिङ्गोऽप्ययम्' इत्यमरटीकायां श्रीकरः । यद्वा । 'भाभिरिति पक्षे पुलिङ्गोऽप्यय भास्शब्दः' । 'प्रभायामपि भा शब्दः सान्त पुलिङ्ग एव च' इति शब्दभेदादित्यवधेयमिह

---

१ 'समीरणोद्वेल्लितबन्धनच्युतशेफालिका—' २ 'प्राकारम्' ३ 'कपोलपाटललोध्रप्रसूनविजित—' ४ 'वितर्तः' ५ 'बकुल' ६ 'कन्दकुसुमसुरभिशीतलम्', 'कन्दलसमशीतलपरिमलम्' ७ 'रजनीविबुद्धैः' ८ 'प्रयान्ति' ९ 'समन्तादवलोक्य' इति कचित्पाठः १० 'रमणीयतरमवलोकय', 'रमणीयतरमवलोक्यते' ११ 'हस्तैर्भानोः', 'भानोरसौ'

स्त्रीभि सार्धं घनपरिमलस्तोकलक्ष्याङ्गरागा
मुञ्चन्त्येते विकचनलिनीगर्भशय्या द्विरेफा[1] ॥ ८ ॥

कञ्चुकी—देव[2], नन्वेषा भानुमती सुवदनया तरलिकया च सहोपविष्टा तिष्ठति[3]। तदुपसर्पतु देव[4]।

राजा—(दृष्ट्वा।) आर्य विनयधर, गच्छ त्व साङ्ग्रामिकं मे रथमुपकल्पयितुम्। अहमप्येषं[5] देवी दृष्ट्वानुपदमागत एव।

कञ्चुकी—एँष[6] कृतो देवादेश। (इति निष्क्रान्त।)

सखी—पिअसहि, अवि सुमरिद तुए। (क)

भानुमती[7]—सहि, सुमरिदम्। अज्ज किल पमदवणे आसीणाए ममअग्गदो[8] एव्व दिव्वरूविणा णउलेन अहिसद वावादिदम्। (ख)

उभे—(अपवार्य आत्मगतम्।) सन्त[9] पावम्। पडिहद अमङ्गलम्। (प्रकाशम्।) तदो तदो। (ग)

(क) प्रियसखि, अपि स्मृत त्वया।

(ख) सखि, स्मृतम्। अद्य किल प्रमदवन आसीनाया ममाग्रत एव दिव्यरूपिणा नकुलेनाहिशत व्यापादितम्।

(ग) शान्त पापम्। प्रतिहतममङ्गलम्। ततस्तत.।

सहृदयेन। भानोर्भासिस्तेजोभि स्पृश्यमाना इति सबन्ध। 'गन्धमात्रे परिमलो विमर्दोत्थेऽपि दृश्यते' इति धरणि। स्तोकमल्पम्। द्विरेफो भ्रमर। नृपतिपक्षेऽपि सर्वं योज्यम् ॥ ८ ॥ साङ्ग्रामिक युद्धे साधु ॥ सखि, स्मृत त्वया ॥ सखि, स्मृतम्। अद्य किल प्रमदवन आसीनाया ममाग्रत एव दिव्यरूपिणा नकुलेनाहिशत व्यापादितम्। अत्र किल निश्चये। दिव्यरूपिणा सुन्दरेण। नकुलो 'नेउर' इति प्रसिद्धजन्तु पाण्डवश्च। अहिशत सर्पशतम्। अथ च शत्रुशतम्॥ अपवार्य। शान्त पापम्। प्रतिहतममङ्गलम्। अत्रापवार्य निभृतम्। प्रका-

---

१ 'महाराज, एषा देवी सुवदनातरलिकाभ्या सह सुखोपविष्टा तिष्ठति' इति कचित्पाठ २ 'पर्युपास्यमाना' ३ 'एष' इति पुस्तकान्तरे नास्ति ४ 'यथाज्ञापयति देव' इति पाठ ५ 'भानुमती—सहि, सुमरिदम्। सखी—कहेदु पिअसही। भानुमती—अज्ज किल' इति पुस्तकान्तरे पाठ ६ 'अग्गदो केणवि अदिसइद्-दिव्वरूवेण' इति पाठ ७ 'सन्त पाव सन्तं पाव' इति पाठ.

भानुमती—अदिसदावोविग्गहिअआए[1] विसुमरिदं मए । ता पुणोवि सुमरिअ कहइस्सम् । (क)

राजा—अहो,[2] देवी भानुमती तरलिकया सह किमपि मन्त्रयमाणा तिष्ठति । भवतु । अनेन लताजालेनान्तरित शृणोमि तावदस्मि विश्रब्धालापम् । (तथा स्थित ।)[3]

सखी[4]—सहि, अल सदावेण । कहेदु पिअसही । (ख)

राजा—किं नु खल्वस्या[5] सतापकारणम् । अथवानामन्त्र्य मामियमद्य वासभवनान्निष्क्रान्तेति समर्थित एवास्या मया[6] कोप । अयि भानुमति, अविषयः खलु दुर्योधनो भवत्या[7] कोपस्य[8] ।

किं कण्ठे शिथिलीकृतो भुजलतापाश प्रमादान्मया
निद्राच्छेदविवर्तनेष्वभिमुख[9] नाद्यासि सभाविता ।
अन्यस्त्रीजनसकथालघुरह स्वप्ने त्वया लक्षितो
दोष पश्यसि किं प्रिये परिजनोपालम्भयोग्ये मयि ॥ ९ ॥

(विचिन्त्य ।) अथवा ।

(क) अतिसतापोद्विग्नहृदयया विस्मृत मया । तत्पुनरपि स्मृत्वा कथयिष्ये ।
(ख) सखि, अल सतापेन । कथयतु प्रियसखी ।

शमिति । 'यत्तु सर्वजनश्राव्य प्रकाश तन्निगद्यते' इति भरत- । ततस्ततः ॥ अतिसतापोद्विग्नहृदयया विस्मृत मया । तत्पुनरपि स्मृत्वा कथयिष्ये ॥ मन्त्रयमाणा मन्त्र कुर्वती ॥ सखि, अल सतापेन । कथयतु प्रियसखी ॥ **किं कण्ठ इति** । निद्रायाश्छेदोऽवसान तत्र विवर्तन पार्श्वपरिवर्तनम् । सभाविता समुखीकृता । सकथालाप । उपालम्भो विसवाद ॥ ९ ॥

---

१ 'सदावावगहीदहिअआए पुणोवि मए विसुमरिदम्' इति बहुपुस्तकाना पाठ २ 'राजा—(अवलोक्य ।) अहो' इति क्वचित्पाठ ३ 'इति तथा स्थित', 'इति तथा कृत्वा स्थित' ४ 'सखी—अल सदावेण । कहेदु पिअसही', 'उभे—सहि अल सदावेण । कहेदु पिअसही', 'सखी—अइ, अल सदावेण । कहेदु पिअसही' इति नानाविध पाठ ५ 'मयि' ६ 'कोपस्य' इत्यसादनन्तर 'पश्य' इति क्वचिदधिक पाठ ७ 'अभिमुखी'

इयमस्मदुपाश्रयैकचित्ता
मनसा प्रेमनिबद्धमत्सरेण ।
नियत कुपितातिवल्लभत्वा-
त्स्वयमुत्प्रेक्ष्य ममापराधलेशम् ॥ १० ॥

[1]तथापि शृणुमस्तावत्किं नु वक्ष्यतीति ।

[2]**भानुमती**—तदो अहं तस्स अदिसइददिव्वरूविणो णउलस्स दसणेण उच्छुआ जादा हिदहिअआ अ । तदो उज्झिअ त आसणट्ठाण लदामण्डव पविसिदु आरद्धा । (क)

[3]**राजा**—(सवैलक्ष्यम् ।) किं नामातिशयितदिव्यरूपिणो नकुलस्य दर्शनेनोत्सुका जाता हृतहृदया च । तत्किमनया पापया माद्रीसुतानुरक्तया वयमेव विप्रलब्धा. । (सोत्प्रेक्षम् 'इयमस्मद्–' (२।१०)इति पठित्वा ।) मूढ दुर्योधन, कुलटाविप्रलभ्यमानमात्मान बहु मन्यमानोऽधुना किं[4] वक्ष्यसि । (किं[5]कण्ठे–(२।९)इत्यादि पठित्वा । दिशोऽवलोक्य ।) अहो, एतदर्थमेवास्मा प्रातरेव विविक्तस्थानाभिलाष सखीजनैसकथासु च पक्षपातः । दुर्यो-

(क) ततोऽहं तस्यातिशयितदिव्यरूपिणो नकुलस्य दर्शनेनोत्सुका जाता हृतहृदया च । तत उज्झित्वा तदासनस्थान लतामण्डप प्रवेष्टुमारब्धा ।

इयमिति । अपाश्रय सश्रय । तद्गतेति यावत् । मनसा करणभूतेनास्मदुपाश्रयैकचित्तेत्यन्वय । निबद्ध निरस्तम् । 'मात्सर्यमपि मत्सर ' इत्यमर ॥१०॥ ततोऽहं तस्यातिशयदिव्यरूपिणो नकुलस्य दर्शनेनोत्सुका जाता हृतहृदया च । तत उज्झित्वा तदासनस्थान लतामण्डप प्रवेष्टुमारब्धा ॥ माद्रीसुतो नकुल । 'विप्रलम्भो विप्रवाद ' इत्यमर. । 'कुलटा बन्धकीस्त्री' इत्यमर । 'विविक्तौ पूतविजनौ' इत्यमर. ।

१ 'तथापि किं वक्ष्यतीति शृणुमस्तावत्' इति क्वचित्पाठ २ 'भानुमती—हला, अहं तदो तस्स अदिसइददिव्वरूविणो णउलस्स दसणेण उच्छुआ जादा । ३ 'राजा—किं नाम' इति बहुपुस्तकाना पाठ । 'राजा—किं नामातिशयितदिव्यरूपिणो नकुलस्य दर्शनेनोत्सुका जाता । तत्किमनया माद्रीसुतानुरक्तया' इति कुत्रचित्पाठ. ४ 'किं न वक्ष्यसि', 'किं किं न वक्ष्यसि' ५ '(किं कण्ठे–' इत्यादि पठित्वा । दिशोऽवलोक्य ।)' इति केषुचित्पुस्तकेषु नास्ति ६ 'कथासु',

द्वितीयोऽङ्कः ।

(स्तु मोहादविज्ञातबन्धकीहृदयसार कापि परिभ्रान्तः । आ पापे मत्परिग्रहपासुले

तद्धीरुत्व तव मम पुर साहसानीदृशानि
श्लाघा सासद्वपुषि विनयव्युत्क्रमेऽप्येष राग. ।
तच्चौदार्य मयि जडमतौ चापले कोऽपि पन्था
ख्याते तस्मिन्वितमसि कुले जन्म कौलीनमेतत् ॥

सखी—तदो तदो । (क)

भानुमती—तदो सोवि म अणुसरन्तो एव्व लदामण्डव पविट्ठो । (ख)

राजा—अहो, कुलटोचितमस्या पापाया अशालीनत्वम् ।

यस्मिंश्चिरप्रणयनिर्भरबद्धभाव-
मावेदितो रहसि मत्सुरतोपभोग. ।
तत्रैव दुश्चरितमद्य निवेदयन्ती
व्रीणासि पापहृदये न सखीजनेऽस्मिन् ॥ १२ ॥

उभे—तदो तदो । (ग)

(क) ततस्तत ।

(ख) तत सोऽपि मामनुसरन्नेव लतामण्डप प्रविष्ट ।

(ग) ततस्तत. ।

बन्धकी वेश्या । सार स्थैर्यम् । परिग्रहोऽत्र कलत्रम् । तत्र पांशुलासती । तद्धीरुत्वमिति । ईदृशानि परपुरुषगमनरूपाणि । व्युत्क्रमोऽविनय । रागोऽनुराग । चापले चाञ्चल्ये । तत्र कोऽपि पन्था किमपि वर्त्म । सर्वत्र तवेत्यन्वय । कौलीनमपवाद । 'कौलीन पशुभिर्युद्धे कुलीनत्वापवादयो' इति विश्व ॥ ११ ॥ तत सोऽपि मामनुरुध्यमानस्तमेव लतामण्डप प्रविष्ट ॥ अशालीनत्व निर्लज्जता । यस्मिन्निति । 'प्रणय प्रेम्णि विश्वासे' इति विश्व । इद क्रियाविशेषणम् । भावोऽभिप्राय रहस्येकान्ते । व्रीणा लज्जावती ॥ १२ ॥ ततस्तेन सप्रगल्भप्रसा-

---

१ 'असत्परिग्रहपासुले', 'मत्परिग्रहपांसनि' २ 'जन्म लोकापवादः' इति क्वचित्पाठ ३ 'तदो सोवि' इत्यस्मात्पूर्वं केषुचित्पुस्तकेषु 'तदोहं तुवरिद आसणट्ठाण एदं लदामण्डव पविट्ठा' इत्यधिक पाठो वर्त्तते ४ 'एतस्याः' ५ 'पापशीलाया' ६ 'पापशीलत्वम्', 'दु शीलत्वम्' ७ 'कौलभावम्' ८ 'व्रीतासि'

भानुमती—तदो तेण सप्पगब्भपसारिअकरेण अवहिद मे त्थणसुअम् ।

राजा—(सक्रोधम् ।) अलमिदानीमत परमाकर्णनेन । भवतु तावत्तस्य परवनितावस्कन्दनप्रगल्भस्य माद्रीसुतहृतकस्य जीवितम हरामि । (किंचिद्गत्वा । विचिन्त्य ।) अथवा इयमेव तावत्पापशील प्रथममनुशासनीया । (इति निवर्तते ।)

उभे—तदो तदो (ख)

भानुमती—तदो अज्जउत्तस्स पभादमङ्गलतूरवमिस्सेण विलासिणीजणसगीदरवेण पडिबोधिदम्हि । (ग)

राजा—(सवितर्कम् ।) किं नाम प्रतिबोधितास्मीति स्वप्नदर्शनमनया वर्णित भवेत् । अथवा सखीवचनादेव व्यक्तिर्भविष्यति ।

(उभे सविषादमन्योन्य पश्यत ।)

सुवदना—ज एत्थ अच्चाहिद त भाईरहीप्पमुहाण णईण

(क) ततस्तेन सप्रगल्भप्रसारितकरेणापहृत मे स्तनाशुकम् ।

(ख) ततस्तत. ।

(ग) तत आर्यपुत्रस्य प्रभातमङ्गलतूर्यरवमिश्रेण वारविलासिनीजनसगीतरवेण प्रतिबोधितास्मि ।

रितकरेण सर्पगर्भप्रसारितकरेण वापहृत मे स्तनाशुकम् ॥ अवस्कन्द आस्कन्द । जीवित जीवनम् ॥ तत आर्यपुत्रस्य प्रभातमङ्गलतूर्यरवमिश्रेण वारविलासिनीजनसगीतरवेण प्रतिबुद्धास्मि । सखि सुवदने, कथय किमत्र प्रशस्त किं वाशुभसूचकमिति । अत्र 'आर्यपुत्रेति सबोध्य पति पत्नीजनेन तु' इति भरत । वारविलासिनी वेश्या ॥यदिहात्याहित तद्भागीरथीप्रमुखाना नदीना जलेनापहियताम् । ब्राह्म-

---

१ 'सगव्व पसारिअकरेण अवहरिअ' २ 'राजा—(विचिन्त्य ।) सप्रगल्भप्रसारितकरेणापहृत मे स्तनाशुकम् । (सक्रोधम् ।) अल—', अथवा 'राजा—(विचिन्त्य सगर्वम् ।) प्रसारितकरेणापहृत मे स्तनाशुकम्' । (सक्रोधम् ।) अल—'इति क्वचिद्धधिक पाठ ३ 'अलमत परं श्रुत्वा इति क्वचित्पाठ ४ 'हला, तदो अहं अज्जउत्तस्स' ५ 'वारविलासिणीसगीदसद्देण' ६ 'सवितर्कम्' इति क्वचिन्नास्ति ७ 'किं नु खलु', 'किं नाम खलु' ८ 'भवेद्' इत्यसादनन्तरं '(विचिन्त्य ।) भवतु । सखीवचनाद्व्यक्तिर्भविष्यति' इति बहुपुस्तकाना पाठ ९ 'किं वि'

सलिलेण अवहारीअदु । [1]बम्हणाण हुदाहुदिसुअन्धिणा जलणेण अवहारीअदु । (क)

राजा—अल विकल्पेन । स्वप्नदर्शनमेवैतदनया वर्णितम् मया पुनर्मन्दधियाऽन्यथैव सभावितम्[2] ।

दिष्ट्यार्धश्रुतविप्रलम्भजनितक्रोधादह[3] नो गतो
दिष्ट्या नो परुष रुषार्धकथने किंचिन्मया व्याहृतम् ।
मा प्रत्ययितु[4] विमूढहृदय दिष्ट्या कथान्त गता
मिथ्यादूषितयानया विरहित दिष्ट्या न जात जगत् ॥ १३ ॥

भानुमती—हला[5], कहेहि किं एत्थ पसत्थ किं वा असुहसूअअ त्ति । (ख)

सखी चेटी च—(अन्योन्यमवलोक्य । अपवार्य ।) एत्थ णत्थित्थोअ वि सुहसूअअम् । [6]तदो अलीअ कधअन्ती पिअसहीए अवराहिणी भविस्सम् । सो [7]दाणी सिणिद्धो जणो जो पुच्छिदो परुस वि हिदं

(क) यदिहात्याहित तद्भागीरथीप्रमुखाना नदीना सलिलेनापह्रियताम् । ब्राह्मणाना हुताहुतिसुगन्धिना ज्वलनेनापह्रियताम् ।

(ख) हला, कथय किमत्र प्रशस्त कि वाशुभसूचकमिति ।

णाना हुताहुतिसुरभिगन्धिना ज्वलनेनापह्रियताम् । अत्र अत्याहितमप्रशस्तम् ॥ **दिष्ट्येति** । दिष्ट्या हर्षेण । नो निषेधे । 'अमानोना निषेधवचना' इति कोषात् । प्रत्याययितु बोधयितुम् । अन्त गता समाप्ता ॥ १३ ॥ सखि, कथय किमत्र प्रशस्त कि वाशुभसूचकमिति ॥ नास्त्यत्र श्लोकमपि शुभसूचकम् । तथाप्युपदेशलो वर्थं प्रतिष्ठामहे । तत्तोऽलीक मन्त्रयन्त्य प्रियसख्या अपराधिन्यो भविष्याम । स इदानीं स्निग्धो जनो य पृष्ट सन्परुषमपि हित भणति । सर्वमे-

१ 'भअवदाण ब्राह्मणाण वि आसीमाए आहुदिहुदेण पज्जलिदेण भअवदा हुदासणेण अ अस्सदु' इति बहुषु पुस्तकेषु पाठ , कुत्रचित् 'अ णस्सुदु' इत्यत्र 'अन्तरीअदु' इति पाठो वर्तते २ 'एतदनन्तर 'सवैलक्ष्यहर्षम् ।' इति क्वचित्कविवचन दृश्यते ३. 'वचनक्रोधात्' ४ 'प्रत्यापयितुम्' ५ 'हला, कहेहि किं एत्थ सुहसूअअ' इति बहुपुस्तकाना पाठ ६ 'जइ एत्थ अलीअ कहइस्स ता अवराहिणी भविस्सम्' इति बहुपुस्तकाना पाठ ७ 'एव्व'

णादि। (प्रकाशम्) सहि, सव्व एव्व एद असुहणिवेदणम्। ता देवदाण पणामेण दुजादिजणपडिग्गहेण अ अन्तरीअदु। णहु दाढिणो णउलस्स वा दसण अहिसदवह अ सिविणए पससन्ति विअक्खणाओ। (क)

राजा—अवितथमाह सुवदना। नकुलेन पन्नगशतवध स्तना-शुकापहरण च नियतमनिष्टोदर्कं तर्कयामि।

पर्यायेण हि दृश्यन्ते स्वप्ना काम शुभाशुभा।
शतसख्या पुनरिय सानुज स्पृशतीव माम्॥ १४॥

(वामाक्षिस्पन्दन सूचयित्वा।) अहो ममापि नाम दुर्योधनस्यानिमित्तानि हृदयक्षोभमावेदयन्ति। (सावष्टम्भम्।) अथवा भीरुजनहृदय-प्रकम्पनेषु का गणना दुर्योधनस्यैवविधेषु। गीतश्चायमर्थोऽङ्गिरसा।

ग्रहाणा चरित स्वप्नोऽनिमित्तौत्पातिक तथा।
फलन्ति काकतालीय तेभ्य. प्राज्ञा न बिभ्यति॥ १५॥

(क) अत्र नास्ति श्लोकमपि शुभसूचकम्। ततोऽलीक कथयन्ती प्रिय-सख्या अपराधिनी भविष्यामि। स इदानीं स्निग्धो जनो य. पृष्ट परुषमपि हित भणति। सखि, सर्वमेवैतदशुभनिवेदनम्। तद्देवताना प्रणामेन द्विजा-तिजनप्रतिग्रहेण चान्तर्यताम्। न खलु दष्ट्रिणो नकुलस्य वा दर्शनमहिश ं ५व च स्वप्ने प्रशसन्ति विचक्षणा।

वैतदत्यद्भुतनिवेदनम्। तथाप्यत्र यत्किमप्यत्याहित तद्देवताना प्रणामेन द्विजा-तिजनप्रतिग्रहेण चान्तरीक्रियताम्। न पुनर्दष्ट्रिणो नकुलस्य वा दर्शनमहिशत-व्यापादन च स्वप्ने प्रशसन्ति विचक्षणा। अत्र परुष निष्ठुरम्। अन्तरीक्रियता शाम्यताम्। इहाशीरलकार। यदुक्त तत्रैव—'आशीरिष्टार्थशसनम्' इति। विच-क्षणा पण्डिता॥ अवितथ सत्यम्। पन्नग सर्प। उदर्क उत्तरविशुद्धि। **पर्या-येणेति**। 'अकामानुमतौ काममम्' इत्यमर। इय शतसख्या पुनर्मां स्पृशतीत्यन्वय॥१४॥ आवहन्तीत्यत्र रूढिच्युतकदोषो नास्ति। विशेषगुणेषूद्भूतत्वादित्यवधेयम्। **ग्रहाणामिति**। सूर्यादिदशा स्वप्नोऽनिमित्तमकस्मादौत्पातिकमुत्पातवातादि-

---

१ 'दुव्वादिपडिग्गहेण' २ 'णउलस्स अण्णस्स वा' इति क्वचित्पाठ ३ 'वि' ४ 'स्तनाशुकाहरणमिति', 'स्तनाशुकाहरण च' ५ 'अरिष्टोदर्कमस्माक तर्कयामि' इति क्वचित्पाठ ६ 'आ कथ' ७ 'आवहन्ति' ८ 'कम्पनेषु' ९ 'एवविधेषु कम्पलेषु' इति क्वचित्पाठ १० 'निमित्तान्यौपपातिका', 'अनिमित्तान्युपयाचितम्', 'अनिमित्तोत्पादकम्'

तद्भानुमत्या· स्वीस्वभावसुलभामलीकाशङ्कामपनयामि ।

भानुमती—हला सुवअणे, पेक्ख[1] दाव उदअगिरिसिहरे[2]न्तरवि-मुक्करहवरो विअलन्तसङ्झाराअप्पसण्णदुरालोअमण्डलो[3] जादो भअव दिवहणाहो[4] । (क)

सखी—सहि, रोसाणिदकणअपत्तसरिसेण[5] लदाजालन्तरापडिद-किरणणिवहेण पिञ्जरिदोज्जाणभूमिभाओ[6] पूरिदपडिण्णो[7] विअ रिउ-पेक्खणिज्जो[8] जादो[9] भअव सहस्सकिरणो[10] । ता समओ दे कुसुम-चन्दणगब्भेण अग्घेण पज्जुवट्ठादुम्[11] । (ख)

(क) हला सुवदने, पश्य तावदुदयगिरिशिखरान्तरविमुक्तरथवरो विगलत्सध्यारागप्रसन्नदुरालोकमण्डलो जातो भगवान्दिवसनाथ ।

(ख) सखि, रोसानितकनकपत्रसदृशेन लताजालान्तरापतितकिरणनिवहेन पिञ्जरितोद्यानभूमिभाग पूरितप्रतिज्ञ इव रिपुदु प्रेक्षणीयो जातो भगवान्सहस्रकिरण । तत्समयस्ते कुसुमचन्दनगर्भेणार्घेण पर्युपस्थातुम् ।

कमेते काकतालीयमतर्कितोपनत यथा स्यादेव फलन्ति । अतस्तेभ्य प्राज्ञा पण्डिता न बिभ्यति । न भय कुर्वन्तीत्यर्थ । तेभ्य इति 'भीत्रार्थाना भयहेतु' इति पञ्चमी ॥ १५ ॥ सुवदने, पश्य तावदुदयशैलशिखरान्तरविमुक्तरथवदरो विगलत्सध्यारागप्रसन्नदुरालोकमण्डलो जातो भगवान्दिवसनाथ ॥ सखि, रोसानितकनकपत्रसदृशेन लताजालान्तरवलितकिरणनिवहेन पिञ्जरितोद्यानभूमिभाग पूरितप्रतिज्ञ इव रिपुदु प्रेक्षणीयो जातो भगवान्सहस्रकिरण । तत्समयस्ते कुसुमचन्दनगर्भेणार्घेण पर्युपस्थातुम् । अत्र रोसानितं निर्मलीकृतम् । पिञ्जरित कपिशीकृत । पर्युपस्थातुं पूजयितुम् । हञ्जे तरलिके, उपनय मेऽर्घभा-

---

१ 'पेक्ख दाव' इति क्वचिन्नास्ति २ 'सिहरन्तरित' ३ 'विअलन्तसङ्झाराओ आसण्णदुरालोअमण्डलो', 'विअलिअसङ्झाराअप्पसण्णदुरालोअमण्डलो' ४ 'भट्टिणि' ५ 'रोसाणिदकण्णकन्तिसस्सिरीएण', 'रोसाणिदकण्णरअणकन्तिसस्सिरीएण,' 'सा-णिदकणअरओसरिसेण', 'रोसरुणिदकणअरओसरिसेण', 'कणअरओसरिसेण' इति नाना-विध पाठ ६ 'लदाजालन्तरोपहिदकिरणजालेण' ७ 'पिसङ्गीकिदोज्जाणभूमि-भाओ'. ८ 'पूरिदपडिण्णो विअ' इति क्वचिन्नास्ति ९ 'दुप्पेक्खणिज्जो' १० 'भ-अव सहस्सरस्सी सवुत्तो' ११ 'लोहिदचन्दणकुसुमगब्भेण'.

भानुमती—हञ्जे तरलिए, उवणेहि मे अग्घभाअणं जाव भअवदो सहस्सरस्सिणो सवरिअ णिव्वट्टेमि । (क)

चेटी—ज देवी आणवेदि । (इति निष्क्रान्ता ।) (ख)

राजा—अयमेव साधुतरोऽवसर समीपमुपगन्तु देव्याः ।

(प्रविश्य ।)

चेटी—देवि, एद अग्घभाअणम् । ता निव्वट्टीअदु भअवदो सहस्सरस्सिणो सवरिआ । (ग)

(राजोपसृत्य सज्ञया परिजनमुत्सार्य स्वयमेवार्घ्यपात्र गृहीत्वा ददाति ।)

(क) हञ्जे तरलिके, उपनय मेऽर्घ्यभाजन यावद्भगवत सहस्ररश्मे सपर्यां निर्वर्तयामि ।

(ख) यदेव्याज्ञापयति ।

(ग) देवि, एतदर्घ्यभाजनम् । तन्निर्वर्त्यता भगवत सहस्ररश्मे सपर्या ।

जन यावद्भगवत सहस्ररश्मे सपर्यां निर्वर्तयामि । अत्र सपर्या पूजा । यदेव्याज्ञापयति ॥ देवि, एतदर्घभाजनम् । तन्निर्वर्त्यता सहस्ररश्मे सपर्या ॥ भगवन्नम्बरसरोवरैकसहस्रपत्र, पूर्वदिग्वधूमुखमण्डलकुङ्कुमविशेषक, सकलभुवनाङ्गनवी-

---

१ 'सहस्सकिरणस्स' २ '(इति निष्क्रम्य पुन प्रविश्य ।)भट्टिणि, एद अग्घभाअणम् । णिव्वट्टेदु भअवदो सहस्सरस्सिणो सवरिअम् । राजा—अयमेव साधुतरोऽवसर प्रियासमीपमुपगन्तुम् । (इत्युपसर्पति ।) सखी—(विलोक्यात्मगतम् ।)कह महाराओ आअदो । हन्त, जादो से णिअमभङ्गो । भानुमती—(दिनकराभिमुखी भूत्वा ।) भअव अम्बरमहासरेक्कसहस्सपत्त पुव्वदिसावहूमुहमण्डणकुङ्कुमविसेसअ सअलभुवणेक्करअणप्पदीव ज एत्थ सिविणअदसणे किं वि अच्चाहिद तं भअवदो पणामेण सब्भादुअस्स अज्जउत्तस्स कुसलपरिणामी होदु । (अर्घ्यं दत्त्वा ।) हञ्जे तरलिए, उवणेशि मे पुणोवि कुसुमाइ वआराण वि देवणाण समरिअ णिव्वट्टइदुम् । (इति हस्तौ प्रसारयति ।) (राजा सज्ञया परिजनमुत्सार्य पुष्पाणि स्वयमुपनयति । स्पर्शसुखमभिनीय कुसुमानि शिरसि पातयति च ।) भानुमती—(सरोषम् ।) अहो पमादो परिअणस्स । (परिवृत्य दृष्ट्वा । ससम्भ्रमम् । कथ अज्जउत्तो ।' इति पृथग्विध पाठ

सखी—(खगतम् ।) कह महाराओ समाअदो । हन्त, किदो से असहीए णिअमभङ्गो रण्णा । (क)

भानुमती—(दिनकराभिमुखी भूत्वा ।) भअव, अम्बरमहासरेक्क[1] म्, हस्सपत्त, पुव्वदिसावहूमुहमण्डलकुङ्कुमविसेसअ, सअलभुवणाङ्गणदी[2] एत्थ सिविणअदसणे ज किं वि अच्चाहिद त भअवदो प[3] सलपरिणामी ससदब्भादुअस्स अज्जउत्तस्स होदु । (अर्घ्यं दत्त्वा ।) हला, उवणेहि मे कुसुमाइ जाव अवराण वि देवदाण सव्वारिअ णिव्वट्टेमि । (हस्तौ प्रसारयति ।) (ख)

(राजा पुष्पाण्युपनयति । स्पर्शसुखमभिनीय कुसुमानि भूमौ[4] पातयति ।)

भानुमती—(सरोषम् ।) अहो पमादो परिअणस्स । परिवृत्य[5] दृष्ट्वा । ससम्भ्रमम् ।) कध अज्जउत्तो । (ग)

राजा—देवि, अनिपुण. परिजनोऽयमेवविधे सेवावकाशे । तत्प्रभवत्यनुशासने[6] देवी ।

(क) कथ महाराज समागत । हन्त, कृतोऽस्या. प्रियसख्या नियमभङ्गो राज्ञा ।

(ख) भगवन्, अम्बरमहासरएकसहस्रपत्र, पूर्वदिशावधूमुखमण्डलकुङ्कुमविशेषक, सकलभुवनाङ्गनदीपक, अत्र स्वप्नदर्शने यत्किमप्यत्याहित तद्भगवत. प्रणामेन कुशलपरिणामी सशतभ्रातृकस्यार्यपुत्रस्य हला, उपनय मे कुसुमानि यावदपरासामपि देवताना सपर्या निर्वर्तयामि ।

(ग) अहो प्रमाद परिजनस्य । कथमार्यपुत्र ।

पक, इह स्वप्नदर्शने यत्किमप्यत्याहित तद्भगवत प्रणामेन कुशलपरिणाम मम सशतभ्रातृकस्यार्यपुत्रस्य भवतु । हला, उपनय मे कुसुमानि । अपरासामपि देवताना सपर्या निर्वर्तयामि । अत्र सहस्रपत्र कमलम् । विशेषकस्तिलक । 'अङ्गन चत्वराजिरे' इत्यमर । अत्र णत्वविधायकसूत्राभावान्नकारान्तत्वमेवेत्यवधेयम् ॥ कथ महाराज समागत । हञ्जे, कृतोऽस्या प्रियसख्या नियमभङ्गो राज्ञा ॥ अहो प्रमाद परिजनस्य । कथमार्यपुत्र ॥ अनिपुणोऽकुशल ॥

---

१ '(दिनकराभिमुखीभूय ।)' २ '(राज्ञ पुष्पाण्युपनयत स्पर्शोद्भस्तादर्घ्यपात्र-भूमौ पतति ।)' इति क्वचित्पाठ, '(दुर्योधन पुष्पाण्युपनयति । भानुमत्यास्तत्स्पर्श-जातकम्पाया हस्तात्पुष्पाणि पतन्ति ।)' इत्यपि क्वचित्पाठो दृश्यते ३ '(परिवृत्य, राजानमवलोक्य, ससाध्वस लज्जा नाटयति ।)' इति पाठ ४ 'तथा प्रभवति'.

(भानुमती लज्जा नाटयति ।)

राजा—अयि प्रिये,

विकिर धवलदीर्घापाङ्गससर्पि चक्षु·
परिजनपथवर्तिन्यत्र किं सभ्रमेण ।
स्मितमधुरमुदार देवि मामालपोच्चैः
प्रभवति मम पाण्योरञ्जलिस्त्वं स्पृशास्मान् ॥ १६ ॥

भानुमती—अज्जउत्त, अब्भणुण्णादाए तुए अत्थि मे कस्सिं वि णिअमे अहिलासो । (क)

राजा—श्रुतविस्तर एवासि भवत्या· स्वप्नवृत्तान्त प्रति । तदलमेव प्रकृतिसुकुमारमात्मान खेदयितुम् ।

भानुमती—अज्जउत्त, मे सङ्का बाहेइ । ता अणुमण्णदु म अज्जउत्तो । (ख)

राजा—(सगर्वम् ।) देवि, अलमनया शङ्कया । पश्य ।

(क) आर्यपुत्र, अभ्यनुज्ञातायास्त्वयास्ति मे कस्मिन्नपि नियमेऽभिलाष ।
(ख) आर्यपुत्र, मा शङ्का बाधते । तदनुमन्यता मामार्यपुत्र ।

विकिरेति । विकिर विक्षिप । अपाङ्ग नेत्रप्रान्त । तत्र ससर्पि गमनशीलम् । परिजनपथवर्तिनि सेवकमार्गे स्थिते मयि । किं सभ्रमेणोद्वेगेन । स्मितमधुरमुदार मनोहरं च यथा स्यादेव हे देवि, मामालप ब्रूहि । मम पाण्योरञ्जलिरुच्चै प्रभवतु । अयमञ्जलिर्बद्ध इत्यर्थ । अतोऽस्मास्त्व स्पृश । स्पर्शमपि मम विधेहीत्यर्थ । पाण्योरञ्जलिरित्यत्रार्थपौनरुक्त्य न देश्यम् । उक्तपोषालङ्कारेण तदुद्धारात् ॥ १६ ॥ आर्यपुत्र, अभ्यनुज्ञातायास्त्वयास्ति मे कस्मिन्नपि नियमेऽभिलाष ॥ आर्यपुत्र, मा शङ्का बाधते । तदनुमन्यता मामार्यपुत्र ॥

---

१ '(भानुमती लज्जा नाटयति ।)' इति क्वचिन्नास्ति २ 'भीरु' ३ 'प्रभवति मम पाण्योरञ्जलि सेवितु त्वाम्' इति पाठ ४ 'अब्भणुजाणादु म महाराओ । अत्थि मे' इति बहुपुस्तकाना पाठ ५ 'तदल प्रकृतिसुकुमारमात्मानम्', 'तदलमेन प्रकृतिसुकुमारमात्मानम्', 'तदलमेव प्रकृतिसुकुमारमात्मानम्', 'तदल प्रकृतिसुकुमारमेवात्मानम्' इति नानाविध पाठ ६ 'अज्जउत्त, अदिमेत्त मे सङ्का बाहेइ' इति पाठ

किं नो व्याप्तदिशा प्रकम्पितभुवामक्षौहिणीना फल
किं द्रोणेन किमङ्गराजविशिखैरेव यदि क्लाम्यसि ।
भीरु भ्रातृशतस्य या[1] भुजवनच्छायासुखोपास्थिता
त्व दुर्योधनकेसरीन्द्रगृहिणी शङ्कास्पद किं तव ॥ १७ ॥

भानुमती—अज्जउत्त, णं[2] हु मे किं वि आसङ्काकालण तुह्मेसु मण्णिहिदेसु । किं तु अज्जउत्तस्स ऐव्व[3] मणोरहसपत्तिं अहिणन्दामि । (क)

राजा—अयि सुन्दरि, एतावन्त एव मनोरथा यदह[4] दयितया सात. स्वेच्छया विहरामीति । पश्य ।

प्रेमाबद्धस्तिमितनयनापीयमानाब्जशोभ
लज्जायोगादविशदकथ मन्दमन्दस्मित वा ।
वक्त्रेन्दु ते नियमम[5]मुषितालक्तकाग्राधर वा
पातु वाञ्छा परमसुलभ किं नु[6] दुर्योधनस्य ॥ १८ ॥

(नेपथ्ये महान्कलकल[7] । सर्वे आकर्णयन्ति ।)

(क) आर्यपुत्र, न खलु मे किमप्याशङ्काकारण युष्मासु सनिहितेषु । कित्वार्यपुत्रस्यैव मनोरथसपत्तिमभिनन्दामि ।

किं नो व्याप्तेति । अक्षौहिणी सख्याभेद । किं द्रोणेनेत्यादौ फलमित्यनुषज्यते । अङ्गराज कर्ण । क्लाम्यसि परिश्राम्यसि । हे भीरु ॥ १७ ॥ आर्यपुत्र, न खलु मे किमप्याशङ्काकारण युष्मासु सनिहितेषु । कित्वार्यपुत्रस्यैव मनोरथसपत्तिमभिनन्दामि ॥ दयिता कान्ता । **प्रेमेति** । एतादृश वा तव वक्त्रेन्दुं पातु दुर्योधनस्य किं वाञ्छा न । अपि तु वाञ्छैव । कीदृशम् । प्रेम्णाबद्ध सबद्धमत एव स्तिमित निश्चल यन्नयन तेनापीयमान यदब्ज तद्वच्छोभा यस्य तम् । लज्जासबन्धादस्वच्छकथमल्पहास च । नियमान्मुषित परवासीभूतमलक्तक यत्र तादृशोऽग्राधरो यत्र । परमतिशयेनासुलभ दुर्लभम् ।

१ 'मे भुजवनच्छाया सुखोपास्थिता' इत्यपि पाठ २ 'ण हि किं वि मे सङ्काकालणम्' इति बहुपुस्तकाना पाठ ३ 'एव्व', 'ज्जेव' ४ 'यदह वनितग्रा संगत ', 'यदह समागतस्त्वया' ५ 'प्रेमावस्थ–', 'प्रेमाबन्ध–' ६ 'नियतमुषितालक्तकाग्राधर', 'नियमसुषितालक्तकाङ्काधर', 'नियमसुषितालक्तताग्राधर' ७ 'तु', 'न'.

भानुमती—(सभय राजान परिष्वज्य ।) परित्ताअदु परित्ताअदु अज्जउत्तो । (क)

राजा—(समन्तादवलोक्य ।) प्रिये, अल सभ्रमेण । पश्य ।

दिक्षु व्यूढाङ्घ्रिपाङ्गस्तृणजटिलचलत्पाशुदण्डोऽन्तरिक्षे
झाङ्कारी शर्कराल. पथिषु विटपिना स्कन्धकाषैः सधूमः ।
प्रासादाना निकुञ्जेष्वभिनवजलदोद्गारगम्भीरधीर-
श्चण्डारम्भ समीरो वहति परिदिश भीरु कि सभ्रमेण ॥१९॥

सखी—महाराअ, आरोहीअदु एव दारुपव्वअपासादम् । उव्वेअकारी क्खु अअ उत्थिदपरुसरअकलुसीकिदणअणो उम्मूलिदतरुवरसद्दवित्तत्थमन्दुरापरिब्भट्ठवल्लहतुलङ्गमपज्जाउलीकिदजणपद्धइभीसणो समीरणो । (ख)

(क) परित्रायता परित्रायतामार्यपुत्र ।

(ख) महाराज, आरुह्यतामेतद्दारुपर्वतप्रासादम् । उद्वेगकारी खल्वयं तपरुषरज कलुषीकृतनयन उन्मूलिततरुवरशब्दवित्रस्तमन्दुरापरिभ्रष्टव ङ्गमपर्याकुलीकृतजनपद्धतिर्भीषण. समीरणः ।

अन्यतरुणानामिति शेष ॥ १८ ॥ परित्रायता परित्रायता मामार्यपुत्र ॥ न खलुशब्दो निषेधे । **दिक्षिवति** । हे भीरु, कि सभ्रमेण भयेन । एतादृश समीरो वायु परिदिश प्रतिदिश वहति यत । कीदृश । दिक्षु व्यूढ सबद्धमङ्घ्रिपस्य पादपस्याङ्ग येन स तथा । अन्तरिक्षे व्योम्नि तृणेन जटिलो व्याप्तश्चलत्पाशुदण्डो दण्डाकारकधूलिर्यस्मात्स तथा । झाङ्कारोऽव्यक्तशब्दस्तद्युक्त । शर्कराल पथिषु शर्करायुक्त । सिध्मादित्वान्मत्वर्थीयो लच्प्रत्यय । विटपिनां वृक्षाणा स्कन्धकाषैर्धूमसहितः । प्रासादाना धवलगृहाणा मध्येषु नवजलधरो द्गमगम्भीरव. प्रचण्डोपक्रम । अङ्घ्रिश्चरणस्तेन पिबति जलादिकमित्यङ्घ्रिप । 'पदङ्घ्रिश्चरणोऽस्त्रियाम्' इत्यमर । काषण काष । भावे घञ् ॥ १९ ॥ महाराज, आरुह्यतामेतद्दारुपर्वतप्रासादम् । उद्वेगकारी खल्वुद्भूतपरुषरज कलुषीकृतनयन उन्मूलितस्खलिततरुवरशब्दवित्रस्तमन्दुरापरिभ्रष्टवल्लभतुरङ्गमपर्याकु-

---

१ 'सभय' इति क्वचिन्नास्ति २ 'व्याक्षिप्तपर्ण', 'व्यूढाङ्घ्रिपाद' ३ 'महासाङ्को पविसदु' ४ 'उच्छेअकारी' ५ 'उत्थिदो परुसरअ—', 'उद्धूदपाशुपसरो' ६ 'विदलिदंतरुवर—' ७ 'तुलङ्गमो' ८ 'समीरणासारो'

राजा—(सहर्षम् ।) उपकारि खल्विद वात्याचक्र सुयोधनस्य । यस्य प्रसादादयत्नपरित्यक्तनियमया देव्या सपादितोऽस्मन्मनोरथः । कथमिति ।

न्यस्ता न भ्रुकुटिर्न बाष्पसलिलैराच्छादिते लोचने
नीत नाननमन्यत सशपथ नाह स्पृशन्वारित ।
तन्व्या मग्नपयोधर भयवशादाबद्धमालिङ्गित
भङ्गास्या नियमस्य भीषणमरुन्नाय वयस्यो मम ॥ २० ॥

तत्सपूर्णमनोरथस्य मे कामचार सम्प्रति विहारेषु । तदितो दारुपर्वतप्रासादमेव गच्छाम ।

(सर्वे वात्याबाधा रूपयन्त परिक्रामन्ति ।)

राजा—

कुरु घनोरु पदानि शनै शनैरयि विमुञ्च गति परिवेदिनीम् ।
नु बाहुलतोपरिबन्धनं मम निपीडय गाढमुर स्थलम् ॥ २१ ॥

लीकृतजनपद्धतिर्भीषण समीरण अत्र दारुपर्वत काष्ठरचनाभेद पर्वताकार । यद्वा । दारुपर्वत इति क्रीडापर्वतनाम । स्खलित इतस्ततो भ्रष्ट । 'वाजिशाला तु मन्दुरा' इत्यमर । वल्लभो गूकाखण्डस्य (?) पद्धतिर्वर्त्म ॥ चक्र समूह । **न्यस्तेति** । अय भीषणमरुन्मम वयस्यो मित्र न । अपि तु मित्रमेव । यतोऽस्या नियमस्य भङ्गा भञ्जक । नियमभङ्गानेवाह—भ्रुकुटिर्न न्यस्ता न कृता न वा नेत्रजलेन नेत्र छन्नम् । अन्यत्र मुख न कृतम् । सशपथ स्पृशन्नह न वारित । यदि मा स्पृशति तदैव ते शपथ इति न कृतमित्यर्थ । तन्व्येति सर्वत्रान्वीयते । मग्नपयोधर सबद्धस्तन यथा स्यादेव भयवशादालिङ्गितमालिङ्गनमाबद्ध कृतम् । एतानि भयात्तथा कृतानीति मरुत उपकारकतेति भाव । यद्वा । अय भीषणमरुन्न । कि तु मम वयस्य इति योजना । मैत्र च तत्तत्क्रियाभिरुन्नेयम् ॥ २० ॥ कामचार स्वेच्छा ॥ **कुर्विति** । हे घनोरु निबिडोरुप्रदेशे । परिवेपिनीं कम्पवतीम् । हे सुतनु शोभनशरीरे । ममोरस्थल गाढ दृढ निपीडय । बाहुलतयोपरिबन्धन यथा स्यादेवम् ॥ २१ ॥

---

१ '(सहर्षम्)' इति क्वचिन्नास्ति २ 'भुग्नपयोधर', 'लग्नपयोधर' ३ 'आरब्धमालिङ्गितुम्' ४ 'नु मे' ५ 'दारुपवतमेव' ६ '(वात्याबाधा रूपयन्तो यत्नत परिक्रामन्ति ।)' इत्यपि पाठ ७ 'अपि' ८ 'पतसि' ९ 'बाहुलतोपनिबन्धनम्'

(प्रवेश रूपयित्वा ।) प्रिये, [1]अलब्ध[2]... समीरणासारः [3]... तत्वाद्गर्भगृहस्य । विस्रब्धमुन्मीलय चक्षुरुन्मृष्टरेणुनिकरम् ।

भानुमती—(सहर्षम् ।) दिट्ठि[3]आ इह दाव उप्पादसमीरणो ण बाधेइ । (क)

सखी—[3]आरोहणसभमणिस्सह पिअसहीए ऊरुजुअलम् । ता कीस दाणी महाराओ आसणवेदी ण भूसेदि । (ख)

राजा—(देवीमवलोक्य ।) भवति, अनल्पमेवापकृत वात्यासभ्रमेण । तथाहि ।

रेणुर्बाधा विधत्ते तनुरपि महती नेत्रयोरायतत्वा-
दुत्कम्पोऽल्पोऽपि पीनस्तनभरितमुर[4]क्षिप्तहार दुनोति ।
ऊर्वोर्मन्देऽपि याते पृथुजघनभराद्वेपथुर्वर्धतेऽस्या
वात्या खेद मृगाक्ष्या[5]. सुचिरमवयवैर्दत्तहस्ता करोति ॥ २२ ॥

(क) दिष्ट्येह तावदुत्पातसमीरणो न बाधते ।

(ख) आरोहणसभ्रमनि सह प्रियसख्या ऊरुयुगलम् । तत्कस्मादिदानी महाराज आसनवेदी न भूषयति ।

आसार समूह । स्तिमितत्व निर्विडत्वम् । गर्भगृह 'गभहर' इति प्रसिद्धम् । विस्रब्ध कृतविश्वासमिति क्रियाविशेषणम् ॥ दिष्ट्येह तावदुत्पातमारुतो न बाधते ॥ आरोहणसभ्रमनि सह प्रियसख्या ऊरुयुगलम् । तत्किंनिमित्त महाराज आसनवेदी न भूषयति । सभ्रमेणादरेण नि सह निश्चलम् ॥ **रेणुरिति** । नेत्रयोरायतत्वादैर्घ्यात्तनुरप्यल्पोऽपि रेणुर्बाधा पीडा विधत्ते । अल्पोऽप्येष कम्प उरो वक्षःस्थल दुनोति पीडयति । भरितमिति 'तारकादित्वादितच्' इति साधनीयम् । अन्यथा भृतमिति स्यादिस्रवधेयम् । ऊर्वोराधारभूतयोर्वेपथु कम्पो मन्देऽप्यल्पेऽपि याते गमने सति वर्धत इत्यन्वय । अतो हेतोर्वायुर्मृगाक्ष्या खेद करोति । कीदश । अवयवै शरीरावयवैर्नयनादिभिर्दत्तहस्त कृतसाहित्य

---

१ 'लब्धान्तर समीरण सवृतत्वाद्गर्भगृहस्य', 'अलब्धावकाश समीरण संवृतत्वाद्गर्भगृहस्य' २ 'दिट्ठिआ दुप्पादसमीरणासारो ण बाधेइ' इति पाठ ३ 'आरोहण—' इत्यसात्पूर्वम् 'महाराअ' इत्यधिक पाठो बहुपुस्तकेषु दृश्यते ४ 'अणुभूसेदि' ५. 'तनोति' ६. 'कृशाङ्ग्या' ७ 'अवयवैरित्थमाविष्करोति'.

(सर्वे उपविशन्ति ।)

राजा—तत्किमित्यनास्तीर्णे [1]कठिनशिलातलमध्यास्ते देवी[2] ।

लोलाशुकस्य पवनाकुलिताशुकान्त [4]
त्वद्दृष्टिहारि मम लोचनबान्धवस्य ।
अध्यासितु तव [3]चिरं जघनस्थलस्य,
पर्याप्तमेव करभोरु ममोरुयुग्मम् ॥ २३ ॥

(प्रविश्य पटाक्षेपेण सभ्रान्त ।)

कञ्चुकी—देव, भग्न भग्नम् ।

(सर्वे [5]साकूत पश्यन्ति ।)

राजा—[6]केन ।

[7]कञ्चुकी—भीमेन[8] ।

राजा—कस्य ।

कञ्चुकी—भवतः ।

राजा—आः, किं प्रलपसि ।

इत्यर्थ । उभाभ्यामेव पीडा देव्या इति भाव ॥ २२ ॥ अनास्तीर्णं वस्त्रादिनाऽनाच्छादितम् । **लोलेति** । हे करभोरु, तव जघनस्थलस्याध्यासितु जघनस्थलस्याश्रयणाय ममोरुयुग्म पर्याप्तमेव शक्तमेव । कीदृशस्य । चपलवस्त्रस्य । मदीयनेत्रमित्रस्य । कीदृशम् । वाताकुलिताशुकान्तम् । त्वदीयदृष्टिहरणशील च । जघनस्थलस्येत्यत्र 'शेषे षष्ठी' इति सूत्रेण षष्ठी । 'करस्य करभो बहि' इत्यमर ॥ २३ ॥ इह लोलेत्यादि भग्नमित्यन्तेन छलसंधिरुक्ता । इष्टार्थयुक्तं यद्वाक्यं भाषतेऽर्थमभीप्सितम् । वाक्यान्तरेण सयोगाच्छलोऽयमभिधीयते ॥' इति भरत ॥ साकूत साभिप्रायम् ॥ किं नामेति । नाम प्राकाश्ये । किं तदिति

---

१ 'कठिन शिलातलम्' २ 'देवी' इत्यस्मादनन्तर 'यत' इत्यधिक क्वचित्पाठ ३ 'चिरात्' ४ 'सातङ्कम्', 'सभयम्' ५ 'किं नाम' ६ 'कञ्चुकी—देव, भग्न भीमेन', 'कञ्चुकी—देव, भीमेन' इति वा पाठ ७ 'भीमेन' इत्येतस्मादनन्तर 'राजा—आ, किं प्रलपसि । भानुमती—अज्ज, किं अणत्थ मन्तेसि । कञ्चुकी—(सभयम् ।) देव, कथयामि सर्वम् । भग्न भीमेन भवतो मरुता, एवविध. केषुचित्पुस्तकेषु पाठो दृश्यते.

भानुमती—अज्ज, किं अणिट्ठ मन्तेसि । (क)

राजा—धिक्प्रलापिन्, वृद्धापसद, कोऽयमद्य ते व्यामोह ।

कञ्चुकी—देव, न खलु कश्चिद्व्यामोह । सत्यमेव ब्रवीमि ।

भग्न भीमेन भवतो मरुता रथकेतनम् ।
पतित किङ्किणीक्काणबद्धाक्रन्दमिव क्षितौ ॥ २४ ॥

राजा—[1]बलवत्समीरणवेगात्कम्पिते भुवने भग्न स्यन्दनकेतु । तत्किमित्युद्धत प्रलपसि भग्न भग्नमिति ।

कञ्चुकी—देव न किंचित् । किं तु शमनार्थमस्यानिमित्तस्य विज्ञापयितव्यो देव इति स्वामिभक्तिर्मा मुखरयति ।

भानुमती—[2]अज्जउत्त, अन्तरीअदु एद पसण्णबह्मणवेअघोसेण । (ख)

राजा—(सावज्ञम् ।) [3]नैनु गच्छ । पुरोहितसुमित्राय निवेदय ।

कञ्चुकी—यदाज्ञापयति देव । (इति निष्क्रान्त ।)

(प्रविश्य)

प्रतीहारी—(सोद्वेगमुपसृत्य ।) [4]जेअदि जअदि महाराओ ।

✓(क) आर्य किमनिष्ट मन्त्रयसे ।

✓(ख) आर्यपुत्र, अन्तर्यतामेतत्प्रसन्नब्राह्मणवेदघोषेण ।

प्रकाशयेत्यर्थ ॥ आर्य, किमनार्यं कथयसि ॥ **भग्नमिति** । भीमेन मरुता वायुना, अथ च भीमसेनेन । मरुता वायुपुत्रेण । मरुतेत्यत्र 'आत्मा वै जायते पुत्र' इत्यभेदोपचाराद्वा तद्धितलोपाद्वा साधुतेत्यवधेयम् । केतन चिह्नम् । किङ्किणीक्काण क्षुद्रघण्टिकाशब्द ॥ २४ ॥ स्यन्दनो रथस्तस्य केतुश्चिह्नम् ॥ आर्यपुत्र, अन्तर्यतामेतत्प्रसन्नब्राह्मणवेदघोषेण ॥ जयति जयति महाराज ।

---

१ यदि 'बलवत्समीरणयोगात्' इत्यपि पाठ २ 'अज्जउत्त, पडिहारीअदु एदं अणिमित्त पसण्णबह्मणवेआणुघोसेण होमेण अ' इति बहुपुस्तकाना पाठ, 'पसण्णबह्मणवअणमङ्गलवअणसमुग्घोसेण' इत्यपि क्वचित्पाठ ३ 'किं तु सतपुरोहिताय सुमित्राय निवेदय' इति पाठ ४ 'जअदु जअदु महाराओ । महाराअ, एसा क्खु जामादुणो सिन्धुराअस्स मादा दुस्सला अ पडिहारभूमीए चिट्ठदि' इति बहुपुस्तकाना पाठ

महाराअ, महादेवी क्खु एसा सिन्धुराअमादा दुस्सला अ पडिहार-भूमीए चिट्ठदि । (क)

राजा—(किंचिद्विचिन्त्यात्मगतम् ।) किं जयद्रथमाता दुःशला चेति । कच्चिदभिमन्युवधामर्षितैः पाण्डुपुत्रैर्न किंचिदत्याहितमाचेष्टित भवेत् । (प्रकाशम् ।) गच्छ । प्रवेशय शीघ्रम् ।

प्रतीहारी—ज देवो आणवेदि । (इति निष्क्रान्ता ।) (ख)

(तत प्रविशति सभ्रान्ता जयद्रथमाता दुःशला च ।)

(उभे सास्र दुर्योधनस्य पादयो पतत ।)

माता—परित्ताअदु परित्ताअदु कुमालो । (ग)

(दुःशला रोदिति ।)

राजा—(ससभ्रममुत्थाप्य ।) अम्ब, समाश्वसिहि समाश्वसिहि । किमत्याहितम् । अपि कुशल समराङ्गणेष्वप्रतिरथस्य जयद्रथस्य ।

माता—जाद, कुदो कुसलम् । (घ)

राजा—कथमिव ।

(क) जयति जयति महाराज । महाराज, महादेवी खल्वेषा सिन्धुराज-माता दुःशला च प्रतीहारभूमौ तिष्ठति ।

(ख) यद्देव आज्ञापयति ।

(ग) परित्रायता परित्रायता कुमारः ।

(घ) जात, कुतः कुशलम् ।

महाराज, महादेवी खल्वेषा सिन्धुराजमाता दुःशला च प्रतीहारभूमौ तिष्ठति । अत्र सिन्धुराजो जयद्रथः । प्रतीहारभूमिर्द्वारम् ॥ अत्याहितमनर्थं ॥ यद्देव आज्ञापयति ॥ परित्रायता परित्रायता कुमारः ॥

---

१ '(स्वगतम् ।)' २ 'कच्चित्' ३ 'कच्चित्' ४ 'महाराओ' ५ 'कुरुणाहो' ६. 'उत्थाय' ७ 'कुदो एत्थ कुसलम्' ८ 'कथमिव' इत्यत्र 'राजा—अम्ब, किं जातम्' इति क्वचित्पाठ

माता—(साशङ्कम्।) अज्ज क्खु पुत्तवहामरिसिदेण गण्डीविणा अणत्थमिदे दिवहणाहे तस्स वहो पडिण्णादो। (क)

राजा—(सस्मितम्।) इद तदस्स कारणमम्बाया दु शलायाश्च। पुत्रशोकादुन्मत्तस्य किरीटिन प्रलापैरेवमवस्था। अहो मुग्धत्वमबलाना नाम। अम्ब, कृत विषादेन। वत्से दु शले, अलमश्रुपातेन। कुतश्चाय तस्य धनंजयस्य प्रभावो दुर्योधनबाहुपरिघरक्षितस्य महारथजयद्रथस्य विपत्तिमुत्पादयितुम्।

माता—जाद, जाद, दे हि पुत्तबन्धुवहामरिसुद्दीविदकोवाणला अणपेक्खिदसरीरा वीरा परिक्कामन्ति। (ख)

राजा—(सोपहासम्।) एवमेतत्। सर्वजनप्रसिद्धैवामर्षिता पाण्डवानाम्। पश्य।

हस्ताकृष्टविलोलकेशवसना दु शासनेनाज्ञया
पाञ्चाली मम राजचक्रपुरतो गौर्गौरिति व्याहृता।
तस्मिन्नेव ततज्यगाण्डिवधरो नासीत्पृथानन्दनो
यून क्षत्रियवञ्चजस्य कृतिन क्रोधास्पद किं न तत् ॥२५॥

(क) अद्य खलु पुत्रवधामर्षितेन गाण्डीविनानस्तमिते दिवसनाथे तस्य वध. प्रतिज्ञातः।

(ख) जात, जात, ते हि पुत्रबन्धुवधामर्षोद्दीपितकोपानला अनपेक्षितशरीरा वीरा. परिक्रामन्ति।

पुत्रबन्धुवधामर्षितेन गाण्डीविनानस्तमिते दिवसनाथे तस्य वध प्रतिज्ञात ॥ पुत्रबन्धुवधामर्षोद्दीपितकोपानला अनपेक्षितशरीरा वीरा सचरन्ति ॥ अमर्षिता क्रोधशालिता। **हस्ताकृष्टेति**। ममाज्ञयेत्यन्वय। व्याहृतेति णिज्गर्भम्। तैन व्याहारितेत्यर्थ। राजवधूना गौर्गौरित्यभिधानमतिहानिकरमिति समाचार।

---

१ 'पुत्तवहामरिसुद्दीविदेण', २ 'अश्रुकारणम्' ३ 'उत्तस्स' ४ 'नाम' इति क्वचिन्नास्ति ५ 'अम्ब' इति क्वचिन्नास्ति ६ 'अस्य' ७ 'जाद, जदो अबन्धुवहामरिसुद्दीविदकोवाणला' इति पाठ ८ 'अणवेक्खिदसरीर[redacted] णा' ९. 'प्रसिद्धमेवामर्षित्वम्' १० 'राजचक्रममित', 'ततज्यकार्मुकधर', 'स किं नु गाण्डिवधर'

माता—[1]असमत्तपडिण्णाभारस्स आप्पवहो से पडिण्णादो । (क)

राजा—यद्येवमलमानन्दस्थानेऽपि ते विषादेन । [2]ननु वक्तव्यमुत्सन्न सानुजो युधिष्ठिर इति । [3]अन्यच्च मात , [4]कः शक्तिरस्ति धनजयस्यान्यस्य वा कुरुशतपरिवारवर्धितमहिम्न कृपकर्णद्रोणाश्वत्थामादिमहारथपराक्रमद्विगुणीकृतनिरावरणविक्रमस्य [5]नामापि ग्रहीतु ते तनयस्य । अयि सुतपराक्रमानभिज्ञे,

धर्मात्मज प्रति यमौ च कथैव नास्ति
मध्ये वृकोदरकिरीटभृतोर्बलेन ।
एकोऽपि विस्फुरितमण्डलचापचक्र
क सिन्धुराजमभिषेणयितुं समर्थ ॥ २६ ॥

भानुमती—अज्जउत्त, जहवि एव्व तहवि [6]गुरुकिदपडिण्णाभारो ट्ठाण क्खु सङ्काए । (ख)

(क) असमाप्तप्रतिज्ञाभारस्यात्मवधोऽस्य प्रतिज्ञातः ।

(ख) आर्यपुत्र, यद्यप्येव तथापि गुरुकृतप्रतिज्ञाभार स्थान खलु शङ्काया ।

तस्मिन्काले तता विस्तृता ज्या प्रत्यञ्चिका यत्र तादृश गाण्डीव धनुर्यस्य स । 'गण्डीवमपि गाण्डिवम्' इति शब्दभेद । पृथानन्दनोऽर्जुन । आस्पद स्थानम् ॥२५॥ असमाप्तप्रतिज्ञाभारस्यात्मवधस्तेन व्यवसित । परिवारोऽनुचर । निरावरणमप्रतिहतम् । शून्यम् । धर्मात्मजमिति । धर्मात्मजो युधिष्ठिर । यमौ नकुलसहदेवौ प्रतीत्यन्वय । भीमार्जुनयोर्मध्ये एकोऽपि क सिन्धुराजमभियोद्धु समर्थ । अपि तु न कोऽपि । विस्फुरित मण्डलाकार चापचक्र यस्य तम् ॥ २६ ॥ यद्यप्येव तथापि गुरुकृतप्रतिज्ञाभार स्थान खलु शङ्काया ॥

---

१ 'असमत्तपडिण्णाभरेण आप्पवहो तेण पडिण्णादो', 'जाद, असम्पत्तीए पडिण्णाभारस्स आप्पवहो से पडिण्णादो' इति पाठान्तरे २ 'ननु व्यक्त वक्तव्यम्' ३ 'अन्यच्च' इति क्वचिन्नास्ति. ४ 'न' ५ 'पराक्रम' इति क्वचिन्नास्ति ६ 'गुरुकिदपडिण्णाभारो धनजयो त्ति णट्ठाण', 'गुरुकिदपडिण्णाभरो धनजओ णिदाण क्खु सङ्काए'

माता—साहु, कालोइद भणिअ भाणुमदीए । (क)

राजा—आ , ममापि नाम दुर्योधनस्य शङ्कास्थान पाण्डवा । पश्य।

कोदण्डज्यांकिणाङ्कैरगणितरिपुभि कङ्कटोन्मुक्तदेहै
श्लिष्टान्योन्यातपत्रै सितकमलवनभ्रान्तिमुत्पादयद्भि ।
रेणुर्ग्रस्तार्कभासा प्रचलदसिलतादन्तुराणा बलाना-
माक्रान्ता भ्रातृभिर्मे दिशि दिशि समरे कोटय सपतन्ति ॥२७॥

अपि च भानुमति, विज्ञातपाण्डवप्रभावे, कि त्वमप्येवर्माशङ्कसे । पश्य ।

दु शासनस्य हृदयक्षतजाम्बुपाने
दुर्योधनस्य च तथा गदयोरुभङ्गे ।
तेजस्विना समरमूर्धनि पाण्डवाना
ज्ञेया जयद्रथवधेऽपि यथा प्रतिज्ञा ॥ २८ ॥

क कोऽत्र भो । जैत्र मे रथमुपकल्पय तावत् । यावदहमपि तस्य प्रगल्भपाण्डवस्य जयद्रथपरिरक्षणेनैव मिथ्याप्रतिज्ञावैलक्ष्यसपादितम-शस्त्रपूत मरणमुपदिशामि ।

(क) साधु, कालोचित भणित भानुमत्या ।

साधु, कालोचित भणित भानुमत्या ॥ **कोदण्डेति** । कोदण्डो धनु । कङ्कटेन सनाहेनाभिन्नमुन्मुक्त देहं येषाम् । तथा चात्मगौरवात्सनाहमकुर्वाणैरित्यर्थः । आतपत्र छत्र तै करणभूतै श्वेतकमलवनभ्रम कुर्वद्भि । दन्तुरा निम्नोन्नता । बलाना कोट्य सख्याभेदा प्रदेशा वा । सपतन्ति गच्छन्ति । 'कोटिरग्रे प्रकर्षे च सख्यापार्श्वप्रदेशयो' इति विश्व । 'उरश्छद कङ्कटकोऽजगर कवचोऽस्त्रियाम्' इत्यमर ॥ २७ ॥ **दुःशासनेति** । 'रक्तक्षतजशोणि तम्' इत्यमर ॥ २८ ॥ जैत्र जयशालिनम् । अशस्त्रपूतमशस्त्रकृतम् ॥

---

१ 'जादे, साहु, कालोइद तुए मन्तिदम्' इति पाठ २ 'व्याततज्यै' ३ 'कङ्कटासुक्तदेहै', 'कङ्कटावद्धदेहै' ४ 'ध्वस्तार्कभासाम्' ५ 'चमूनाम्' ६ 'अयि भानुमति' ७ 'अविज्ञातपाण्डवप्रभावे' ८ 'आशससे' ९ 'उपपादय' १० 'तस्य मिथ्याप्रतिज्ञाप्रगल्भस्य पाण्डवस्य जयद्रथपरिरक्षणेनैव मिथ्याप्रतिज्ञावैलक्ष्यसपादितम्', 'तस्य प्रगल्भपाण्डवस्य मिथ्याप्रतिज्ञावैलक्ष्य सपादयन्' ,'तस्यप्रगल्भपाण्डवस्य मिथ्याप्रतिज्ञावैलक्ष्यसपादितम्' इति पृथग्विध पाठ

(प्रविशय ।)

कञ्चुकी—देव,

उद्घातक्वणितविलोलहेमघण्ट
प्रालम्बद्विगुणितचामरप्रहास ।
सज्जोऽय नियमितवल्गिताकुलाश्व
शत्रूणा क्षपितमनोरथो रथस्ते ॥ २९ ॥

राजा—देवि, प्रविश त्वमभ्यन्तरमेव । ('यावदहमपि तस्य प्रग ल्भपाण्डवस्य'—इत्यादि पठन्परिक्रामति ।)

(इति निष्क्रान्ता सर्वे ।)

इति द्वितीयोऽङ्कः ।

उद्घातेति । उद्घात आघात । तेन क्वणित शब्द । यद्वा 'स्यादभ्यादानमुद्घात आरम्भ' इत्यमर । तेनोद्घात उपक्रम इत्यर्थ । प्रालम्बो लम्बितो हार । प्रहास प्रकाश । नियमितो वेल्लितेन गतिविशेषेणाकुलितोऽश्वो यत्र स तथा॥२९॥ अत्राङ्के नायिकाचेट्योर्भाषा शौरसेनी । तदुक्त तत्रैव—'नायिकाया च चेट्या च तथा चैव विदूषके । शौरसेनीं समाश्रित्य भाषा योज्या तु नाटके ॥' इति । एवमन्यत्रापि ॥

असूत य रत्नवरो गुणीशो नानागुणाढ्या दमयन्तिकापि ।
जगद्धर तस्य कृतौ गतोऽयमङ्को द्वितीयो वरटिप्पनेऽत्र ॥

इति द्वितीयोऽङ्क.

---

१ 'वल्गुवल्गितैश्च' इति पाठ २ 'पठित्वा' इति पाठ

तृतीयोऽङ्कः ।

(तत प्रविशति विकृतवेषा राक्षसी ।)

राक्षसी—(विकृतं विहस्य । सपरितोषम् ।)

हदमाणुशमशभालए कुम्भशहश्शवशाहि शचिए ।
अणिश अ पिवामि शोणिअ वलिशशद शमले हुवीअदु ॥ १ ॥

(नृत्यन्ती सपरितोषम् ।) जइ शिन्धुलाअवहदिअहे विअ दिअहे दिअहे शमलकम्म पडिवज्जइ अज्जुणे तदो पज्जत्तभलिदकोट्ठागाले मशशोणिएहि मे गेहे हुवीअदि । (परिक्रम्य दिशोऽवलोक्य ।) अह कहि क्खु गदे मे लुहिलप्पिए हुवीअदि । होदु । शद्दावइश्श दाव । अले लुहिलप्पिआ लुहिलप्पिआ, इदो एहि । (क)

(क) हतमानुषमासभारके कुम्भसहस्रवसामि सचिते ।
अनिश च पिबामि शोणित वर्षशत समरो भवतु ॥

यदि सिन्धुराजवधदिवस इव दिवसे दिवसे समरकर्म प्रतिपद्यतेऽर्जुनस्तत. पर्याप्तभरितकोष्ठागार मासशोणितैर्मे गृह भविष्यति । अथ क खलु गतो मे रुधिरप्रियो भविष्यति । भवतु । शब्दापयिष्ये तावत् । अरे रुधिरप्रिय रुधिरप्रिय, इत एहि ।

राक्षसीवाक्ये । हतमानुषमासभारके कुम्भसहस्रवसामि सचिते । अनिश च पिबामि शोणित वर्षशत समरो भविष्यति ॥ १ ॥ यदि च सिन्धुराजवध इव दिवसे दिवसे समरकर्मातिप्रवर्तयत्यर्जुनस्तदा पर्यन्त भृतकोष्ठागारं मम मासशोणितैर्गृह भविष्यति । तत्कुत्र खलु गतो मे रुधिरप्रियो भविष्यति । भवतु । वादयिष्ये । अरे रुधिरप्रिय रुधिरप्रिय, एहि तावत् । अत्र भारके सचिते सतीत्यन्वय । अन्त समाप्तिम् । कोष्ठागार कोठाखण्डम् ॥ **राक्षसवाक्ये** ।

---

१ 'शोणिदेहिं', 'भोअणे', 'भक्खणे' २ 'कुम्भशहश्श वशाहिं शचिदम्', 'इमशहश्शवशारशशचिए' इति पाठौ ३ '(इति नृत्यन्ती सपरितोषम् ।)' ४ 'दिअहें दिअहे' इति क्वचिन्नास्ति ५ 'शमल' ६ 'अपज्जत्त–', 'अजत्त–' ७ 'कहिं णु लुहिलप्पिए हुवीअदि । ता जाव इमस्सिंश शमले पिअभत्ताल लुहिलप्पिअ पिणीशामि । (परिक्रम्य ।) होदु शद्दावइश्श दाव । लुहिलप्पिआ लुहिलप्पिआ, इदो एहि इदो एहि' इति बहुपुस्तकाना पाठ

(तत प्रविशति तथाविधो राक्षस ।)

राक्षसः—(श्रमं[1] नाटयन् ।)

पच्चग्गहदाण मशए जइ उण्हे लुहिले अ लब्भइ ।
ता एशे मह पलिश्शमे क्खणमेत्त एव्व लहु णश्शइ ॥ २ ॥ **(क)**

(राक्षसी पुनर्व्याहरति ।)

राक्षसः—(आकर्ण्य ।) अले[4] के म शद्दावेदि । (विलोक्य ।) कहं[5] पिआ मे वशागन्धा । (उपसृत्य ।) वशागन्धे, कीश म शद्दावेशि ।

लुहिलाशवपाणमत्तिए[6] लणहिण्डन्तखलन्तगत्तिए[7] ।
शद्दाअशि कीश म पिए[8] पुलिशशहश्श हद शुणीअदि ॥ ३ ॥ **(ख)**

राक्षसी—अले[9] लुहिलप्पिआ, एद क्खु मए[10] तुह कालणादो पच्चग्गहदश्श कश्शवि लाएशिणो प्पहूदवशाशिणेहचिक्कण कोण्ह णेवलुहिल अग्गमश अ आणीदम् । ता पिवाहि णम् । **(ग)**

(क) प्रत्यग्रहताना मास यद्युष्ण रुधिर च लभ्येत ।
तदेष मम परिश्रम क्षणमात्रमेव लघु नश्येत् ॥

(ख) अरे का मा शब्दायते । कथ प्रिया मे वसागन्धा । वसागन्धे, कस्मान्मा शब्दायसे ।

रुधिरासवपानमत्ते रणहिण्डनस्खलद्गात्रि ।
शब्दायसे कस्मान्मा प्रिये पुरुषसहस्र हृत श्रूयते ॥

(ग) अरे रुधिरप्रिय, इद खलु मया तव कारणात्प्रत्यग्रहतस्य कस्यापि राजर्षे. प्रभूतवसास्नेहचिक्कण कोष्ण नवरुधिरमग्रमांस चानीतम् । तत्पिबैतत् ।

अरे, को मा वादयते । कथ प्रिया मे वसागन्धा । यावदेनामुपसर्पामि । वसागन्धे, किंनिमित्त त्व मा वादयसे । रुधिरासवपानमत्ते रणभ्रमणस्खलद्गात्रि । वादयसे किमिति सुन्दरि मा पुरुषशत हतमिति श्रूयते ॥ ३ ॥ **राक्षसीवाक्ये** । अरे रुधिरप्रिय, रुधिरप्रिय, एतत्खलु मया तव कारणात्कस्यापि राजर्षे

---

१ '(श्रमण नाटयन् ।)' २ '(श्रुत्वा ।)' ३ 'के एशे म' ४ 'अले, कह वशागन्धा' इति बहुपुस्तकाना पाठ ५ 'लुहिलाशवपाणमत्तिए—' इत्यपि पाठ. केषुचित्पुस्तकेषु न वर्तते ६ 'अले' इति क्वचिन्नास्ति ७ 'मए' इति क्वचिन्नास्ति. ८ 'कश्शवि लाएशिणो शलीलवअंवप्पहूद प्पहूदवशाशिणेहचिक्कण'; 'कदशवि रिउवग्गाहदद्दश विलाशिणो प्पहूदवशाशिणेहमत्थिक्कचिक्कण' इति वा पाठ ९ 'लुहिल'

राक्षसः—(सपरितोषम्[1]) वशागन्धे, शुष्ठु। शोहण तुए किदम्। बलिअम्हि पिवाशिए। ता उवणेहि। **(क)**

राक्षसी—[2]अले लुहिलप्पिआ, एदिशे [3]वि णाम हदणलगअतुलङ्गमशोणिअवशाशमुद्दुश्शचले [4]शमले पडिब्भमन्ते तुम पिवाशिएशित्ति अच्चलिअम्। **(ख)**

राक्षसः—अइ शुत्थिदे, ण पुत्तशोअशन्तत्तहिअअ शामिणी हिडिम्बादेवी [5]पेक्खिदु गदम्हि। **(ग)**

(क) वसागन्धे, सुष्ठु। शोभन त्वया कृतम्। बलवदस्मि पिपासित। तदुपनय।

(ख) अरे रुधिरप्रिय, ईदृशेऽपि नाम हतनरगजतुरङ्गमशोणितवसासमुद्रदु सचरे समरे परिश्रमस्त्व पिपासितोऽसीत्याश्चर्यमाश्चर्यम्।

(ग) अयि सुस्थिते, ननु पुत्रशोकसतप्तहृदया स्वामिनीं हिडिम्बादेवीं प्रेक्षितु गतोऽस्मि।

प्रत्यग्रहतस्य प्रभूतवसाशोणित मस्तिष्कचिक्कणमप्रमास चानीतम्। तत्खादय। पिब शोणितासवम्। अत्र प्रत्यग्रं नवम्। प्रभूतमुपचितम्। मस्तिष्क गोदीति प्रसिद्धम्। अग्रं प्रथमभागमुत्तम वा॥ **राक्षसवाक्ये।** वसागन्धे, सुष्ठु। त्वया शोभन कृतम्। बलितोऽस्मि पिपासित। तदुपनय। अत्र सुष्ठु मनोहरम्। बलितोऽतिशयित॥ **राक्षसीवाक्ये।** अरे रुधिरप्रिय, ईदृशेऽपि नाम त्व हतग जनरतुरङ्गमवसासमुद्रदु सचरे समरे परिश्रमन्पिपासितोऽसीत्याश्चर्यमाश्चर्यम्॥ **राक्षसवाक्ये।** अयि सुस्थिते, ननु पुत्रशोकसतप्ता स्वामिनीं हिडिम्बादेवीमन्वेष्टु गतोऽस्मि। हे सुस्थिते। ननु भणामि॥ **राक्षसीवाक्ये।** अरे रुधिर-

---

१ 'राक्षस —(सपरितोषम्।) शाढु वशागन्धे, शाढु। शोहण तुए किद। बलिअम्हि पिवाशिए ज कोशिण कोशिण लुहिल आणीदम्' इति बहुपुस्तकाना पाठ, केचित्तु 'राक्षस —वसागन्धे, शुष्ठु तुए किदम्। राक्षसी—अले, गेण्ह एद हत्थिकवालम्। पिवाहि शोणिआशवम्। राक्षस —बलिअम्हि पिवाशिदो। ता उवणेहि' इत्येव पठन्ति २ 'अले' इति क्वचिन्नास्ति ३ 'वि णाम' इति क्वचिन्नास्ति ४ 'शमलङ्गणे' ५ 'राक्षस —(सक्रोधम्।) अले वशागन्धे, पुत्तघडुक्कअशोअशन्तत्तहिअअ', 'राक्षस —(सक्रोधम्।) अइ शुत्थिदे, पुत्तघडुक्कअशोअशन्तत्तहिअअं' इति वा पाठ ६ 'शमदशशहदु'

राक्षसी—लुहिलप्पिआ, अज्जवि शामिणीए हिडिम्बादेवीए घडुक्कअशोए ण उपशमइ । (क)

राक्षसः—[1]वशागन्धे, कुदो शे उवशमे । [2]केवल अहिमण्णुशोअशमाणदुक्खाए [3]शुभद्दादेवीए जण्णशेणीए अ कध कध वि शमाश्शाशीअदि । (ख)

राक्षसी—लुहिलप्पिआ, [4]गेण्ह एद हत्थिशिलक्कवालशचिअ अग्गमशोवदशम् । पिवाहि [5]शोणिआशवम् । (ग)

राक्षसः—(तथा कृत्वा ।) वशागन्धे, अह [6]किअप्पहूद तुए शचिअ लुहिल अग्गमश अ । (घ)

(क) रुधिरप्रिय, अद्यापि स्वामिन्या हिडिम्बादेव्या घटोत्कचशोको नोपशाम्यति ।

(ख) वसागन्धे, कुतोऽस्या उपशम । केवलमभिमन्युशोकसमानदुःखया सुभद्रादेव्या याज्ञसेन्या च कथ कथमपि समाश्वास्यते ।

(ग) रुधिरप्रिय, गृहाणैतद्धस्तिशिर कपालसचितमग्रमासोपदशम् । पिब शोणितासवम् ।

(घ) वसागन्धे, अथ कियत्प्रभूत त्वया सचित रुधिरमग्रमास च ।

प्रिय, तत्किमद्याप्यस्या स्वामिन्या हिडिम्बादेव्या पुत्रस्य घटोत्कचस्य शोको हृदयान्नोपशाम्यति ॥ **राक्षसवाक्ये** । वसागन्धे, कुतोऽस्या उपशाम्यति । केवलमभिमन्युशोकसमानदुःखया सुभद्रादेव्या याज्ञसेन्या च कथ कथमपि समाश्वास्यते ॥ **राक्षसीवाक्ये** । तद्गृहाणैतद्धस्तिशिर कपाटमग्रमास चानीतम् । तत्खादय । पिब शोणितासवम् ॥ **राक्षसवाक्ये** । वसागन्धे, अथ कि प्रभूत त्वया रुधिर वसा मास च सचितम् । अत्र कि कियत् । प्रभूतमुपचितम् ॥

---

१ 'अइ' २ 'किं तु अहिमण्णुवहशोअशमाणदुक्खाए' इति पाठ ३. 'शुभद्दादेवीए शम जण्णशेणीए कध वि शमाश्शाशीअदि', 'शुभद्दादेवीए जण्णशेणीए अ शमाश्शाशीअदि' इति वा पाठ ४ 'गेण्ह तुम एद' ५ 'णवशोणिआशवम्' ६ 'किअ घडप्पहूदे'.

राक्षसी—अले लुहिलप्पिआ, पूव्वशचिअ [1]तुम वि जाणाशि जेव्व। [2]णवशचिअ शिणु [3]दाव। भअदत्त [4]शोणिएहिं कुम्भे शिन्धुलाअवशा[5]हि कुम्भे दुवे [6]दुवदमच्छाहिव[7]भूलिश्शवशोमदत्तवह्वीअप्पमुहाणं [8]णलिन्दाण अण्णाण वि पाकिदपुलिशाण लुलिमशेहि पुलिदाइ घडशदाइ अशंक्खाइ शन्ति मे गेहे। (क)

राक्षसः—(सपरितोषमालिङ्ग्य।) [9]शाहु शुग्घलिणीए, शाहु। इमिणा दे शुग्घलिणित्तणेण [10]अज्ज उण शामिणीए हिडिम्बादेवीए [11]शविहाणेण प्पणट्ठं मे जम्मदालिद्दम्। (ख)

(क) अरे रुधिरप्रिय, पूर्वसचित त्वमपि जानास्येव। नवसचित शृणु तावत्। भगदत्तशोणितै. कुम्भः सिधुराजवसामि· कुम्भौ द्वौ द्रुपदसुतस्याधिपभूरिश्रव सोमदत्तबाह्लीकप्रमुखाणा नरेन्द्राणामन्येषामपि प्राकृतपुरुषाणा रुधिरमासै पूरितानि घटशतान्यसख्यानि सन्ति मे गेहे।

(ख) साधु सुगृहिणि, साधु। अनेन ते सुगृहिणीत्वेनाद्य पुनः स्वामिन्या हिडिम्बादेव्या. सविधानेन प्रनष्ट मे जन्मदारिद्र्यम्।

राक्षसीवाक्ये। अरे रुधिरप्रिय, पूर्वसचितं जानास्येव त्वम्। नवसचितं शृणु तावत्। भगदत्तशोणितै कुम्भ सिन्धुराजवसामि कुम्भमन्येषा च द्रुपदसुतमत्स्याधिपभूरिश्रव सोमदत्तबाह्लीकप्रमुखाना नरेन्द्राणामन्येषामपि प्राकृतपुरुषाणा रुधिरमासैर्घटशतान्यसख्यातानि सन्ति मे गृहे। अत्र प्राकृत इतरजन॥

राक्षसवाक्ये। साधु सुगृहिणि, साधु। एतेन तव सुगृहिणीत्वेनाद्य पुन स्वा

---

१ 'तुम जेव्व जाणाशि' २ 'पच्चग्गशचिअ' ३ 'दाव' इति क्वचिन्नास्ति ४ 'शोणिअकुम्भे', 'शोणिदेहिं शदकुम्भे' ५ 'वशाकुम्भे दुवे', 'वशाहिं कुम्भशहस्शे' ६. 'दुवद' इति क्वचिन्नास्ति ७ 'भूलिश्शवअङ्गाहिवशोमदत्त—' इति पाठ ८. 'णलिन्दाण पाकिदपुलिशाण अ लुहिलवशामशश्श घडा अविणद्धमुहा शहस्शशक्खा शन्ति मे गेहे', 'णलिन्दाण घडशद अण्णाण वि पइदपुलिशाण वशामशशोणिदेहिं पुनिदा घडआ अण्णाइ बहुआइ अशक्खाइ शन्ति मे गेहे' इति पाठौ ९. 'शाहु शाहु शुग्घलिणीए, शाहु शाहु' इति पाठः. १० 'अज्ज उण' इति क्वचिन्नास्ति. ११. 'शविहाणेण अ प्पणट्ठ मे दालिद्दम्' इति पाठ

राक्षसी—लुहिलप्पिआ, केलिशे शामिणीए शविहाणए किदे। (क)

राक्षसः—[1]वशागन्धे, आणत्ते क्खु हग्गे शामिणीए हिडिम्बादेवीए जह लुहिलप्पिआ अज्जप्पहुदि तुए [2]अज्जउत्तभीमशेणश्श पिट्ठदो-ऽणुपिट्ठ शमले आहिण्डिदव्व त्ति। ता तश्श अणुमग्गगामिणो हअ-माणुशशोणिअणइदशणप्पणट्ठबुभुक्खापिवाशश्श इह एव्व मे शग्गलो-ओ हुवीअदि। तुम वि वीशद्धा भविअ लुहिलवशाहि कुम्भशहश्श शचेहि। (ख)

राक्षसी—लुहिलप्पिआ, किंणिमित्त कुमालभीमशेणश्श [3]पिट्ठदो आहिण्डीअदि। (ग)

(क) रुधिरप्रिय, कीदृश स्वामिन्या सविधान कृतम्।

(ख) वसागन्धे, आज्ञप्त खल्वह स्वामिन्या हिडिम्बादेव्या यथा रुधिर-प्रिय, अद्यप्रभृति त्वया आर्यपुत्रभीमसेनस्य पृष्ठतोऽनुपृष्ठ समर आ-हिण्डितव्यमिति। तत्तस्यानुमार्गगामिनो हतमानुषशोणितनदीदर्शनप्रनष्ट-बुभुक्षापिपासस्येहैव मे स्वर्गलोको भविष्यति। त्वमपि विस्रब्धा भूत्वा रु-धिरवसामि कुम्भसहस्र सचिनु।

(ग) रुधिरप्रिय, किनिमित्त कुमारभीमसेनस्य पृष्ठत आहिण्ड्यते।

मिन्या हिडिम्बादेव्या सविभागेन प्रणष्ट मे जन्मदारिद्र्यम्। अत्र सविभागो नियोग। 'अज्जुणकेण' इति पाठे अद्यतनकेन। एतत्कालीनेनेत्यर्थ॥ **राक्षसीवाक्ये**। अरे रुधिरप्रिय, कीदृशं स्वामिन्या हिडिम्बादेव्या सविभाग कृत॥ **राक्षसवाक्ये**। वसागन्धे, आज्ञप्तोऽस्मि स्वामिन्या हिडिम्बादेव्या। पुत्र रुधिरप्रिय, अद्यप्रभृति त्वया नाथभीमसेनस्य पश्चात्समर आहिण्डितव्यमिति॥ **राक्षसीवाक्ये**। अरे रुधिरप्रिय, किनिमित्त त्वया नाथभीमसेनस्य पश्चात्स-मर आहिण्डितव्यम्॥ **राक्षसवाक्ये**। वसागन्धे, तेन खलु स्वामिना वृको

---

१ 'अज्ज अह शामिणीए हिडिम्बादेवीए शबहुमाण शद्दाविअ आणत्ते। जह लुहिलप्पिआ अज्जप्पहुदि अज्जउत्तभीमशेणश्श' इति बहुपुस्तकाना पाठ.
२ 'अज्जउत्तश्श भीमशेणश्श' ३ 'पिट्ठदोऽणुपिट्ठ'

राक्षसः—वसागन्धे, तेण हि शामिणा [1]विओदलेण दुश्शाशणश्श लुहिल पादु पडिण्णादम् । त च अम्हेहि लक्खशेहि अणुप्पविशिअ [2]पादव्वम् । (क)

राक्षसी—(सहर्षम् ।) शाहु शामिणीए, शाहु । शुशविहाणे मे [3]भत्ता किदे । (ख)

(नेपथ्ये महान्कलकलः [4] ।)

राक्षसी—(आकर्ण्य । [5]सभ्रमम् ।) अले लुहिलप्पिआ, किं णु क्खु एशे महन्ते कलअले [6]शुणीअदि । (ग)

राक्षसः—(दृष्ट्वा ।) [7]वसागन्धे, एशे क्खु धिट्ठज्जुण्णेण दोणे केशेशु आकट्टिअ असिवत्तेण वावादीअदि । (घ)

(क) वसागन्धे, तेन हि स्वामिना वृकोदरेण दुःशासनस्य रुधिरं पातुं प्रतिज्ञातम् । तच्चास्माभी राक्षसैरनुप्रविश्य पातव्यम् ।

(ख) साधु स्वामिनि, साधु । सुसविधानो मे भर्ता कृतः ।

(ग) अरे रुधिरप्रिय, किं नु खल्वेष महान्कलकलः श्रूयते ।

(घ) वसागन्धे, एष खलु धृष्टद्युम्नेन द्रोणः केशेष्वाकृष्यासिपत्रेण व्यापाद्यते ।

दरेण दुःशासनस्य रुधिरं पातुं प्रतिज्ञातम् । तच्चास्माभी राक्षसैरनुप्रविश्य पातव्यम् । ततस्तस्य मार्गानुगामिनो हतमानुषशोणितनदीदर्शनेन प्रणष्टा मे बुभुक्षा पिपासा च । त्वमपि विश्वस्ता भूत्वा रुधिरं वसां मांसं च सचेष्यसीतीहैव सुरलोको भविष्यतीति । अत्र बुभुक्षा भोक्तुमिच्छा । विश्वस्ता विश्वासवती ॥ **राक्षसीवाक्ये** । साधु स्वामिनि, साधु । सुसविभागो मम भर्ता कृतः ॥ **राक्षसीवाक्ये** । अरे रुधिरप्रिय रुधिरप्रिय, उत्तिष्ठोत्तिष्ठ । कुतः खल्वेष महान्कलकलः श्रूयते ॥ **राक्षसवाक्ये** । वसागन्धे, एष खलु द्रोणो धृष्टद्युम्नेन केशेष्वाकृष्य

---

१ 'विओदलेण वच्छत्थलदो दुश्शाशणश्श' इति क्वचित्पाठः २ 'पादव्वं त्ति'. ३ 'भत्ता तुए किदे' इति बहुपुस्तकाना पाठः ४ एतदनन्तरं '(उभावाकर्णयतः ।)' इत्यधिकः पाठो बहुपुस्तकेषु दृश्यते ५ 'सभयम्' ६ 'समुट्ठीअदि' ७ 'हला वसागन्धे'.

राक्षसी—(सहर्षम् ।) [1]लुहिलप्पिआ, एहि । गच्छिअ दोणस्स लुहिलं पिवह्व[2] । (क)

राक्षसः—(सभयम् ।) वशागन्धे, बह्मणशोणिअ क्खु एद गलअ [3]दहन्ते दहन्ते पविशदि । ता किं एदिणा । (ख)

(नेपथ्ये पुन कलकल ।)

राक्षसी—लुहिलप्पिआ, पुणोवि एशे महन्ते कलअले शुणीअदि । (ग)

राक्षसः—(नेपथ्याभिमुखमवलोक्य ।) वशागन्धे, एशे क्खु अश्शत्थामे आकट्टिदाशिवत्ते इदो एव्व आअच्छदि । कदावि दुवदशुदलोशेण अम्हेवि वावादइश्शइ । तों एहि । अतिक्कमह्म । (घ)

(इति निष्क्रान्तौ ।)

प्रवेशक ।

(क) रुधिरप्रिय, एहि । गत्वा द्रोणस्य रुधिर पिबाव ।

(ख) वसागन्धे, ब्राह्मणशोणित खल्वेतद्बल दहद्दहत्प्रविशति । तत्किमेतेन ।

(ग) रुधिरप्रिय, पुनरप्येष महान्कलकलः श्रूयते ।

(घ) वसागन्धे, एष खल्वश्वत्थामाकृष्टासिपत्र इत एवागच्छति । कदाचिद्द्रुपदसुतरोषेणाव्रामपि व्यापादयिष्यति । तदेहि । अतिक्रमाव ।

व्यापाद्यते ॥ **राक्षसीवाक्ये** । तदेहि । द्रोणस्य रुधिर पातु गच्छाव ॥ **राक्षसवाक्ये** । ब्राह्मणरुधिर खल्वेतद्बल दहद्दहत्प्रविशति । तदल ममैतेन ॥ **राक्षसीवाक्ये** । अरे रुधिरप्रिय रुधिरप्रिय, उत्तिष्ठोत्तिष्ठ । पुनरप्येष महान्कलकल. श्रूयते ॥ **राक्षसवाक्ये** । वसागन्धे, एष खल्वश्वत्थामाकृष्टासिपत्र इत. समरभूमिमवतरति ॥ कदाचिद्द्रुपदसुतरोषेणास्मान्राक्षसान्प्रेक्ष्य व्यापादयिष्यति । तदेहि । पलायावहे । अत्रासिपत्र खड्ग । द्रुपदसुतो धृष्टद्युम्न ॥ **राक्षसीवाक्ये** । एव करवाव ॥ **प्रवेशक इति** । 'हीनाभ्यामेव पात्राभ्यामङ्कादौ यत्प्रवर्तते । प्रवेशक स विज्ञेय शौरसेन्यादिभाषया ॥' इति भरत ॥

---

१ 'लुहिलप्पिआ, लुहिलप्पिआ, अह्मे वि गच्छिअ दोणश्श लुहिल पिबह्म' इति बहुपुस्तकाना पाठ २ एतदनन्तर '(उभौ तथा कुरुत ।) राक्षस —(किंचित्पीत्वा ।) वशागन्धे, 'बह्मणशोणिअ क्खु एद' इति क्वचित्पाठो दृश्यते ३ 'दहन्ते पविशदि' ४ 'ता एहि शामिणीए हिडिम्बादेवीए आणत्ति कलेह्म' इति बहुपुस्तकाना पाठ .

(तत प्रविशत्यौकृष्टखड्ग कलकलमाकर्णयन्नश्वत्थामा ।)

अश्वत्थामा—

महाप्रलयमारुतक्षुभितपुष्करावर्तक-
प्रचण्डघनगर्जितप्रतिरवानुकारी मुहु. ।
रवः श्रवणभैरवः स्थगितरोदसीकन्दर.
कुतोऽद्य समरोदधेरयमभूतपूर्वः पुर· ॥ ४ ॥

(विचिन्त्य ।) ध्रुवं गाण्डीविना सात्यकिना वृकोदरेण वा यौवनदर्पादतिक्रान्तमर्यादेन परिकोपितस्तात । यतः समुल्लङ्घ्य शिष्यप्रियतामात्मप्रभावसदृशमाचेष्टते । तथाहि ।

यद्दुर्योधनपक्षपातसदृश युक्तं यदस्त्रग्रहे
रामाल्लब्धसमस्तहेतिगुरुणो वीर्यस्य यत्साम्प्रतम् ।
लोके सर्वधनुष्मतामधिपतेर्यच्चानुरूप रुषं
प्रारब्ध रिपुघस्मरेण नियत तत्कर्म तातेन मे ॥ ५ ॥

(पृष्ठतो विलोक्य ।) तत्कोऽत्र । रथमुपनयतु । अथवालमिदानीं मम रथप्रतीक्षया । सशस्त्र एवास्मि सजलजलधरप्रभाभीषुरेण सुप्रग्रह-

---

महाप्रलयेति । पुष्करावर्तको मेघविशेष । घनं निबिडम् । अनुकारी सदृश । श्रवणभैरव कर्णकटु । स्थगित पिहितम् । द्यावापृथिव्योरन्तरं रोद तदेव कन्दर तस्य वा कन्दरं मध्यम् । 'रोदश्च रोदसी चैव दिवि भूम्नी पृथक्पृथक्' इत्यमर । अभूतपूर्वं न पूर्वं भूत इत्यर्थ । सुप्सुपेति समास ॥ ४ ॥ **यदुर्योधनेति** । आचेष्टते करोति । यदिति सर्वत्र यच्छब्देनाग्रे वक्ष्यमाण कर्माभिधीयते । पक्षपातो गौरवम् । रामात्परशुरामात् । हेतिरस्त्रम् । गुरुणोऽधिकस्य । साम्प्रत युक्तम् । धनुष्मता प्रशस्तधनुर्धराणाम् । अधिपतेस्तस्य रोषस्य यदनुरूपमित्यन्वय । घस्मरो भक्षक । 'भक्षको घस्मरोऽग्रर' इत्यमर ॥ ५ ॥ भानुमतीवेणीसंहारे । 'भञ्जभासमिदो घुरच्' इति घुरच्प्रत्यय । सुप्रग्रह सुष्ठु ग्रहणं

---

१ 'उत्क्रान्तखड्ग:' २ 'कृतानुकारी', ३ 'अभूतपूर्वध्रुव ', 'अभूतपूर्व ध्रुवः', 'अभूतपूर्व श्रुत ' ४ 'दर्पातिक्रान्त—' ५ 'कोपित ' ६ 'यत ' इति क्वचिन्नास्ति. ७ 'आत्मसदृशभावम्' ८ 'धैर्यस्य', ९ 'अभिमतम्' १० 'कुरु', ११ '(पृष्ठतो विलोक्य ।) तल्लमिदानीं मम रथप्रतीक्षयानया' इति पाठ. १२ 'चास्मि', 'स्यादस्मि' १३ 'भास्वरेण'. १४. 'सुप्रभविमलकलधौतसपादितत्सरुणा खड्गेन' इति पाठ.

विमलकलधौतत्सरुणामुना खड्गेन । [1]यावत्समरभुवमवतरामि । (परिक्रम्य वामाक्षिस्पन्दनं सूचयित्वा ।) [3]अये, ममापि नामाश्वत्थाङ्ग समरमहोत्सवप्रमोदनिर्भरस्य तातविक्रमदर्शनलालसस्यानिमित्तानि समरगमनविघ्नमुत्पादयन्ति । भवतु । [3]गच्छामि । (सावष्टम्भं परिक्रम्याग्रतो विलोक्य ।) कथमेवधीरितक्षात्रधर्माणामुज्झितसत्पुरुषोचितलज्जावगुण्ठनाना विस्मृतस्वामिसत्कारलघुचेतसा [6]द्विरदतुरङ्गमचरणचारिणामगणितकुलयश - सदृशपराक्रमव्रताना [7]रणभूमे समन्तादपक्रामतामय महान्नादो बलानाम् । (निरूप्य ।) [9]हा हा धिक्कष्टम् । कथमेते महारथा कर्णादयोऽपि [11]समरात्पराङ्मुखा भवन्ति । [12]कथ नु तताधिष्ठितानामपि बलानामियमवस्था भवेत् । भवतु [13]सस्तम्भयामि । भो भो कौरवसेनासमुद्रवेलापरिपालनमहामहीधरा नरपतय , कृत कृतममुना [14]समरपरित्यागसाहसेन ।

यदि समरमपास्य नास्ति मृत्यो-
र्भयमिति युक्तमितोऽन्यत प्रयातुम् ।

रश्मिर्वा । 'हयादिरश्मौ रश्मौ च प्रग्रह सग्रहेऽपि च' इति विश्व । कलधौत सुवर्णम् । 'त्सरु खड्गादिमुष्टौ स्यात्' इत्यमर । नाम सभावनायाम् । अनिमित्तानीति कर्तृपदम् । उज्झित त्यक्त लज्जैवावगुण्ठनमुपरिवस्त्र यैस्तैषाम् । चारीति ताच्छीलिको णिनि । अपक्रामता पलायमानानाम् । 'अपक्रमोऽपयान स्यात्' इत्यमर । 'हा हा शोकेऽपि निन्दायाम्' इति । 'वेला तत्तीरनीरयो' इत्यमर । महीधरो गिरि । कृत्र निष्फलम् । 'कृत क्लीब तु निष्फले' इति विश्व ॥ **यदीति** । अपास्य त्यक्त्वा । मृत्योर्मरणाद्यमाद्वा । इत समरात् ।

---

१ 'तावत्' २ 'आ कथम्', 'कथम्' ३ 'अवगच्छामि' ४ 'अवधीरितसकलक्षात्र–' ५ 'उत्सृष्ट–' ६ 'त्यक्तद्विरद' ७ 'वय ' ८ 'रणभूमे समन्तादपक्रामतामस्तत्सेनाभटानामय महान्निनाद ', 'रणभूमे पराक्रामतामय महान्नादो बलानाम्' इति वा पाठ ९ 'पुनरवलोक्य', 'अन्यतोऽवलोक्य' १० 'अहह धिक्कष्टम्', 'धिक्कष्टम्' ११ 'सङ्ग्रामात्पराङ्मुखीभवन्ति' १२ 'कथ नु' इत्यसात्पूर्वं '(साशङ्कम् ।)' इत्यधिक क्वचित् १३ 'सस्तम्भयामि' इत्यत्र 'एव तावत्' इति बहुपुस्तकेषु पाठ १४ 'अमुना' इति क्वचिन्नास्ति

अथ मरणमवश्यमेव जन्तोः
किमिति मुधा मलिन यश. कुरुध्वे[1] ॥ ६ ॥

अपि च ।

अस्त्रज्वालावलीढप्रतिबलजलधेरन्तरौर्वायमाणे
सेनानाथे स्थितेऽस्मिन्मम पितरि गुरौ सर्वधन्वीश्वराणाम् ।
कर्णाल सभ्रमेण व्रज कृप समरं मुञ्च हार्दिक्य शङ्का
ताते चापद्वितीये वहति रेणधुरं[2] को भयस्यावकाश ॥ ७ ॥

(नेपथ्ये ।)
कुतोऽद्यापि ते तात. ।

अश्वत्थामा—(श्रुत्वा ।) किं ब्रूथ—'कुतोऽद्यापि ते तात' इति । (सरोषम्[3] ।) आ क्षुद्रा भीरव[4], कथमेव प्रलपता वः सहस्रधा न दीर्णमनया[5] जिह्वया ।

दग्धु विश्व दहनकिरणैर्नोदिता द्वादशार्का
वाता वाता दिशि दिशि न वा सप्तधा सप्त भिन्ना. ।
छन्न मेघैर्न गगनतल पुष्करावर्तकाद्यै
पापं पापाः कथयत कथ शौर्यराशेः पितुर्मे ॥ ८ ॥

अन्यतोऽन्यत्र । अथ पक्षान्तरे । मुधा विफलम् ॥ ६ ॥ **अस्त्रेति** । अस्त्रमेव ज्वाला तेनावलीढ आक्रान्त प्रतिबलजलधिस्तस्य मध्य और्वायमाणे वडवानल इवाचरति सति । सभ्रमेण भयेन । हार्दिक्यो योधविशेष । शङ्का मुञ्च ॥ ७ ॥ इह श्लोके युक्तिरलकार । 'अर्थावधारण यत्तु प्रमाणाद्युक्तिरुच्यते' इति भरत । अन्यदीयप्रौढ्यतिशयरूपा गर्भसधिरियम् । यदाह—'स्वीयान्यदीयभेदेन प्रौढि-वाक्यमुदाहृति' ॥ वो युष्माकम् ॥ **दग्धुमिति** । दहनकिरैरग्निकिरणै । न वाता न गतिमन्त. । वाता इति । 'वा गतिगन्धनयो' क्त । सप्तधा सप्तप्रकारेण भिन्ना सप्त । तथा चोनपञ्चाशत् । पापं मरणरूपम् । हे पापा पा-

---

१. 'कुरुध्वम्', 'क्रियेत'. २ 'रणधुराम्' ३ 'सरोषम् ।' इति क्वचिन्नास्ति ४. 'समरभीरव' ५ 'विदीर्णम्'

(प्रविश्य सभ्रान्त सप्रहार[1] ।)

सूतः—परित्रायता परित्रायता कुमार । (इति पादयो[2] पतति ।)

अश्वत्थामा—(विलोक्य ।)अये, कथं[3] तातस्य सारथिरश्वसेन[4]।आर्य, ननु त्रैलोक्यत्राणक्षमस्य सारथिरसि । किं मत्तः[5] परित्राणमिच्छसि ।

सूतः—(सकरुणम्[6] ।) कुतोऽद्यापि[7] ते तातः[8] ।

अश्वत्थामा—(सावेगम् ।) किं तातो नामास्तमुपगत ।

सूतः—अथ किम् ।

अश्वत्थामा—हा[9] तात, (इति मोहमुपगत ।)

सूतः—कुमार, समाश्वसिहि समाश्वसिहि ।

अश्वत्थामा—(लब्धसञ्ज्ञ[10] सास्रम् ।) हा तात, हा सुतवत्सल, हा लोकत्रयैकधनुर्धर, हा जामदग्न्यास्त्रसर्वस्वप्रतिग्रहप्रणयिन्, क्वासि[11] । प्रयच्छ मे प्रतिवचनम् ।

सूतः—कुमार[12], अलमत्यन्तशोकावेगेन । वीरपुरुषोचिता विपत्तिमुपगते पितरि त्वमपि तदनुरूपेणैव वीर्येण शोकसागरमुत्तीर्य सुखी भव ।

अश्वत्थामा—(अश्रूणि विमुच्य[13] ।) आर्य, कथय कथय कथं तादृग्भुजवीर्यसागरस्तातोऽपि नामास्तमुपगत ।

पिष्टा ॥ ८ ॥ प्रतिग्रहो ग्रहणम् ॥ **किं शिष्यादिति** । शिष्याद्भीमात् । गुरुदामेव गुरुदक्षिणाम् । भीम प्रियो मित्र यस्य स तात । अन्तेवासी शिष्य ।

---

१ 'सप्रहार' इति क्वचिन्नास्ति २ 'पादयो पतति' इत्यत्र 'आत्मान पातयति' इति क्वचित्पाठ ३ 'कथ' इति क्वचिन्नास्ति ४ 'तातसारथि' ५ 'आर्य आर्य, ननु त्रैलोक्यत्राणक्षमस्य', 'आर्य, त्रैलोक्यत्राणक्षमस्य तातस्य' इति वा पाठ ६ 'मत्त शिशुजनात्' ७ '(उत्थाय । सकरुणम् ।)',(सास्रम्।)' ८ 'कुमार, कुतोऽद्यापि' इति क्वचित्पाठा ९ 'तात एव नास्ति' इति क्वचित्पाठ १० 'हा तात, हा तात,(इति मोहमुपगम्य पतित ।)'इति पाठ ११ '(लब्धसञ्ज्ञ उत्थाय । सास्रम् ।)' १२ 'क्वासि । प्रयच्छ मे प्रतिवचनम्' इति क्वचिन्नास्ति १३ 'कुमार' इति क्वचिन्नास्ति, क्वचित् 'कुमार' इत्यत्र 'आयुष्मन्' इति पाठो वर्तते १४. 'प्रमृज्य'

किं शिष्याद्गुरुदक्षिणा गुरुगदा भीमप्रिय प्राप्तवान्

सूतः—शान्त पापम् ।

अश्वत्थामा—

अन्तेवासिदयालुरुज्झितनयेनासादितो जिष्णुना ।

सूतः—कथमेव भविष्यति ।

अश्वत्थामा—

गोविन्देन सुदर्शनस्य निशितं धारापथं प्रापित.

सूतः—एतदपि नास्ति ।

अश्वत्थामा—

शङ्के नापदमन्यत खलु गुरोरेभ्यश्चतुर्थादहम् ॥ ९ ॥

सूतः—कुमार,

एतेऽपि तस्य कुपितस्य महास्त्रपाणेः
किं धूर्जटेरिव तुलामुपयान्ति सख्ये ।
शोकोपरुद्धहृदयेन यदा तु शस्त्र
त्यक्त तदास्य विहित रिपुणातिघोरम् ॥ १० ॥

अश्वत्थामा—किं पुन. कारण शोकस्यास्त्रपरित्यागस्य वा ।

सूतः—ननु कुमार एव कारणम् ।

अश्वत्थामा—कथमहमेव नाम ।

तद्विषये दयालुर्दयायुक्त । जिष्णुनार्जुनेन । सुदर्शनो हरिचक्रम् । 'चक्र सुदर्शन' इत्यमर । अन्यतोऽन्यस्मात् । खलु निश्चये ॥ ९ ॥ **एतेऽपीति** । एते भीमार्जुनकृष्णा । सख्ये सङ्ग्रामे । धूर्जटेर्हरस्य । हृदयेनेत्याचार्यविशेषणम् । अस्माचार्यस्य । अतिघोर विनाश ॥ १० ॥ अस्त्र काण्डादि । शस्त्र खड्गादि । इत्यनयोर्विशेष । 'असु क्षेपणे' । 'शसु हिंसायाम्' । औणादिक ष्ट्रन् प्रत्यय ॥

---

१ 'भीमात्' २. 'गुरुगदात्' ३ 'शान्त पाप शान्त पापम्' इति क्वचित्पाठः ४ 'उज्झितदयेन' ५ 'नियत' ६ 'तदैव विहित' ७ 'नाम' इति क्वचिन्नास्ति

सूतः—श्रूयताम् । (अश्रूणि विमुच्य ।)

अश्वत्थामा हत इति पृथासूनुना स्पष्टमुक्त्वा
स्वैर [1]शेषे गज इति किल व्याहृत सत्यवाचा ।
तच्छ्रुत्वासौ दयिततनय प्रत्ययात्तस्य राज्ञ
शस्त्राण्याजौ नयनसलिलं [2]चापि तुल्य मुमोच ॥ ११ ॥

*** अश्वत्थामा**—हा तात, हा सुतवत्सल, हा वृथामदर्थपरित्यक्तजीवित, हा शौर्यराशे, हा शिष्यप्रिय, हा युधिष्ठिरपक्षपातिन्, (इति रोदिति ।)

सूतः—कुमार, अलमत्यन्तपरिदेवनयाकार्पण्येन ।

अश्वत्थामा—

श्रुत्वा वध मम मृषा [3]सुतवत्सलेन
तात त्वया सह शरैरसवो विमुक्ता ।
जीवाम्यह [4]पुनरहो भवता विनापि
क्रूरेऽपि तन्मयि मुधा तव पक्षपात ॥ १२ ॥

([5]इति मोहमुपगत ।)

सूतः—समाश्वसितु समाश्वसितु कुमार ।

(तत प्रविशति [6]कृप ।)

कृपः—([7]सोद्वेग नि श्वस्य ।)

अश्वत्थामेति । पृथासूनुना युधिष्ठिरेण । स्वैरमल्पम् । शेषे । वचनस्येति शेषः । किल निश्चये । व्याहृतमुक्तम् । असावाचार्य । दयित प्रियस्तनय पुत्रो यस्य स तथा । प्रत्ययात्प्रतीते । आजौ सङ्ग्रामे । शस्त्राणि मुमोचापि तुल्य धनु समकालं नयनसलिल च मुमोचेत्यन्वय ॥ ११ ॥ इहाभूताहरणरूपा गर्भसधि । यदाह—'उक्त युक्त तु यद्वाक्यमभूताहरण तु तत्' इति । अश्वत्थामा गजनाम ॥ **श्रुत्वेति** । असव प्राणा ॥ १२ ॥ **ततः प्रविशति कृप इति** । अत्र सूचनाव्यतिरेकेणैव प्रवेश इति प्रवेशे सूचना व्यभिचरतीत्यवधेयम् ॥

---

१ 'शेते' २ 'चेति' ३. 'सुतवत्सलेन' ४ 'पुनरय भवता विमुक्त' इति पाठ ५. '(इति मूर्च्छति ।)', '(इति मूर्च्छित पतति ।)' ६ 'सोद्वेग' कृप' ७ '(सोद्वेग नि श्वस्य ।)' इति क्वचिन्नास्ति

धिक्सानुजं कुरुपतिं धिगजातशत्रुं
धिग्भूपतीन्विफलशस्त्रभृतो धिगस्मान् ।
केशग्रहः खलु तदा द्रुपदात्मजाया
द्रौणस्य चाद्य लिखितैरिव वीक्षितो यैः ॥ १३ ॥

तत्कथ नु खलु वत्सं[1]मद्य द्रक्ष्याम्यश्वत्थामानम् । अथ वा हिमवत्सार-गुरुचेतसि ज्ञातलोकस्थितौ तस्मिन्न खलु शोकावेगमहमाशङ्के । किं तु [2]पितु. परिभवमसदृशमुपश्रुत्य न जाने किं व्यवस्यतीति । अथवा

[3]एकस्य तावत्पाकोऽय दारुणो भुवि वर्तते ।
केशग्रहे द्वितीयेऽस्मिन्नून नि शेषिताः प्रजा ॥ १४ ॥

(विलोक्य ।) तदय वत्सस्तिष्ठति । यावदुपसर्पामि । (उपसृत्य ससभ्रमम् ।) [4]वत्स, समाश्वसिहि समाश्वसिहि ।

अश्वत्थामा—(सञ्ज्ञां लब्ध्वा । सास्रम् ।) हा तात, हा सकलभुवनै-कगुरो, (आकाशे ।) युधिष्ठिर, युधिष्ठिर,

आजन्मनो न वितथं भवता किलोक्तं
न द्वेक्षि यज्जनमतस्त्वमजातशत्रु ।
तातें गुरौ द्विजवरे मम भाग्यदोषा-
त्सर्वं तदेकपद एव कथ निरस्तम् ॥ १५ ॥

धिक्सानुजमिति । सानुजमिति धिग्योगे द्वितीया । अजातशत्रु युधिष्ठिरम् । खलु प्रसिद्धौ निश्चये वा । द्रौपद्या केशग्रहस्तदाद्य द्रोणस्य च यैर्वीक्षित इत्यन्वय ॥ १३ ॥ हिमवत्सारं हिमालयबलम् । स्थिति स्थैर्यम् । तस्मिन्नश्वत्थामनि । व्यव-स्यति करोति । **एकस्येति** । एकस्य केशग्रहस्य । तावच्छब्द उपक्रमे । नि शेषिता विनष्टा ॥ १४ ॥ इहाक्षिप्तरूपा गर्भसधि । यदाह—'बीजस्योच्छेदन यत्तु तदा-क्षिप्तमुदीरितम्' ॥ **आजन्मन इति** । आजन्मनो जननादारभ्य । वित-थमसत्यम् । किल प्रसिद्धौ । यत्त्वं जनं न द्वेक्षि द्वेषवन्त न करोषि ॥ १५ ॥

---

१ 'अद्य' इति पुस्तकान्तरे नास्ति. २ 'असदृश पितु पराभवमुपश्रुत्य' इति पाठ ३ 'एकस्यैव विपाकोऽय' इति पाठ. ४ '(विभाव्य ।)' ५ 'वत्स, समाश्वसिहि'. ६ '(लब्धसज्ञ सास्रम् ।)' इति पाठ

सूतः—[1]कुमार, एष ते मातुल पार्श्वे शारद्वतस्तिष्ठति ।

अश्वत्थामा—(पार्श्वे विलोक्य । सबाष्पम् ।) मातुल,

गतो [2]येनाद्य त्व सह रणभुव सैन्यपतिना
य एक शूराणा गुरुसमरकण्डूनिकषण ।
परीहासाश्चित्रा सततमभवन्येन भवत·
स्वसु श्लाघ्यो भर्ता क नु खलु स ते मातुल गत ॥ १६ ॥

कृपः—[3]परिगतपरिगन्तव्य एव भवान् । तदलमत्यन्तशोकावेगेन ।

अश्वत्थामा—मातुल, परित्यक्तमेव मया [4]परिदेवितम् । एषोऽह सुतवत्सल तातमेवानुगच्छामि ।

कृपः—वत्स, [5]अनुपपन्नमीदृश व्यवसित भवद्विधानाम् ।

सूतः—[6]कुमार, अलमतिसाहसेन ।

अश्वत्थामा—[7]आर्य शारद्वत,

मद्वियोगभयात्तात· परलोकमितो गतः ।
[8]करोम्यविरह तस्य वत्सलस्य सदा पितु ॥ १७ ॥

कृपः—वत्स, यावदय ससारस्तावत्प्रसिद्धैवेय लोकयात्रा यत्पुत्रैः पितरो लोकद्वयेऽप्यनुवर्तनीया इति । पश्य ।

शारद्वत कृप ॥ **गत इति** । कण्डूनिकषण कण्डूनिवारण । हे मातुल, ते स्वसुर्भगिन्या भर्ता । खलु प्रश्ने । क कुत्र ॥ १६ ॥ परिगत ज्ञात परिगन्तव्य ज्ञापनीय येन स तथा । परिदेवित विलाप ॥ **मदिति** । अविरह समाजम् (?)॥ १७ ॥ लोकद्वये इहलोके परलोके च ॥ **निवापेति** । 'पितृदान निवाप स्यात्' इत्यमर ।

---

१ 'आयुष्मन्ननु' २ 'येनासि' ३ 'परिगत परिगन्तव्यमेवात्रभवान्' इति पाठ ४ 'परिदेवनम्' ५ 'अनुपपन्नमिद भवद्विधानाम्', 'अनुपपन्नमीदृश भवद्विधानाम्', 'अनुपपन्न भवद्विधानामिदम्' इति पाठान्तराणि ६ 'वत्स' ७ 'आर्य, किमुच्यते' इति बहुपुस्तकाना पाठ ८ 'करोमि विरह तस्य वत्सलस्य कथ पितु' इति पाठ

निवापाञ्जलिदानेन केतनै[1] श्राद्धकर्मभि ।
तस्योपकारे शक्तस्त्व किं जीवन्किमुतान्यथा ॥ १८ ॥

सूतः—आयुष्मन्, यथैव[2] मातुलस्ते शारद्वत कथयति तत्तथा ।

अश्वत्थामा—आर्य, सत्यमेवेदम् । किं त्वतिदुर्वहत्वाच्छोकभारस्य न शक्नोमि[3] ताताविरहित क्षणमपि प्राणान्धारयितुम् । तद्गच्छामि तमेवोद्देश यत्र तथाविधमपि[4] पितर द्रक्ष्यामि । (उत्तिष्ठन्खड्गमालोक्य विचिन्त्य ।) कृतमद्यापि[5] शस्त्रग्रहणविडम्बनया[6] । भगवन् शस्त्र,

गृहीत येनासी परिभवभयान्नोचितमपि[7]
प्रभावाद्यस्याभून्न खलु तव कश्चिन्न विषय[8] ।
परित्यक्तं तेन त्वमसि सुतशोकान्न तु भया-
द्विमोक्ष्ये शस्त्र त्वामहमपि यत स्वस्ति भवते ॥ १९ ॥

(इत्युत्सृजति ।)

(नेपथ्ये ।)

भो भो राजान, कथमिह भवन्त सर्वे[9] गुरोर्भारद्वाजस्य परिभवममुना नृशंसेन प्रयुक्तमुपेक्षन्ते ।

निवापाञ्जलिर्जलाञ्जलि । केतनैर्गृहै. । उताऽन्यथाऽजीवन्वा किम् । अपि तु जीवता जलादिदानमेव क्रियत इति भाव ॥ १८ ॥ तथाविध मृतम् ॥ **गृहीतमिति** । येनाचार्येण । यस्याचार्यस्य । तव विषय कश्चिन्नाभूदेव न खलु । सर्व एव विषयोऽभूदित्यर्थ । विमोक्ष्ये त्यक्ष्यामि । अतो भवते स्वस्त्यस्तु । स्वस्तियोगे 'नम स्वस्ति–' इत्यादिना चतुर्थी ॥ १९ ॥ उत्सृजति त्यजति । भारद्वाजस्य द्रोणस्य । नृशसेन पापवता । 'नृशसो घातुक क्रूर पाप' इत्यमर ॥

---

१ 'वितानै' २ 'यदाह शारद्वत ।', 'यथाह शारद्वत ।', 'यथा ते मातुल कथयति तथैवैतत् ।' इति नानाविध पाठ ३ 'तादृशमपि' ४ 'अलमद्यापि शस्त्रग्रहणविधया' इति पाठ ५ एतदनन्तर '(सास्रमञ्जलिं बद्ध्वा)' इति क्वचिदधिक पाठ ६ 'नोचितमिति', ७. 'आसीत्' ८ '(इति परित्यक्तुमिच्छति ।)' ९. 'भवन्त सर्वे गुरो परिभवममुना नृशसेन प्रयुक्तमत्रभवतो भारद्वाजस्योपेक्षन्ते', 'भवन्तस्तत्रभवत क्षत्रियगुरोर्भारद्वाजस्यासदृश परिभवममुना नृशसेन प्रयुक्तमुपेक्षन्ते' इति पाठौ.

अश्वत्थामा—(आकर्ण्य । शनैः शनैः शस्त्रं स्पृशन् ।) [1]किं गुरोर्भार-द्वाजस्य परिभवः ।

(पुनर्नेपथ्ये ।)

आचार्यस्य त्रिभुवनगुरोर्न्यस्तशस्त्रस्य शोका-
द्द्रोणस्याजौ नयनसलिलक्षा[3]लितार्द्राननस्य ।
मौलौ पाणिं पलितधवले न्यस्य कृत्वा नृशंस
धृष्टद्युम्न स्वशिबिरमयं याति सर्वं सहध्वम् ॥ २० ॥

(सक्रोधं सकम्पं च कृपसूतौ दृष्ट्वा ।) किं नामेदम् ।

प्रत्यक्षमात्तधनुषा मनुजेश्वराणा
प्रायोपवेशसदृशं व्रतमास्थितस्य ।
तातस्य मे पलितमौलिनिरस्तकाशे
व्यापारितं शिरसि शस्त्रमशस्त्रपाणेः ॥ २१ ॥

कृपः—वत्स, एवं किल जनः कथयति ।

अश्वत्थामा—किं तातस्य दुरात्मना परिमृष्टमभूच्छिरः ।

सूतः—(सभयम् ।) कुमार, आसीदयं तस्य तेजोराशेर्देवस्य नवः परिभवावतारः ।

अश्वत्थामा—हा तात, हा पुत्रप्रिय, मम मन्दभागधेयस्य कृते शस्त्रपरित्यागात्तथाविधेन क्षुद्रेणात्मा परिभावितः । अथ वा

आचार्यस्येति । न्यस्तः त्यक्तम् । 'पलितं जरसा शौक्ल्यम्' इत्यमरः । नृशंस विनाशम् । 'विनाशेऽपि नृशंसः स्यात्' इति हारावली ॥ २० ॥ **प्रत्यक्षमिति** । आत्तं गृहीतम् । नृपाणां प्रत्यक्षं समक्षम् । प्रायोपवेशः उपवासार्थ-मुपवेशनम् । तत्सदृशं च यथा स्यादेवम् । तत्रापि निष्क्रियेणोपविश्यते । इहापि तथेति भावः । पलितो जराशुक्लो यो मौलिर्धम्मिल्लस्तेन निरस्तो जित काश काशकुसुमं येन तत्र । 'मौलिः किरीटे धम्मिल्ले' इति विश्वः ॥ २१ ॥

---

१ '(आकर्ण्य । सक्रोधं शनैः खड्गं स्पृशन् ।)' इति क्वचित्पाठः २ 'किं किं', 'किं नु' ३ 'क्षालितार्धाननस्य' ४ 'शममास्थितस्य' ५ 'निमीलिताक्षैः' ६ 'मन्दभाग्यस्य' ७. '(विचिन्त्य ।) अथ वा' इति क्वचित्पाठः

परित्यक्ते देहे रणशिरसि शोकान्धमनसा
शिर[1] श्वा काको वा द्रुपदतनयो वा परिभृशेत् ।
[2]असह्यातास्रौघद्रविणमदमत्तस्य च रिपो-
[3]र्ममैवाय पाद शिरसि निहितस्तस्य न कर[4] ॥ २२ ॥

आ दुरात्मन्पाञ्चालापसद,

तात शस्त्रग्रहणविमुख निश्चयेनोपलभ्य
त्यक्त्वा शङ्का खलु[5] विदधत पाणिमस्योत्तमाङ्गे ।
अश्वत्थामा करधृतधनु पाण्डुपाञ्चालसेना-
तूलोत्क्षेपप्रलयपवन किं न यात स्मृतिं ते ॥ २३ ॥

युधिष्ठिर, युधिष्ठिर, अजातशत्रो, अमिथ्यावादिन्, धर्मपुत्र, सानुजस्य ते किमनेनापकृतम् । अथ वा किमनेनालीकप्रकृतिजिह्मचेतसा । [6]अर्जुन, सात्यके, बाहुशालिन्वृकोदर, माधव, युक्त नाम भवता सुरासुरमनुजलोकैकधनुर्धरस्य द्विजन्मन परिणतवयस. सर्वाचार्यस्य विशेषतो मम पितुरमुना द्रुपदकुलकलङ्केन मनुजपशुना स्पृश्यमानमुत्तमाङ्गमुपेक्षितुम् । अथ वा सर्व एवैते पातकिन । किमेतै ।

परित्यक्त इति । मनसा स्वयेति शेष । श्वा कुक्कुर । असह्यौघ एव द्रविण धन तेन मदो गर्वस्तदेव मद्य वा तस्य । मितु शिरसि करो न निहित । किंतु ममैव शिरसि पादो निहित इत्यन्वय ॥ २२ ॥ **तातमिति** । उपलभ्य ज्ञात्वा । शङ्का शत्रुकृतमारणादिशङ्काम् । खलु प्रसिद्धौ । 'उत्तमाङ्ग शिर शीर्षम्' इत्यमर । अश्वत्थामा तव स्मृतिं किं न यात ॥ २३ ॥ अजातशत्रुणा किम् । अपि तु न किमपि । कीदृशेन । अलीकेनासत्येन । इतरजनवत्कुटिल चेतो यस्य तेन ॥

---

१ 'शोकान्धमनस', 'शोकार्तमनसा' २ 'स्फुरद्दिव्यास्रौघद्रविणमदमत्तस्य च रिपो' 'असह्यातास्रौघद्रविणमदलेशस्य रिपुणा' इति वा पाठ ३ 'मयैव' ४ 'तस्य सहसा' ५ 'जड, विदधत' ६ 'अर्जुन, अर्जुन सात्यके, सात्यके' इति क्वचित्पाठ. ७ 'भवता सुरासुरमनुजगुरोर्लोकत्रयैकधनुर्धरस्य' इति क्वचित्पाठ

कृतमनुमत दृष्ट वा यैरिद गुरुपातकं
मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधै ।
नरकरिपुणा सार्धं तेषा सभीमकिरीटिना-
मयमहमसृङ्मेदोमासै करोमि दिशा बलिम् ॥ २४ ॥

कृपः—वत्स, किं न सभाव्यते भारद्वाजतुल्ये बाहुशालिनि दिव्यास्त्रग्रामकोविदे भवति ।

अश्वत्थामा—भो भो पाण्डवमत्स्यसोमकमागधेया क्षत्रिय-यापसदा ,

पितुर्मूर्ध्नि स्पृष्टे ज्वलदनलभास्वत्परशुना
कृत यद्रामेण श्रुतिमुपगत तन्न भवताम् ।
किमद्याश्वत्थामा तदरिरुधिरासारविघस
न कर्म क्रोधान्ध प्रभवति विधातु रणमुखे ॥ २५ ॥

सूत, गच्छ त्व सर्वोपकरणै साङ्गामिकै सर्वायुधैरुपेत मेहाहव-लक्षण नामास्मत्स्यन्दनमुपनय ।

सूतः—यदाज्ञापयति कुमार । (इति निष्क्रान्त ।)

कृपः—वत्स, अवश्यप्रतिकर्तव्येऽस्मिन्दारुणे निर्कारामौ सर्वे-षामस्माक कोऽन्यस्त्वामन्तरेण शक्तः प्रतिकर्तुम् । किं तु—

अश्वत्थामा—किमत परम् ।

कृतमिति । नरकरिपु कृष्ण । असृग्रक्तम् । मेदो मज्जा । बलिमुपहारम् । 'बलि पूजोपहारयो' इति शाश्वत ॥ २४ ॥ ग्राम सघ । कोविद पण्डित ॥ **पितुरिति** । पितुर्मूर्ध्नि द्रुपदेन स्पृष्टे सति । यद्रामेण परशुरामेण कृत क्षत्रियजनघा-तादिक तद्भवता किं श्रुतिपथ न गतम् । अश्वत्थामा किमद्यापि तत्कर्म विधातु न प्रभवति । अपि तु प्रभवत्येव । विघसो भोजनविशेष । 'अमृत विघसो यज्ञशेष भोजनशेषयो' इत्यमर ॥ २५ ॥ निकारस्य परिभवस्य । 'निकार स्यात्परिभव'

---

१ 'पतिभि' २ 'न किंचिन्न सभाव्यते' ३ 'मागधाद्या क्षत्रिया' ४ 'सूत' इत्यसाल्पूर्व '(सूतमुद्दिश्य ।) इति क्वचिदधिक पाठ ५ 'आहितलक्षण' ६ 'उपा-हर' ७ 'यथाज्ञापयति' ८ 'परिभवाग्नौ' ९ 'किं तु' इति क्वचिन्नास्ति

कृपः—सैनापत्येऽभिषिच्य[1] भवन्तमिच्छामि समरभुवमवतारयितुम् ।

अश्वत्थामा—मातुल, परतन्त्रमिदमकिंचित्करं च ।

कृपः—वत्स, न खलु परतन्त्रे नाकिंचित्कर च । पश्य ।

भवेद्[2]भीष्ममद्रोण धार्तराष्ट्रबल कथम् ।
यदि तत्[3]तुल्यकक्षोऽत्र भवान्धुरि न युज्यते ॥ २६ ॥

कृतपरिकरस्य भवादृशस्य त्रैलोक्यमपि न क्षम परिपन्थीभवितुं किं पुनर्यौधिष्ठिरं[4]बलम् । तेदेव मन्ये परिकल्पिताभिषेकोपकरण कौरवराजो नचिरात्त्वामेवाभ्यपेक्षमाणस्तिष्ठतीति[5] ।

अश्वत्थामा—यद्येव त्वरते मे परिभवानलदह्यमानमिद चेतस्तत्प्रतीकारजलावगाहनाय[6] । तदहं गत्वा तातवधविषण्णमानस कुरुपतिं सैनापत्यस्वयग्रहणप्रणयसमाश्वासनया[7] मन्दसताप करोमि[8] ।

कृपः—वत्स, एवमिदम् । अतस्तमेवोद्देश गच्छाव ।

(इति परिक्रामत ।)

(ततः प्रविशत कर्णदुर्योधनौ ।)

दुर्योधनः—अङ्गराज,

तेजस्वी रिपुहतबन्धुदुःखपारं
बाहुभ्या व्रजति धृतायुधध्रुवाभ्याम् ।
आचार्य सुतनिधन निशम्य सख्ये
किं शस्त्रग्रहसमये विशस्त्र आसीत् ॥ २७ ॥

इति विश्व । सेनापतेर्भाव सैनापत्यम् ॥ **भवेदिति** । धृतराष्ट्रबल कथ भवेत् । किं भवेदित्यर्थ । अत्र धुरि धुरायाम् ॥२६॥ परिकर पुरस्कार । उद्देश प्रदेशम् ॥ **तेजस्वीति** । तेजस्वी पुरुष पार बाहुभ्या व्रजतीत्यन्वय । ध्रुव कोल ।

---

१ 'अभिषिक्तमत्रभवन्त', 'अभिषिक्त भवन्त' २ 'भवेदभीष्मद्रोण हि धृतराष्ट्रबल' ३ 'तत्तुल्यकक्षोऽत्रभवान्धुर्यो न युज्यते', 'तत्तुल्यकक्षोऽत्रभवान्धुर्यो नियुज्यते' इति पाठौ ४ 'युधिष्ठिरबलम्' ५ 'अह च मन्ये', 'एव च मन्ये' ६. 'अभ्युदीक्षमाण', 'प्रतीक्षमाण', 'कौरवानथो भवन्तमुद्वीक्षते' इत्यपि क्वचित्पाठ ७ 'तातवधविपन्नमनस' ८. '(तत प्रविशति राजा कर्णश्च ।)' इति क्वचित्पाठ ।

अथवा सूक्तमिदमभियुक्तै प्रकृतिर्दुस्त्यजेति । यत शोकान्धमनसा तेन विमुच्य क्षेत्रधर्मकार्कश्य द्विजातिधर्मसुलभो दैन्यपरिग्रह कृत ।

कर्णः—राजन्, न खल्विदमेवम् ।

दुर्योधनः—कथ तर्हि ।

कर्णः—एव किलास्याभिप्रायो यथाश्वत्थामा मया पृथिवीराज्येऽभिषेक्तव्य इति । तस्याभावाद्वृद्धस्य मे ब्राह्मणस्य वृथा शस्त्रग्रहणमिति तथा कृतवान् ।

दुर्योधनः—(सशिर कम्पम् ।) एवमिदम् ।

कर्णः—एतदर्थ च कौरवपाण्डवपक्षपातप्रवृत्तमहासङ्ग्रामस्य राजकस्य परस्परक्षयमपेक्षमाणेन तेन प्रधानपुरुषवध उपेक्षा कृता ।

दुर्योधनः—उपपन्नमिदम् ।

कर्णः—अन्यच्च राजन्, द्रुपदेनाप्यस्य बाल्यात्प्रभृत्यभिप्रायवेदिना न स्वराष्ट्रे वासो दत्त ।

दुर्योधनः—साधु अङ्गराज, साधु । निपुणमभिहितम् ।

कर्णः—न चाय ममैकस्याभिप्राय । अन्येऽभियुक्ता अपि नैवेदमन्यथा मन्यन्ते ।

'उडुप तु प्लव कोल' इत्यमर । सख्ये सङ्ग्रामे ॥ २७ ॥ सूक्त शोभनमुक्तम् । अभियुक्तैर्नीतिज्ञै ॥ **न खल्विति** । इदमेवैतन्न वाच्यमित्यर्थ । किल प्रसिद्धौ ।

---

१ 'शोकान्धचेतसा' २ 'क्षात्रधर्मकार्कश्य' ३ 'द्विजातिसुलभो मार्दवपरिग्रह' इति बहुपुस्तकाना पाठ ४ 'राजन्कौरवेश्वर' ५ 'किं तत्' इति कचित्पाठ ६ 'एव किल द्रोणस्याभिप्राय आसीत्', 'एव किल तस्याभिप्राय आसीत्', 'एव किल तस्य मनसि', 'एव किल तस्यासीच्चेत' इति पाठान्तराणि ७ 'तस्य च वधात्' इति पाठ ८ 'शस्त्रधारणम्' ९ 'क्षयमुपेक्षमाणेन' १० 'प्रधाननृपवधे' ११. 'उपपन्नमेतत्' १२ 'द्रुपदेन चास्य' १३ 'साधु' इति कचिन्नास्ति १४. 'अन्येऽप्यत्र योद्धारो नैतदन्यथा मन्यन्ते' इति पाठ १५ 'अपि' इति कचिन्नास्ति

दुर्योधनः—एवमेतत् । क सदेह ।

दत्त्वाभय सोऽतिरथो वध्यमान किरीटिना ।
सिन्धुराजमुपेक्षेत नैव चेत्कथमन्यथा ॥ २८ ॥

कृपः—(विलोक्य ।) वत्स, एष दुर्योधन[1] सूतपुत्रेण सहास्या न्यग्रोधच्छायायामुपविष्टस्तिष्ठति । तदुपसर्पाव ।

(तथा कृत्वा ।)

उभौ—विजयता[2] कौरवेश्वर ।

दुर्योधनः—(दृष्ट्वा ।) अये कथ कृपोऽश्वत्थामा च । (आसनादवतीर्य कृप प्रति ।) गुरो, अभिवादये । (अश्वत्थामानमुद्दिश्य[3] ।) आचार्यपुत्र,

एह्यस्मदर्थहततात परिष्वजस्व
क्लान्तै[4]रिमैर्मम निरन्तरमङ्गमङ्गै ।
स्पर्शस्तवैष[5] भुजयो सदृश पितुस्ते
शोकेऽपि[6] नो विकृतिमेति तनूरुहेषु ॥ २९ ॥

(आलिङ्ग्य पार्श्व उपवेशयति ।)

(अश्वत्थामा बाष्पमुत्सृजति ।)

कर्णः—द्रौणि[7]यने, अलमत्यर्थमात्मान शोकानले प्रक्षेतुम् ।

दुर्योधनः—आचार्यपुत्र, को विशेष आवयोरस्मिन्व्यसनमहार्णवे[8] । पश्य ।

तथा शस्त्रत्यागम् ॥ बाल्यात्प्रभृति शैशवादारभ्य ॥ **दत्त्वेति** । सोऽतिरथो महारथो द्रोणोऽभय दत्त्वा कथमन्यथार्जुनेन वध्यमान जयद्रथमुपेक्षेत । चेदेव नेत्यन्वय ॥ २८ ॥ सूतपुत्रेण सारथिसुतेन कर्णेन । 'सूत क्षत्ता च सारथि' इत्यमर । 'न्यग्रोधो बहुपाद्वट' इत्यमर । विजयतामित्यत्र । 'विपराभ्या जे' इति तद् ॥ **एहीति** । एह्यागच्छ । तनूरुहेषु लोमसु ॥ २९ ॥ **तात इति** ।

---

१ 'क्रौरवराज' २ 'विजयता विजयता राजन्' ३ '(अश्वत्थामान प्रति ।)' ४ 'क्लान्तै शुचा', 'क्लान्तैरिद' 'कान्तैरिद' इति पाठान्तराणि ५ 'तथैव', 'तवैव' ६ 'शोकेऽपि यो महति निर्वृतिमादधाति' इति क्वचित्पाठ ७ 'द्रोणपुत्र, अलमत्यन्तावेगेनात्मान शोकसागरे प्रक्षेतुम्' इति पाठ ८ 'अत्यर्थम्' इति क्वचित्पाठ ९ 'व्यसनार्णवे'

तातस्तव प्रणयवान्[1] सं पितु सखा मे
शस्त्रे यथा तव गुरु स तथा ममापि।
किं तस्य देहनिधने कथयामि दु ख
जानीहि तद्गुरुशुचा मनसा त्वमेव ॥ ३० ॥

कृपः—वत्स, यथाह कुरुपतिस्तथैवैतत्[2]।

अश्वत्थामा—राजन्, एव पक्षपातिनि त्वयि युक्तमेव शोकभारं लघूकर्तुम्। किं तु

मयि जीवति यत्तात[3] केशग्रहमवाप्तवान्[4]।
कथमन्ये करिष्यन्ति पुत्रेभ्य पुत्रिण[5] स्पृहाम् ॥ ३१ ॥

कर्णः—द्रोणायने, किमत्र[6] क्रियते यदनेनैव[7] सर्वपरिभवपरित्राणहेतुना[8] शस्त्रमुत्सृजता तादृशीमवस्थामात्मा नीत[9]।

अश्वत्थामा—अङ्गराज, किमाह भवान्किमत्र[10] क्रियत इति। श्रूयता यत्क्रियते[11]।

यो य शस्त्र बिभर्ति स्वभुजगुरुमदात्[12] पाण्डवीना चमूना[13]
यो य पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्या गतो वा।
यो यस्तत्कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीप[14]
क्रोधान्धस्तस्य तस्य स्वयमपि[15] जगतामन्तकस्यान्तकोऽहम्॥३२॥

स तव तातो मे पितु सखा मित्रमित्यन्वय। तत्त्वमेव जानीहीत्यन्वय। शुचा शोकेन ॥ ३० ॥ **मयीति**। 'पुत्रेभ्य' इत्यत्र 'स्पृहेरीप्सित' इति चतुर्थी ॥ ३१ ॥ **यो य इति**। पाण्डवीना पाण्डवसंबन्धिनीनाम्। चमूनां सेनानाम्। अधिकवयास्तरुणो वृद्धश्च। तत्कर्मसाक्षी तातवधसाक्षाद्द्रष्टा। 'साक्षाद्द्रष्टरि संज्ञायाम्' इति साक्षीति सिध्यति। प्रतीपो विपरीतकारी। तस्य जगतामन्तकस्य

---

१ 'स यथा तथा मे' इति पाठ २ 'एतदनन्तरम् 'कर्ण'—किमत्र विचारेण। अश्वत्थामा—राजन्येवमादिनि युक्तमेव शोकसागरमुल्लङ्घयितुम्' एवविध पाठ क्वचिद्दृश्यते. ३ 'मत्तात' ४ 'केशग्रहणमाप्तवान्' इति पाठ ५ 'अपुत्रिण' ६ 'अत्र' इति क्वचिन्नास्ति ७ 'यदा तेनैव' इति क्वचित्पाठ ८ 'सर्वपरिभवत्राणहेतुना' ९ 'एतादृशीम्', 'ईदृशीम्' १० 'अत्र' इति क्वचिन्नास्ति ११ 'यत्क्रियते तत्' १२ 'मदात्', 'बल' १३ 'प्रतीपम्' १४. 'स्वयमिह'.

अपि च। भो जामदग्न्यशिष्य कर्ण,

देश सोऽयमरातिशोणितजलैर्यस्मिन्ह्रदा पूरिता
क्षात्रादेव तथाविध परिभवस्तातस्य केशग्रह ।
तान्येवाहितशस्त्रघसरगुरून्यस्त्राणि भास्वन्ति मे
यद्रामेण कृत तदेव कुरुते द्रोणात्मज क्रोधन ॥ ३३ ॥

दुर्योधनः—आचार्यपुत्र, तस्य तथाविधस्यानन्यसाधारणस्य ते वीरभावस्य किमन्यत्सदृशम् ।

कृपः—राजन्, सुमहान्खलु द्रोणपुत्रेण वोढुमध्यवसित समरभर । तदहमेव मन्ये भवता कृतपरिकरोऽयमुच्छेत्तु लोकत्रयमपि समर्थ । किं पुनर्यौधिष्ठिरबलम् । अतोऽभिषिच्यता सैनापत्ये ।

दुर्योधनः—सुष्ठु युज्यमानमभिहित युष्माभि । किं तु प्राक्प्रतिपन्नोऽयमर्थोऽङ्गराजस्य ।

कृपः—राजन्, असदृशपरिभवशोकसागरे निमज्जन्तमेनमङ्गराजस्यार्थे नैवोपेक्षितु युक्तम् । अस्यापि तदेवारिकुलमनुशासनीयम् । अत किमस्य पीडा न भविष्यति ।

विनाशकस्य । अन्तको यमो विनाशको वा ॥ ३२ ॥ जामदग्न्य परशुराम । **देश इति** । शोणित रक्तम् । क्षात्रात्क्षत्रियकृतात्परिभव । तत्रैव जात इति शेष । आहिता उपस्थिता ये शत्रवस्तेषा घस्मराणि भक्षकाणि । अतएव गुरूणि । भास्वन्ति दीप्यमानानि । रामेण परशुरामेण कृत क्षत्रियनाशनम् ॥ ३३ ॥ सुमहानतिशयित । वोढु धर्तुम् ॥ अयमर्थोऽभिषेकरूप ॥

---

१ 'शोणितभरै' २ 'केशग्रहात्' ३ 'हेतिघसर–' ४ 'नो' ५ द्रौणायनि' ६ 'तथाविधपरिभवस्यानन्यपुरुषसाधारणस्य ते वीरभावस्य च किमस्त्यसदृशम्' इति पाठ ७ 'युधिष्ठिरबलम्' ८ एतदनन्तर क्वचित् '(इत्यङ्गुरीयक ददाति।)' कर्ण —(सहर्षम् ।) महान्पर प्रसाद । कृप —असदृशपरिभवसागरे मज्जन्तमेनमङ्गराजस्यापि नोपेक्षितु युक्तम् । अश्वत्थामा—'(साटोपम् ।) राजन्, राजन्, युक्तायुक्तविचारणया किमद्यापि ।' इति पाठो दृश्यते ९ 'अस्यापि च', 'अंस्यापि च' इत्यनयोर्मध्य 'भविष्यति' इत्यन्त क्वचिन्नास्ति

अश्वत्थामा—[1]राजन्, किमद्यापि युक्तायुक्तविचारणया ।

प्रयत्नपरिबोधित स्तुतिभिरद्य शेषे निशा-
मकेशवमपाण्डव भुवनमद्य नि सोमकम् ।
इय परिसमाप्यते रणकथाद्य [2]दो शालिना-
[3]मपैतु [4]नृपकाननातिगुरुरद्य भारो भुव ॥ ३४ ॥

कर्णः—[5](विहस्य ।) वक्तु सुकरमिदं दुष्करमध्यवसितुम् । बहव कौरवबलेऽस्य कर्मण शक्ता ।

अश्वत्थामा—[6]अङ्गराज, एवमिदम् । बहव कौरवबलेऽत्र शक्ता । कि तु दु खोपहत शोकावेगवशाद्ब्रवीमि न पुनर्वीरजनाधिक्षेपेण ।

कर्णः—[7]मूढ, दु खितस्याश्रुपात कुपितस्य चायुधद्वितीयस्य सङ्ग्रामावतरणमुचित नैवविधा प्रलापा ।

प्रयत्नेत्यादि । हे मातुल ([1] राजन्), त्व तावन्निशा व्याप्य शेषे स्वप्निहि । कीदृश सन् । स्तुतिभिर्मागधादिकृतस्तवैरद्य प्रयत्नेन परिबोधित प्रबोधित । तथा च त्व स्तवादिनापि परिहृतभगिनीपतिशोक समस्ता निशा व्याप्य शयन विधेहीति भाव । 'शेषे' इति 'शीङ् स्वप्ने' लटि मध्यमपुरुषैकवचने साधु । 'निशाम्' इत्यत्र 'कालाध्वनोरत्यन्तसयोगे' इति द्वितीया । अद्य पुनर्भुवनमेतादृशमस्तु । कीदृशम् । केशवशून्य पाण्डवशून्य सोमवशशून्य च । दो शालिना बाहुबलशालिना वीराणामपि रणकथा युद्धवार्ताद्य मया परिसमाप्यते । अद्य भुवो भारोऽपैतु दूर यातु । कीदृश । नृपा एव काननानि वनानि तैरतिगुरु । उपचित इत्यर्थ । 'दोषा भुजा भुज' इत्यमर ॥ ३४ ॥ 'ननु हे स्पर्धा-

---

१ 'राजन्, कौरवेश्वर' २ 'दो शालिना' ३ 'व्यपैतु', 'अपैति' ४ 'रिपुकाननातिगुरु' ५ 'कर्ण —द्रोणात्मज, वक्तु सुकरमिदमध्यवसित दुष्करम्', 'कर्ण —वक्तु सुकरमिदमध्यवसितु दुष्करम्', 'कर्ण —(विहस्य ।) द्रोणात्मज, वक्तुमिद सुकर दुष्करमध्यवसितुम्' इति पाठान्तराणि ६ 'अङ्गराज, एव बहव शक्ता । किं तु दु खोपहत शोकावेगवशात्', 'अङ्गराज, दु खोपहत शोकावेगवशात्', 'अङ्गराज, एवम् । बहव कौरवबलेऽत्र शक्ता । किं तु दु खोपहतशोकावेगवशात्' इति पाठान्तराणि. ७ 'द्रौणायने'

अश्वत्थामा—(सक्रोधम्।) अरे रे राधागर्भभारभूत,[2] सूतापसद,[3] ममापि नामाश्वत्थाम्नो दु खितस्याश्रुभि प्रतिक्रियामुपदिशसि न शस्त्रेण। पश्य।

निर्वीर्यं गुरुशापभाषितवशात्किं मे तवेवायुध
सप्रत्येव भयाद्विहाय समरं प्राप्तोऽसि किं त्व यथा।
जातोऽह स्तुतिवशकीर्तनविदा किं सारथीना कुले
क्षुद्रारातिकृ[4]ताप्रिय प्रतिकरोम्यस्त्रेण नास्त्रेण यैत्॥ ३५॥

कर्णः—(सक्रोधम्।) अरे रे वाचाट, वृथाशस्त्रग्रहणदुर्विदग्ध, बटो,

निर्वीर्यं वा सवीर्यं वा मया नोत्सृष्टमायुधम्।
यथा पाञ्चालभीतेन पित्रा ते बाहुशालिना॥ ३६॥

अपि च।

सूतो वा सूतपुत्रो वा यो[6] वा को वा भवाम्यहम्।
दैवायत्त कुले जन्म मदायत्त तु पौरुषम्॥ ३७॥

यामवरे पदम्' इति भरत। **निर्वीर्यं गुर्विति**। गुरुशापेति परशुराम-दत्तशापात्। कर्ण किल बालक स्वीयक्षत्रियजातिं सगोप्यास्त्रविद्याशिक्षार्थं परशुरामस्थान गत। तेनास्त्रविद्या तस्मै दत्ता। तत कर्णोऽय क्षत्रिय इति तेन ज्ञातम्। अथ तवास्त्रविद्या वीर्यवती न भवतु मम छलनादिति परशुरामस्त शशाप—इति पुराणम्। तवेव यथा तवेत्यर्थ। स्तुतिश्च वशकीर्तन च। यद्वा। स्तुतिरूप यद्वशकीर्तनम्। प्रतिकरोमि प्रतिकारविषय करोमि। अस्त्रेण नेत्रजलेन॥ ३५॥ **निर्वीर्यं वेति**। उत्सृष्ट त्यक्तम्॥ ३६॥ **सूत इति**। सूत सारथि। स्यो वेति त्यच्छब्दस्य प्रयोग। स छान्दसोऽपि क्वचिद्भाषाया प्रयुज्यते। 'सो वा' इत्यपि पाठ॥ ३७॥ **सभीरुरिति**। प्रथित ख्यातम्।

---

१ '(सरोषम्।)' २ 'राधाया सुत' इति क्वचित्पाठ ३ 'सूतापसद' इत्य सादनन्तर केषुचित्पुस्तकेषु 'किमेवमाक्षिपसि। कर्ण—सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम्। दैवायत्त कुले जन्म मदायत्त तु पौरुषम्॥ अश्वत्थामा—किमाह भवान्। ममापि नामाश्वत्थाम्नो दु खितस्याश्रुभि' इति पाठो वर्तते ४ 'कृताप्रिय' ५ 'किम्' ६. 'यो वा स्यो वा', 'यो वा सो वा'

अश्वत्थामा—(सक्रोधम् ।) अरे रे रथकारकुलकलङ्क, अरे राधागर्भभारभूत, आयुधानभिज्ञ, तातमप्यधिक्षिपसि । अथ वा

स भीरु शूरो वा प्रथितभुजसारस्त्रिभुवने
कृत यत्तेनाजौ [1]प्रतिदिनमिय वेत्ति वसुधा ।
परित्यक्त शस्त्र कथमिति स [2]सत्यव्रतधर
पृथासूनु साक्षी त्वमसि रणभीरो क्व नु तदा ॥ ३८ ॥

कर्णः—(विहस्य ।) एव भीरुरहम् । [3]त्व पुनर्विक्रमैकरस स्वपितरमनुस्मृत्य न जाने किं करिष्यसीति । महान्मे सशयो जात । अपि च रे मूढ,

यदि शस्त्रमुज्झितमशस्त्रपाणयो
न निवारयन्ति किमरीनुदायुधान् ।
यदनेन मौलिदलनेऽप्युदासित
सुचिरं स्त्रियेव नृपचक्रसनिधौ ॥ ३९ ॥

अश्वत्थामा—(सक्रोध सकम्प च ।) दुरात्मन्, राजवल्लभ, प्रगल्भ, सूतापसद, असबद्धप्रलापिन्,

कथमपि न निषिद्धो दु खिना भीरुणा वा
द्रुपदतनयपाणिस्तेन पित्रा ममाद्य ।

आजौ युद्धे । प्रतिदिन तेन यत्कृत तद्वसुधा वेत्तीत्यन्वय । यत्तेनात्र कथमपि शोकविकलेन परित्यक्त तत्र स युधिष्ठिर साक्षी ॥ ३८ ॥ **यदीति** । अशस्त्रपाणयस्त्यक्तास्त्रा । उदायुधानुद्यतास्त्रान् । किं न निवारयन्ति । किं तु निवारयन्त्येव । अनेन द्रोणेन । दलने खण्डने । उदासितमुदासीनीभूतम् । स्त्रियेवेति । यथा स्त्रियोदास्यते इत्यर्थ । 'चक्र सैन्यरथाङ्गयो' इति विश्व ॥ ३९ ॥ **कथमपीति** । तव शिरस्येष वामश्चरणो वामपादो मया न्यस्यते इत्यन्वय । आध्मा-

---

१ 'प्रतिदिशम्' २ 'सत्यव्रतधन' ३ 'त्व पुनर्विक्रमैकरस । तव पितरमनुस्मृत्य महान्मे सशयो जात ।', 'पुनर्विक्रमैकरस तव पितरमनुस्मृत्य महान्मे सशयो जात ।', 'त्व पुनस्त्र विक्रमैकधन स्वपितरमनुस्मृत्य न जाने किं करिष्यसि । महासशयो मे जात ।' इति नानाविध पाठ.

तव भुजबलदर्पाध्मायमानस्य वाम[1]
शिरसि चरण[2] एष न्यस्यते वारयैनम् ॥ ४० ॥

([3]इति तथा कर्तुमुत्तिष्ठति ।)

कृपदुर्योधनौ—[4]वत्स, मर्षय मर्षय । (इति निवारयत ।)

(अश्वत्थामा चरणप्रहार नाटयति ।)

कर्णः—(सक्रोधमुत्थाय । खड्गमाकृष्य ।) अरे दुरात्मन्, ब्रह्मबन्धो, [5]आत्मश्लाघ,

जात्या [6]काममवध्योऽसि चरण त्विदं[7]मुद्धृतम् ।
अनेन लून खड्गेन [8]पतित द्रक्ष्यसि क्षितौ ॥ ४१ ॥

अश्वत्थामा—[9]अरे मूढ, जात्या [10]काममवध्योऽहम् । इय सा जाति परित्यक्ता । (इति यज्ञोपवीत छिनत्ति । पुनश्च सक्रोधम् ।)

[11]अद्य[12] मिथ्याप्रतिज्ञोऽसौ किरीटी क्रियते [13]मया ।
शस्त्र गृहाण वा त्यक्त्वा मौलौ वा रचयाञ्जलिम् ॥ ४२ ॥

यमानस्याध्मातस्य ॥ ४० ॥ वाचाल बहुभाषक । ब्रह्मबन्धो अग्राह्यनामन् । 'ब्रह्मबन्धुरधिक्षेपेऽनिर्देश्येऽपि निगद्यते' इत्यमर । **जात्येति** । चरण लून सक्षितौ पतित द्रक्ष्यसीत्यन्वय । 'पदङ्घ्रिश्चरणोऽस्त्रियाम्' इत्यमर ॥ ४१ ॥ **अद्येति** । त्यक्त्वास्त्रमिति शेष । मिथ्याप्रतिज्ञो मया तव वधात्तेन च तत्करणा

---

१ 'एव', 'एवम्' २ '(इत्युत्तिष्ठति ।)' इति क्वचित्पाठ ३ 'गुरुपुत्र' ४ 'आत्मश्लाघिन्' ५ 'तावत्' ६ 'इमम्' ७ 'उद्यतम्', 'उद्धतम्' ८ 'पातित' ९ 'वेत्स्यसि' १० 'अश्वत्थामा—अरे मूढ, किं नाम जात्या काममवध्योऽहम् । इय सा जातिस्त्यक्ता । (इत्युपवीत छिनत्ति ।)' इति क्वचित्पाठ, क्वचित्तु 'अश्वत्थामा—अरे रे, किं जात्या तावदवध्योऽह यत एव ब्रवीषि । गृहाण शस्त्रम् । इय सा जाति परित्यक्ता । (इति यज्ञोपवीत भूमौ निक्षिपति ।) गृहाणास्त्र व्रज त्यक्त्वा मौलौ वा धारयाञ्जलिम् । अद्य मिथ्याप्रतिज्ञोऽसौ गाण्डीवी क्रियते मया ।' कर्ण —गृहाणास्त्रम् । (इत्यन्योन्यव्यसन कुरुत ।) राजा—अङ्गराज, अङ्गराज, अलमाचार्यपुत्रेण सह शस्त्रग्रहणेन । गुरुपुत्र, अलमङ्गराजेन सह शस्त्रग्रहणेन । (कृपोऽपि वारयति ।) अश्वत्थामा—मातुल, किं मा निवारयसि । समासादयतु तावत्तातनिन्दाप्रगल्भ सूतकुलकलङ्को मद्बाहुजान्तरनिष्पेषसुलभ प्राणानामवसानम्' इत्येष पाठो वर्तते. ११ 'चेत्' १२ 'अय' १३. 'अधुना'.

(उभावपि खड्गमाकृष्यान्योन्य प्रहर्तुमुद्यतौ । कृपदुर्योधनौ निवारयत ।)

दुर्योधनः—आचार्यपुत्र, शस्त्रग्रहणेनालम् ।

कृपः—वत्स, सूतपुत्र, शस्त्रग्रहणेनालम् ।

अश्वत्थामा—मातुल, मातुल, किं निवारयसि । अयमपि तातनिन्दाप्रगल्भ सूतापसदो धृष्टद्युम्नपक्षपात्येव ।

कर्णः—राजन्, न खल्वह निवारयितव्य ।

उपेक्षिताना मन्दाना धीरसत्त्वैरवज्ञया ।
अत्रासिताना क्रोधान्धैर्भवत्येषा विकत्थना ॥ ४३ ॥

अश्वत्थामा—राजन्, मुञ्च मुञ्चैनम् । आसादयतु मद्भुजान्तरनिष्पेषसुलभमसूनामवसादनम् । अन्यच्च राजन्, स्नेहेन वा कार्येण वा यत्त्वमेन तातापधिक्षेपकारिण दुरात्मान मत्त परिरक्षितुमिच्छसि तदुभयमपि वृथैव ते । पश्य ।

पाप प्रियस्तव कथ गुणिन सखाय
सूतान्वय शशधरान्वयसभवस्य ।
हन्ता किरीटिनमह नृप मुञ्च कुर्यां
क्रोधादकर्णमपृथात्मजमद्य लोकम् ॥ ४४ ॥

(इति प्रहर्तुमिच्छति ।)

कर्णः—(खड्गमुद्यम्य ।) अरे वाचाट, ब्राह्मणाधम, अय न भवसि ।

दिति भाव ॥ ४२ ॥ **उपेक्षितानामिति** । अवज्ञया धीरसत्त्वै सुभटैरुपेक्षितानामित्यन्वय । मन्दानामेषा विकत्थना भवति । अतोऽत्र मया नोपेक्षा कर्तव्येति भाव. । अत्रासिताना गेहवासिनाम् ॥ ४३ ॥ निष्पेषो यन्त्रणम् । असक्तो मत्सकाशात् । **पापप्रिय इति** । अय पापस्तव कथ सखेत्यन्वय । कीदृश । प्रिय प्रियसुहृदित्यर्थ । अन्वयो वश । अह किरीटिन हन्ता हनिष्यामि । ततो हे नृप, मा मुञ्च । अह लोक कर्णरहितमर्जुनरहित च कुर्या करिष्ये ॥४४॥

---

१ 'वारयत' २ 'सखे, आचार्यपुत्र' ३ 'वारयसि' ४ 'सूतकुलाधम', ५ 'स्नेहेन कार्येण वा त्वमेन' इति पाठ ६ 'तातापधिक्षेपप्रगल्भमसक्तो रक्षसि' इति क्वचित्पाठ ७ 'सहाय' ८ 'सूतात्मज' ९ 'असौ', 'अयम्'. १० 'एवम्'

राजन्, मुञ्च मुञ्च । न खल्वह वारयितव्य । (हन्तुमिच्छति ।)

(दुर्योधनकृपौ निवारयत ।)

दुर्योधनः—कर्ण, गुरुपुत्र, कोऽयमद्य युवयोर्व्यामोह ।

कृपः—वत्स, अन्यदेव प्रस्तुतमन्यत्रावेग इति कोऽय व्यामोह । स्वबलव्यसन चेदमस्मिन्काले राजकुलस्यास्य युष्मत्त एव भवतीति वाम पन्था ।

अश्वत्थामा—मातुल, न लभ्यतेऽस्य कटुप्रलापिनो रथकारकुलकलङ्कस्य दर्प शातयितुम् ।

कृपः—वत्स, अकाल खलु स्वबलप्रधानविरोधस्य ।

अश्वत्थामा—मातुल, यद्येवम् ।

अय पापो यावन्न निधनमुपेयादरिशरै
परित्यक्त तावत्प्रियमपि मयास्त्र रणमुखे ।
बलाना नाथेऽस्मिन्परिकुपितभीमार्जुनभये
समुत्पन्ने राजा प्रियसखबल वेत्तु समरे ॥ ४५ ॥

(इति खड्गमुत्सृजति ।)

कर्णः—(विहस्य ।) कुलक्रमागतमेवैतद्भवादृशा यदस्त्रपरित्यागो नाम ।

अश्वत्थामा—ननु रे, अपरित्यक्तमपि भवादृशैरायुध चिरपरित्यक्तमेव निष्फलत्वात् ।

कर्णः—अरे मूढ,

रथकार सारथि । शातयितु तनूकर्तुम् ॥ **अयमिति** । उपेयाद्गच्छेत् ॥ ४५ ॥

---

१ 'कृप—भो अश्वत्थामन्, ननु भो कर्ण, अन्यदेव प्रकृतमन्यत्रावेग । कोऽयमद्य युवयोर्व्यामोह । स्वबलव्यसन चेदमस्मिन्काले राजकुलस्यास्यत्त एव उपपद्यते इति नाय पन्था ।' इति क्वचित्पाठ २ 'आयुष्मन्' ३ 'आवेश' ४ 'शातमितुम्' ५ 'प्रियसखमसु' ६ '(इति खड्गमुत्सृजति ।) कर्ण —(विहस्य ।) अपरित्यक्तमपि भवादृशैरायुध ननु चिरपरित्यक्तमेव निष्फलत्वात् । 'धृतायुधो यावदहं' इति क्वचित्पाठ

धृतायुधो यावदह तावदन्यै किमायुधै· ।
यद्वा न सिद्धमस्त्रेण मम तत्केन सेत्स्यति ॥ ४६ ॥

(नेपथ्ये ।)

आ दुरात्मन्, द्रौपदीकेशाम्बराकर्षणमहापातकिन्, धार्तराष्ट्रापसद, चिरस्य खलु कालस्य मत्संमुखीनमागतोऽसि । क्षुद्रपशो, क्वेदानीं गम्यते । अपि च । भो भो राधेयदुर्योधनसौबलप्रभृतय· पाण्डवविद्वेषिणश्चापपाणयो मानधना·, शृण्वन्तु भवन्त ।

कृष्टा येन शिरोरुहे नृपशुना पाञ्चालराजात्मजा
येनास्या परिधानमप्यपहृत राज्ञा गुरूणा पुर ।
यस्योर स्थलशोणितासवमह पातु प्रतिज्ञातवा-
न्सोऽय मद्भुजपञ्जरे निपतित· सरक्ष्यता कौरवा· ॥ ४७ ॥

(सर्व आकर्णयन्ति ।)

अश्वत्थामा—(सोत्प्रासम् ।) अङ्गराज, सेनापते, जामदग्न्य-

धृतायुध इति । ममास्त्रेण यन्न सिद्धमित्यन्वय ॥ ४६ ॥ इह श्लोके दम्भ आरभटी वृत्ति । 'कपटानृतदम्भेषु वृत्तिरारभटी मता' इति भरत ॥ सौबल· शकुनि ॥ **कृष्टेति** । आसवो मद्यम् । भुजपञ्जरे बाहुमध्ये । कथ कौरवा इति । कच्छादिपाठात् 'मनुष्यतत्स्थयो' इति वुञ्प्रसक्त । अत्रामनुष्यत्वेन विवक्षणान्न वुञ् । तत· 'तस्येदम्' इत्यण् । जनपदविवक्षाया वाण् ॥ ४७ ॥ '(सोत्प्रास

---

१ 'बाहुशालिन्' २ 'मत्सम्मुखागतोसि' ३ 'स्पृष्टा' ४ 'शिरोरुहेषु पशुना' ५ 'कुरूणां' ६ 'मद्भुजगोचरे' ७ 'कौरव' ८ 'अश्वत्थामा—(सोपहासम् ।) अङ्गराज । कर्ण —किमाह भवान् । अश्व०—सेनाधिपते । कर्ण —तत्र क सदेह । अश्व०—जामदग्न्यशिष्य । कर्ण —बाढम् । अश्व०—द्रोणोपहासिन् । कर्ण —एवमेतत् । अश्व०—त्वयोक्तम् । कर्ण —किं मयोक्तम् । अश्व०—('धृतायुधो यावदह' इति पठति ।) कर्ण —बाढमुक्तम् । अश्व०—इद महत्कदन सवृत्तम् । कर्ण —किं जातम् । अश्व०—भीम कथयति । कर्ण —किम् । अश्व०—श्रूयताम् । कर्ण —किं कथ्यताम् । अश्व०—('कृष्टा येन' इत्यादि पठति ।) 'तद्भीमाद्य शासन सरक्ष्यता युवराज ।' इत्यपर. पाठ·. ९. '(सोत्प्रासम् ।)' इति कचिन्नास्ति १० 'जामदग्न्यास्त्रशिष्य'

शिष्य, द्रोणोपहासिन्, भुजबलपरिरक्षितसकललोक,('धृताधुध '(३।४६) इति पठित्वा ।) इद तदासन्नतरमेव सवृत्तम् । रक्षैन साप्रत भीमादु शासनम् ।

कर्णः—[1]आ , का शक्तिर्वृकोदरस्य मयि जीवति दु:शासनस्य छायामप्याक्रमितुम्[3] । युवराज, न भेतव्य न भेतव्यम् । अयमहमागतोऽस्मि । (इति निष्क्रान्त ।)

अश्वत्थामा—राजन्कौरवनाथ, अभीष्मद्रोण सप्रति कौरवबलमालोडयन्तौ भीमार्जुनौ राधेयेनैवविधेनान्येन वा न शक्येते निवारयितुम् । अत स्वयमेव भ्रातु प्रतीकारपरो भव ।

दुर्योधनः—[4]आ , शक्तिरस्ति दुरात्मन पवनतनयस्यान्यस्य वा मयि जीवति शस्त्रपाणौ [6]वत्सस्य छायामप्याक्रमितुम्[7] । [9]वत्स, न भेतव्य न भेतव्यम् । क कोऽत्र भो । रथमुपनय । (इति निष्क्रान्त ।)

(नेपथ्ये कलकल ।)

अश्वत्थामा—[11](ससभ्रमम् ।) [12]मातुल, कष्ट कष्टम् । [13]एष भ्रातु प्रतिज्ञाभङ्गभीरु किरीटी सम दुर्योधनराधेयौ [15]शरवर्षैरभिद्रवति । सर्वथा पीत दु:शासनशोणित भीमेन[16] । [17]न खलु विषहे दुर्योधनानुजस्यैना विपत्तिमवलोकयितुम् । अनृतमनुमत नाम । मातुल, शस्त्र शस्त्रम् ।

समनाक्स्मितम्' इत्यमर ॥ बाढ निश्चितम् ॥ सममेकदैव । अह विषहे सोढु

---

१ 'आ , शक्तिरस्ति वृकोदरस्य' २ 'युवराजस्य' ३ 'अतिक्रमितुम्', 'लङ्घयितुम्' ४ 'वनम्' ५ 'आ , का शक्तिर्दुरात्मन ', 'आ , का शक्तिरस्ति दुरात्मन ' ६ 'अन्यस्य वा' इति क्वचिन्नास्ति ७ 'शस्त्रापणौ' इति क्वचिन्नास्ति. ८ 'दु शासनस्य' ९ 'लङ्घयितुम्' १० 'वत्स, न भेतव्यम्' इति पाठ· ११ '(ससंभ्रमम् ।)' इत्यत्र '(अग्रतो विलोक्य ।)' इति बहुपुस्तकाना पाठ· १२ 'मातुल, हा धिक्कष्टम्', 'मातुल, मातुल, कष्टम्'. १३ 'एष खलु' १४. 'शरवर्षैरभिद्रवति । हा कष्टं कष्टम् । सर्वथा पीत' इति बहुपुस्तकाना पाठ. १५ 'तत्' [illegible] दुर्योधनस्यानुजस्यैता विपत्तिमुपेक्षितुम् । अनृतमनुमत नाम । भगवन् शस्त्र शस्त्रमित्यपि क्वचित्पाठ ·

सत्यादप्यनृत श्रेयो धिक्स्वर्गं नरकोऽस्तु मे ।
भीमाद्धु शासन त्रातु त्यक्तमत्यक्तमायुधम् ॥ ४८ ॥

(इति खड्ग ग्रहीतुमिच्छति ।)

(नेपथ्ये ।)

महात्मन्, भारद्वाजसूनो, न खलु सत्यवचनमुल्लङ्घयितुमर्हसि ।

कृपः—वत्स, अशरीरिणी भारती भवन्तमनृतादभिरक्षति ।

अश्वत्थामा—कथमियममानुषी वाग्मानुमनुते सङ्ग्रामावतरण मम। सर्वथा पाण्डवपक्षपातिनो देवा । भो, कष्ट कष्टम् ।

दु शासनस्य रुधिरे पीयमानेऽप्युदासितम् ।
दुर्योधनस्य कर्तास्मि किमन्यत्प्रियमाहवे ॥ ४९ ॥

मातुल, राधेयक्रोधवशादनार्यमस्माभिराचरितम् । अतस्त्वमपि तावदस्य राज्ञः पार्श्ववर्ती भव ।

कृपः—गच्छाम्यहमत्र प्रतिविधातुम् । भवानपि शिबिरसन्निवेशमेव प्रतिष्ठताम् ।

(पैरिक्रम्य निष्क्रान्तौ ।)

इति तृतीयोऽङ्कः ।

पारयामि ॥ **सत्यादिति** । अनृतमसत्यम् । स्वर्गमिति । धिग्योगे द्वितीया । भीमादिति । 'भीत्रार्थाना भयहेतु' इति पञ्चमी । अत्यक्त मयेति शेष ॥ ४८ ॥ भारती सरस्वती ॥ **दु शासनस्येति** । उदासितम् । मयेति शेषः । किमन्यत्प्रियं दुर्योधनस्याहं कर्ता करिष्ये ॥ ४९ ॥ अनार्यमनर्हम् ॥

असूत य रत्नधरो गुणीशो नानागुणाढ्या दमयन्तिकापि ।
जगद्धर तस्य कृतावयासीदङ्कस्तृतीयो वरटिप्पनेऽत्र ॥

इति तृतीयोऽङ्कः ।

---

१ 'सत्यवचनमनुल्लङ्घितपूर्वमुल्लङ्घयितुम्' २ 'वाणी' ३ 'नानुमनुते सङ्ग्रामावतरण मे । भो, कष्टम् । आः, पक्षपातिनो देवा अपि पाण्डवानाम् । सर्वथा धिर्तं दुःशासनशोणित भीमेन । भो कष्ट कष्टम् ।' इति बहुपुस्तकाना पाठः ४. '(उभौ परिक्रम्य निष्क्रान्तौ ।)' इति पाठः ।

चतुर्थोऽङ्कः ।

(ततः प्रविशति प्रहारमूर्च्छितः रथस्थः दुर्योधनमपहरन्सूतः ।)

(सूतः ससम्भ्रमं परिक्रामति ।)

Malabika Prasad

(नेपथ्ये)

भो भोः, बाहुबलावलेपप्रवर्तितमहासमरदोहदाः कौरवपक्षपातपणीकृतप्राणद्रविणसञ्चयाः नरपतयः, सस्तम्भ्यन्तां निहतदुःशासनपीतावशेषशोणितस्नपितबीभत्सवेषवृकोदरदर्शनभयेन परिस्खलत्प्रहरणानि रणात्प्रद्रवन्ति बलानि ।

सूतः—(विलोक्य ।) कथमेष धवलचपलचामरचुम्बितकनककमण्डलुना शिखरावबद्धवैजयन्तीसूचितेन हतगजवाजिनरकलेवरसहस्रसमर्दविषमोद्धातकृतकलकलकिङ्किणीजालमालिना रथेन शरवर्षस्तम्भितपरचक्रपराक्रमप्रसरः प्रद्रुतमात्मबलमाश्वासयन्कृपः किरीटिनाभियुक्तमङ्गराजमनुसरति । हन्त, जातमसद्बलानामवलम्बनम् ।

S IV 9ha (नेपथ्ये कलकलानन्तरम् ।)

भो भोः, असद्दर्शनभयस्खलितकार्मुककृपाणतोमरशक्तयः कौरवचमूभटाः पाण्डपक्षपातिनश्च योधाः, न भेतव्यं न भेतव्यम् । अयमहं निहतदुःशासनपीवरोरःस्थलक्षतजासवपानमदोद्धतो रभस-

'अवलेप स्मृतो गर्वः' इति विश्वः । दोहदो 'दोहर' इति प्रसिद्धः । प्राणा एव द्रविणमिति रूपकम् । सस्तम्भ्यन्तां स्थिरीक्रियन्ताम् । बीभत्सो भयानकः । प्रहरणमस्त्रम् ॥ चुम्बित सबद्धः । शिखरमग्रम् । वैजयन्ती पताका । कलेवरं शरीरम् ॥ तोमरोऽस्त्रभेदः । पीवरं मांसलम् । क्षतजं रक्तम् । रभस आवेगस्तं

१ 'बाहुबलाहंकारप्रवर्तित—' २ 'कौरवकुलपक्षपात—' ३ 'सस्तम्भ्यन्ता सस्तम्भ्यन्ता' ४. 'हत—' ५ 'विषाद—' ६ 'परिस्खलित—' ७. 'द्रवन्ति', 'विद्रवन्ति' ८ 'धवलचपलचारुचामर', 'धवलचारुचामर' ९ 'शिखरावद्ध—', 'शिखरावनद्ध—' १० 'विषमोत्खात—'. ११ 'परबलपराक्रमप्रद्रुतमात्मबलं', 'परचक्रपराक्रमप्रसर प्रतिपक्षमीक्षमाणमात्मीयबल', 'परबलपराक्रमप्रसरः प्रद्रुतमात्मबलं' इति नानाविध पाठ १२ 'जातमेव बलानामवलम्बनम्' इति कचित्पाठ १३. 'रणरभसगामी'.

गामी स्तोकावशिष्टप्रतिज्ञामहोत्सवः कौरवराजस्य [1]द्यूतनिर्जितो दास [2]पार्थमध्यमो भीमसेन सर्वान्भवत [3]साक्षीकरोमि । श्रूयताम्—

राज्ञो मानधनस्य कार्मुकभृतो दुर्योधनस्याग्रत
प्रत्यक्षं कुरुबान्धवस्य मृषतः[4] कर्णस्य शल्यस्य च ।
पीतं तस्य मयाद्य पाण्डववधूकेशाम्बराकर्षिणः
कोष्णं जीवत एव तीक्ष्णकरजक्षुण्णादसृग्वक्षसः ॥ १ ॥

सूतः—(श्रुत्वा । सभयम् ।) [5]कथमासन्न [6]एव दुरात्मा कौरवराजपुत्रमहावनोत्पातमारुतो [7]मारुतिः । [8]अनुपलब्धसज्ञश्च महाराजः । भवतु । [9]दूरमपहरामि स्यन्दनम् । कदाचिद्धु शासन इवासिन्नप्[10]ययमनार्योऽनार्यमाचरिष्यति । ([11]त्वरित परिक्रम्यावलोक्य च ।) अये, अयमसौ सरसीसरोजविलोलनसुरभिशीतलमातरिश्वसवाहितसान्द्रकिसलयो न्यग्रोधपादपः । [12]उचिता विश्रामभूरिय समरव्यापारखिन्नस्य वीरजनस्य । [13]अत्र स्थितश्चायाचिततालवृन्तेन हरिचन्दनच्छटाशीतलेनाप्रयत्नसुरभिणा दशापरिणामयोग्येन [14]सरसीसमीरणेनामुना गत-

---

गन्तु शील यस्य स रभसगामी । **राज्ञ इति** । मृषत सहिष्णो । कोष्णमीषदुष्णम् । 'कोष्ण कवोष्ण मन्दोष्णम्' इत्यमर । तस्य दु शासनस्य । वक्षसो हृदयात् । असृग्धया पीतमित्यन्वय । करजो नख ॥ १ ॥ मारुतिर्भीम । संवाहितो मिलितः । 'न्यग्रोधो बहुपाद्वट' इत्यमर । अयाचिततालवृन्तं स्वयमुपस्थितं व्यजनम् । हरिचन्दन चन्दनभेद । परिणामो विपाक । प्रवेक्ष्यति प्रवेश कार-

---

१ 'जितदास' २ 'पाण्डवमध्यम' ३ 'साक्षिण करोमि' ४ 'च तथा', 'मिषत' ५ 'अये' ६ 'एष', 'एवासौ' ७ 'कौरववनोत्पातमारुत' ८ 'मारुति' इति क्वचिन्नास्ति ९ 'अनुपलब्धसज्ञश्च तावदत्र महाराज', 'अनुपलब्धसज्ञश्च तावन्महाराज' १० 'सुदूरमपनयामि', 'दूरमपसारयिष्यामि' ११ 'अयम्' इति क्वचिन्नास्ति १२ 'त्वरिततर' १३ 'उचितेय विश्रामभूमि' १४ 'अत्रस्थोऽय-मयोपवीजिततालवृन्तेन', 'अत्रस्थोऽयमयाचिततालवृन्तेन', 'अत्रस्थश्चायमयत्नोपवीजिततालवृन्तेन' इति पाठान्तराणि १५ 'सरसीसमीरणेन च विगतक्लमः' इति पाठः ।

क्रमो भविष्यति महाराज । लूनकेतुश्चायं रथोऽनिवारित एव प्रवेक्ष्यति छायामिति । (प्रवेश रूपयित्वा ।) क्व कोऽत्र भो । (समन्तादवलोक्य) कथ न कश्चिदत्र परिजन । नून तथाविधस्य वृकोदरस्य दर्शनादेवविधस्य च स्वामिनस्त्रासेन शिबिरसनिवेशमेव प्रविष्ट । कष्ट भो, कष्टम् ।

दत्त्वा द्रोणेन पार्थादभयमपि न सरक्षित सिन्धुराज
क्रूर दु.शासनेऽसिन्हरिण इव कृत भीमसेनेन कर्म ।
दु.साध्यामप्यरीणा लघुमिव समरे पूरयित्वा प्रतिज्ञा
नाहं मन्ये सकाम कुरुकुलविमुख दैवमेतावतापि ॥ २ ॥

(राजानमवलोक्य ।) कथमद्यापि चेतनामुपलभते महाराजः । भो, कष्टम् ।

(नि श्वस्य ।)

मदकलितकरेणुभज्यमाने
विपिन इव प्रकटैकशालशेषे ।

यिष्यति । छत्रमित्यादावानीयतामिति शेष । **दत्त्वेति** । पार्थादभय दत्त्वापि द्रोणेन सिन्धुराजो न रक्षित इत्यन्वय । भीमसेनेन प्रतिज्ञा पूरयित्वा कर्म कृतमित्यन्वय । अरीणा दु साध्या दु खसाध्याम् । तृणमिव कर्मातिशीघ्र कृतमित्यर्थ । 'लघुम्' इति पाठे प्रतिज्ञाविशेषणम् । वस्तुतो गुर्वीमपि लघ्वीमिवेत्यर्थ । एतावतापि दैव कुरुकुलविमुख नाहं मन्ये । अपि त्वपरमपि करिष्यतीति भाव । 'कुरुकुलनिधने' इति पाठे कुरुकुलनाशे सकाम पूर्णमनोरथ दैव नाहं मन्य इत्यर्थ ॥२॥

मदेति । मदेन मत्ततया । कलित सबद्ध । करेणुर्हस्ती । प्रकट स्फुट । एकशाल शङ्कुतरुर्वृक्षमात्र वा शेषोऽवशेषो यत्र । 'शाल शङ्कुतरुर्मत' इति विश्व ।

---

१. 'लूनकेतु' इत्यस्मात्प्राक् '(ऊर्ध्वमवलोक्य ।)' इति कविवचन केषुचित्पुस्तकेषु दृश्यते २. 'छायाम् । (इति प्रवेश रूपयित्वा ।)' इति पाठ ३ 'क कोऽत्र', 'क कोऽत्र भो' । व्यजन चामरं शीघ्रमुपनयतु । (दिशोऽवलोक्य ।) कथ न कश्चिदत्र परिजनः । नूनं तथाविधस्य वृकोदरस्य दर्शनादेवविधे सति स्वामिनि त्रासात्' इत्यपि क्वचित्पाठ ४ 'अत्र' इति क्वचिन्नास्ति ५. 'तथाभूतस्य' ६. 'द्रोणेनाकृष्य पार्थादयमपि च न सरक्षित' इति पाठान्तरम् ७ 'तृणमिव'. ८. 'कुरुकुलनिधने'. ९ 'कथमद्यापि न चेतनामुपलभते महाराज' इति पाठ. १० 'स्वामी'. ११ 'करीन्द्रभज्यमाने'

हतसकलकुमारके कुलेऽस्मिं-
स्त्वमपि विधेरवलोकित कटाक्षैः ॥ ३ ॥

ननु भो हतविधे, भरतकुलविमुख,

अक्षतस्य गदापाणेरनारूढस्य सशयम् ।
एषापि भीमसेनस्य प्रतिज्ञा पूर्यते त्वया ॥ ४ ॥

दुर्योधनः—(शनैरुपलब्धसञ्ज्ञ ।) आ, शक्तिरस्ति दुरात्मनो वृकोदरहतकस्य मयि जीवति दुर्योधने प्रतिज्ञा पूरयितुम् । वत्स दुःशासन, न भेतव्य न भेतव्यम् । अयमहमागतोऽस्मि । ननु सूत, प्रापय रथ तमेवोद्देश यत्र वत्सो मे दुःशासन ।

सूतः—आयुष्मन्, अक्षमा सप्रति वाहास्ते रथमुद्वोढुम् । (अपवार्य ।) मनोरथ च ।

दुर्योधनः—(रथादवतीर्य सगर्वं साकूत च ।) कृतं स्यन्दनगमनकालातिपातेन ।

सूतः—(सवैलक्ष्य सकरुण च ।) मर्षयतु मर्षयतु देवः ।

दुर्योधनः—धिक्सूत, किं रथेन। केवलमरातिविमर्दसघट्टसचारी

'अनोकह कुट शाल' इत्यमर । हे राजस्त्वमपि ॥३॥ आकाश इति । 'पात्रस्याल्पतया यत्र पात्र नैव प्रवेश्यते । आकाशे कर्ण दत्त्वाकाशे लक्ष्य बद्धेति वोच्यते ॥' इति भरत । **अक्षतस्येति** । अनारूढस्यागतस्य ॥ ४ ॥ स्वैरं मन्दं यथा स्यादेवम् ॥ वाहोऽश्व । 'वाजिवाहार्वगन्धर्व-' इत्यमरः । मनोरथेन

---

१ 'असि' २ '(स्वैरमुपलब्धसञ्ज्ञ ।)', '(सधीरमुपलब्धसञ्ज्ञ ।', '(उपलब्धसञ्ज्ञक ।)' ३ 'आ , का शक्तिरस्ति दुरात्मन पवनतनयस्य वृकोदरहतकस्य', 'आ , का शक्तिरस्ति पवनतनयस्य वृकोदरस्य' ४ 'मयि जीवति गदापाणौ वत्सदु शासनस्य छायामप्यतिक्रमितुम्' इति पाठ ५ 'सूत, प्रापय रथ तमुद्देश यत्र वत्सो दु शासनस्तिष्ठति', 'सूत, प्रापय रथ तमुद्देश यत्र वत्स द्रक्ष्यामि' इति पाठौ. ६ 'देव, अक्षमास्ते वाहा सप्रति', 'महाराज, अक्षमा सप्रति वाहास्ते'. ७ 'मनोरथेनमुद्वोढुम्' ८ 'वय च' ९ 'किं' १० 'मर्षयत्वायुष्मान्', 'मर्षयतु मर्षयत्वायुष्मान्' ११ 'किं रथेनैव । अरातिविमर्दसघट्टसचारी दुर्योधन । तद्गदामात्रसहाय एव समरमुवमवतरामि' इति पाठ

दुर्योधन खल्वहम् । तद्गदामात्रसहाय समरभुवमवतरामि ।

सूतः—देव, एवमेतत् ।

दुर्योधनः—यद्येव [2]किमेव भाषसे । पश्य ।

बालस्य मे प्रकृतिदुर्ललितस्य पाप
[3]पापं व्यवस्यति समक्षमुदायुधोऽसौ ।
अस्मिन्निवारयसि किं व्यवसायिन मा
क्रोधो न [4]नाम करुणा न च तेऽस्ति लज्जा ॥ ५ ॥

सूतः—(सकरुण पादयोर्निपत्य ।) एतद्विज्ञापयामि । [5]आयुष्मन्, सपूर्णप्रतिज्ञेन निवृत्तेन भवितव्यमिदानी दुरात्मना वृकोदरहतकेन । अत एव ब्रवीमि ।

दुर्योधनः—(सहसा भूमौ पतन् ।) हा वत्स दुःशासन, हा मदाज्ञाविरोधितपाण्डव, हा विक्रमैकरस, हा मदङ्कदुर्ललित, हा अरातिकुलगजघटामृगेन्द्र, हा युवराज, क्वासि । प्रयच्छ मे प्रतिवचनम् । (इति नि श्वस्य मोहमुपगत ।)

सूतः—राजन्, समाश्वसिहि समाश्वसिहि ।

दुर्योधनः—(सज्ञा लब्ध्वा । निश्वस्य ।)

मनोरथमप्युद्वोढुमक्षमा इति शेष ॥ **बालस्येति** । पाप नाशरूपम् । नाम सभावनायाम् । क्रोधस्ते नास्ति । करुणापि न लज्जापि न । इत्यन्वय । करुणापि नेत्यत्र नकारस्यावृत्ति । यद्वा 'क्रोधो न नापि करुणा न च तेऽस्ति

---

१ 'सूत —एवमिदम् ।', 'सूत —आयुष्मन्, एवमेतत् । क सदेह ।' इति पाठौ. २. 'किमिति त्वमेव भाषसे' इति पाठ ३ 'पास्यत्यसृग्जनसमक्षमुदायुधोऽसौ' इति पाठ ४ 'नापि', 'क्रोधो न नाम करुणापि च ते न लज्जा' इत्यपि पाठ ५ 'देव' ६ 'सपूर्णप्रतिज्ञेन भूतमिदानीं वृकोदरेण । अत एव ब्रवीमि'; 'संपूर्णप्रतिज्ञेन भूत वृकोदरेण', 'सपूर्णप्रतिज्ञेन निवृत्तेन भवितव्य वृकोदरहतकेन । अत एव ब्रवीमि, 'सपूर्णप्रतिज्ञेन निवृत्तेन भवितव्य दुरात्मना वृकोदरहतकेन । अत एव ब्रवीमि' इति नानाविध पाठ .

[1]युक्तो यथेष्टमुपभोगसुखेषु नैव
त्वं लालितोऽपि हि मया न वृथाग्रजेन ।
अस्यास्तु वत्स तव हेतुरह विपत्ते-
र्यत्कारितोऽस्यविनय न च रक्षितोऽसि ॥ ६ ॥

([2]इति पतति ।)

सूतः—[3]आयुष्मन्, समाश्वसिहि समाश्वसिहि ।

दुर्योधनः—धिक्सूत, किमनुष्ठित भवता ।

[4]रक्षणीयेन सतत [5]बालेनाज्ञानुवर्तिना ।
दु शासनेन [6]त्रात्राहमुपहारेण [7]रक्षित ॥ ७ ॥

सूतः—[8]महाराज, मर्मभेदिभिरिषुतोमरशक्तिप्रासवर्षैर्महारथाना-[9]मपहृतचेतनत्वान्निश्चेतनः [10]कृतो महाराज इत्यपहृतो मया रथ. ।

दुर्योधनः—सूत, विरूप कृतवानसि ।

तस्यैव पाण्डवपशोरनुजद्विषो मे
[11]क्षोभैर्गदाशनिकृतैर्न [12]विबोधितोऽस्मि ।
[13]तामेव नाधिशयितो रुधिरार्द्रशय्या
दौ शासनी यदहमद्य [13]वृकोदरो वा ॥ ८ ॥

लज्जा' इति पाठ ॥ ५ ॥ **युक्त इति** । युक्तो योजित. । हिरवधारणे । मयैव त्व न लालितो विलास न नीत. । मया कीदृशेन । वृथाग्रजेन निष्फलज्येष्ठेन ॥ ६ ॥ **रक्षणीयेनेति** । रक्षणीयेन रक्षणार्हेण । दु शासनेनोपहारेणाह रक्षि-तस्त्वयेति शेष ॥ ७ ॥ **तस्यैवेति** । तस्यैव क्षोभैर्न विबोधितोऽस्मि मोह गतोऽस्मि । कीदृशै । गदावज्रकृतै । दौ शासनीं दु शासनसबन्धिनीम् । तामेव शय्या नाधिशयितोऽह तत्रैव न शयित । 'अधिशीङ्स्थासा कर्म' इत्याधारे कर्म । वृकोदरो वा नाधिशयितस्तामेव शय्यामित्यन्वय ॥ ८ ॥

---

१ 'मुक्त' २ '(इति पुन पतति ।)', ('इति मूर्च्छति ।)' ३ 'आयुष्मन्, समाश्वसिहि' इति क्वचित्पाठ ४ 'लालनीयेन' ५ 'बालकेनानुवर्तिना' ६ 'उपकारेण' ७ 'देव' ८ 'असितोमर—' ९ 'अपहृत—' १० 'निश्चेष्ट' १२ 'क्षोदै' १२. 'यद्यैव', 'अद्येव', 'यद्येव', 'यद्यैव' १३ 'अद्य'

(निश्वस्य । नभो विलोक्य ।) ननु भो हतविधे, कृपाविरहित, भरतकुलविमुख,

अपि नाम भवेन्मृत्युर्न च हन्ता वृकोदरः ।

सूतः—शान्तं पापं शान्तं पापम् । महाराज, किमिदम् ।

दुर्योधनः—

धातिताशेषबन्धोर्मे किं राज्येन जयेन वा ॥ ९ ॥

(ततः प्रविशति शरप्रहारव्रणबद्धपट्टिकालकृतकायः सुन्दरकः ।)

सुन्दरकः—अज्जा, अवि णाम इमस्सिं उद्देसे सारहिदुइओ दिट्ठो तुम्हेहि महाराजदुज्जो हणो ण वेत्ति । (निरूप्य ।) कह ण कोवि मन्तेदि । होदु । एदाण बद्धपरिआराण पुरिसाण समूहो दीसइ । एत्थ गदुअ पुच्छिस्सम् । (परिक्रम्य विलोक्य च ।) कह एदे क्खु सामिणो गाढप्पहारहदस्स घणसण्णाहजालदुब्भेज्जमुहेहि कङ्कवत्तेहि हिअआदो

---

*(क) आर्या., अपि नामास्मिन्नुद्देशे सारथिद्वितीयो दृष्टो युष्माभिर्महाराजदुर्योधनो न वेति । कथ न कोऽपि मन्त्रयते । भवतु । एतेषा बद्धपरिकराणा पुरुषाणा समूहो दृश्यते । अत्र गत्वा प्रक्ष्यामि । कथमेते खलु स्वामिनो गाढप्रहारहतस्य घनसन्नाहजालदुर्भेद्यमुखैः कङ्कपत्रैर्हृदय.

अपि नामेति । नाम सभावनायाम् । मृत्युरपि मे भवेन्न च वृकोदरो हन्ता भवेदिति प्रार्थनाया लिङ् ॥ ९ ॥ व्रणेषु क्षतेषु बद्धा या पट्टिका 'पाटी' इति प्रसिद्धा तयालकृतकाय ॥ **सुन्दरकवाक्ये** । आर्या, अद्यापि नाम कस्मिन्नुद्देशे सारथिद्वितीयो युष्माभिर्महाराजदुर्योधनो दृष्टो न हि वा । कथ वा प्रेक्ष्याधिकृतर रुदन्ति । तत्र खल्वेतेऽपि जानन्ति । भवतु । अन्यतो गत्वा पृच्छामि । एतेषा बद्धपरिमण्डलाना पुरुषाणा समूहो दृश्यते । भवतु । अत्र गत्वा पृच्छामि । कथमेते खलु स्वामिनो गाढप्रहाराहतस्य धनसन्नाहजालदुर्भेद्यमुखै कङ्कवदनैर्हृदया-

---

१ 'पातिताशेषबन्धो' २ '(तत प्रविशति सप्रहार पुरुष ।)' इति बहुपुस्तकाना पाठ ३ 'व्रणबन्धपट्टिकालकृतशरीर', 'व्रणबद्धपट्टिकालकृतशरीर'. ४. 'पुरुष'. ५ 'महाराओ दुज्जोहणो' ६ '(निरूप्य ।)' इति क्वचिन्नास्ति ७ 'योद्धपरिसाण' ८ 'दीसइत्ति' ९ '(विलोक्य ।) १० 'स्वसामिणो'.

सल्लाइ उद्धरन्ति । [1]ता णक्खु एदे जाणन्ति । होदु । अण्णदो विचिणइस्सम् । ([2]अग्रतोऽवलोक्य किंचित्परिक्रम्य ।) इमे क्खु अवरे प्पहूददरा [3]सगदा वीरमणुस्सा दीसन्ति । ता एत्थ गदुअ पुच्छिस्सम् । (उपगम्य ।) हहो, जाणह [4]तुम्हे कस्सिं उद्देसे कुरुणाहो वट्टइत्ति । कहं एदे वि म पेक्खिअ [5]अहिअदर रोअन्दि । (दृष्ट्वा ।) ता ण क्खु एदे वि जाणन्ति । [6]हा, अदिकरुण क्खु एत्थ वट्टइ । एसा वीरमादा समलविणिहद पुत्तअ [7]सुणिअ रत्तसुअणिवसणाए समग्गभूसणाए वहूए सह [8]अणुमरदि । (सश्लाघम् ।) साहु वीरमादे, साहु । अण्णस्सिं वि

च्छल्यान्युद्धरन्ति । तन्न खल्वेते जानन्ति । भवतु । अन्यतो विचे[illegible] । इमे खल्वपरे प्रभूततरा सगता वीरमनुष्या दृश्यन्ते । तदत्र गत्वा । हहो, जानीथ यूय कस्मिन्नुद्देशे कुरुनाथो वर्तत इति । कथमेतेऽपि मा प्रेक्ष्याधिकतर रुदन्ति । तन्न खल्वेतेऽपि जानन्ति । हा, अतिकरुण खल्वत्र वर्तते । एषा वीरमाता समरविनिहत पुत्रक श्रुत्वा रक्ताशुकनिवसनया समग्रभूषणया वध्वा सहानुम्रियते । साधु वीरमात., साधु । अन्यस्मिन्नपि

च्छल्यान्युद्धरन्ति । तन्न खल्वप्येते जानन्ति । भवतु । अन्यतो गत्वा पृच्छामि । अयमपरो बहुप्रहारव्रणितकायोऽकृतव्रणबन्ध एव योधसमूह इम शून्यासन तुरङ्गमुपालभ्य रोदिति । नूनमेतेषा स्वामीह समरे हत । तन्न खल्वप्येते जानन्ति । अन्यतो गत्वा पृच्छामि । एते बहुतरा समिलिता वीरमनुष्या दृश्यन्ते । तदत्र गत्वा पृच्छामि । हहो, जानीथ यूय कस्मिन्नुद्देशे कुरुनाथो वर्तत इति । कथमेतेऽपि मा प्रेक्ष्याधिकतर रुदन्ति । तन्न खल्वप्येते जानन्ति । हा हा, कथमेषा वीरमाता समरविनिहत पुत्र प्रेक्ष्य रक्ताशुकयुगनेपथ्यया सर्वाङ्गभूषणया वध्वा सममनुम्रियते । साधु वीरमात , साधु । आर्ये वीरमात , मा त्वमन्यस्मिन्नपि

---

१ 'ता क्खु एदे ण जाणन्ति' इति पाठ २ '(अग्रतोऽवलोक्य किंचित्परिक्रम्य ।)' इति क्वचिन्नास्ति ३ 'सगदा मणुस्सा दीसन्ति । ता एत्थ गदुअ' ४ 'सकलिदा वीरमाणुसा । ता एत्थ गदुअ' ४ 'तुम्हे' इति क्वचिन्नास्ति ५ 'देखिअ' ६ 'हा, दुक्कर क्खु एत्थ वट्टइ' इति बहुपुस्तकाना पाठ. ७ 'पेक्खिदु'. ८ 'अनुसरदि'

जम्मन्तरे अणिहदपुत्तआ हुविस्ससिं[1] । होदु । अण्णदो पुच्छिस्सम्[2] । (अन्यतो विलोक्य[3] ।) अअं अवरो बहुप्पहारणिहदकाओ अकिदव्वणबन्धो एव्व जोहसमूहो इम सुण्णासण तुलङ्गम उवालहि[4] रोइदि । णूण एदाण एत्थ एव्व सामी वावादिदो । ता ण क्खु एदे वि जाणन्दि । होदु । अण्णदो गदुअ पुच्छिस्सम् । (सर्वतो विलोक्य ।) कह सव्वो एव्व अवत्थाणुरूव व्वसण अणुभवन्तो भागधेअविसमसीलदाए[5] पज्जाउलो जणो । ता क दाणी[6] एत्थ पुच्छिस्सम्। क वा उवालहिस्सम्। होदु । सअ एव्व एत्थ विचिणइस्सम्[7] । (परिक्रम्य ।) होदु । देव्व दाणी उवालहिस्सम् । हहो देव्व, एआदसाण अक्खोहिणीण णाहो जेट्ठो भादुसदस्स भत्ता गङ्गेअद्दोणङ्गराअसल्लकिवकीदवम्मअस्सत्थामप्पमुहस्स राअचक्कस्स सअलप्पुहवीमण्डलेक्कणाहो महाराअदुज्जोहणो

मान्तरेऽनिहतपुत्रका भविष्यसि । भवतु । अन्यत. प्रक्ष्यामि । अयमप[illegible] हुप्रहारनिहतकायोऽकृतव्रणबन्ध एव योधसमूह इम शून्यासन तुरङ्गममुपालभ्य रोदिति । नूनमेतेषामत्रैव स्वामी व्यापादित । तन्न खल्वेतेऽपि जानन्ति भवतु । अन्यतो गत्वा प्रक्ष्यामि । कथ सर्व एवावस्थानुरूप व्यसनमनुभवन्भागधेयविषमशीलतया पर्याकुलो जन. । तत्कमिदानीमत्र प्रक्ष्यामि । क वोपालप्स्ये भवतु । स्वयमेवात्र विचेष्यामि । भवतु । दैवमिदानीमुपालप्स्ये । हहो देव, एकादशानामक्षौहिणीनां नाथो ज्येष्ठो भ्रातृशतस्य भर्ता गाङ्गेयद्रोणाङ्गराजशल्यकृपकृतवर्माश्वत्थामप्रमुखस्य राजचक्रस्य सकलपृथ्वीमण्डलैकनाथो महा-

---

जन्मान्तरेऽविनिहतपुत्रका भविष्यसि । हा हा, अतिकरुण खल्वत्र वर्तते । सर्व एव कालावस्थानुरूपमनुभवन्भागधेयविषमशीलतया बाष्पपर्याकुलो जनो दृश्यते । तत्कमिदानीमत्र पृच्छामि । क वोपालभे । भवतु । दैवमुपालभे । हहो दैव, एकादशानामक्षौहिणीनां नाथो ज्येष्ठो भ्रातृशतस्य भर्ता गाङ्गेयद्रोणशल्याङ्गराजकृपकृतवर्माश्वत्थामप्रमुखस्य सकलराजचक्रस्य पृथ्वीमण्डलैकनाथो महाराजदुर्योधनो-

---

१ 'हुविस्ससि' इत्यसादनन्तर 'पुत्तो वि दे अखण्डिदयसो वीरो हुविस्सदि' इति क्वचिदधिक पाठ २ 'विचिणइस्सम्' ३ 'अवलोक्य'. ४ 'अकिदव्वणप्पहिओरो' ५ 'भागधेअविमुहदाए'. ६ 'दाणीं' इति क्वचिन्नास्ति.

वि अण्णेसीअदि । [1]अण्णेसीअन्तो वि ण जाणीअदि कस्सिं उद्देसे वट्टइ त्ति । ([2]विचिन्त्य नि श्वस्य च ।) अह वा किं एत्थ देव्व उवालहामि । तस्स क्खु एद णिब्भच्छिअविउरवअणवीअस्स [3]अवधीरिदपिदामहहिदोवदेसङ्कुरस्स [4]सउणिप्पोच्छाहणादिविरूढमूलस्स [5]जदुगेहजूदविससाहिणो सभूदचिरआलसबद्धवेरालवालस्स पञ्चा[6]लीकेसग्गहणकुसुमस्स फल परिणमदि । (अन्यतो विलोक्य ।) जहा एत्थ एसो विविहररिणप्पहासवलिदसूरकिरणप्पसूदसक्कचावसहस्ससपूरिददसदिसामुहो लूणकेदुवसो रहो दीसइ ता अह तक्केमि अवस्स एदिणा महाराअदुज्जोहणस्स विस्सामुद्देसेण होदव्वम् । [7]याँव निरूपेमि । (उपगम्य दृष्ट्वा नि श्वस्य च ।)

राजदुर्योधनोऽप्यन्विष्यते । अन्विष्यमाणोऽपि न ज्ञायते कस्मिन्नुद्देशे वर्तत इति । अथ वा किमत्र दैवमुपालभे । तस्य खल्विद निर्भर्त्सितविदुरवचनबीजस्यावधीरितपितामहहितोपदेशाङ्कुरस्य शकुनिप्रोत्साहनादिविरूढमूलस्य जतुगृहद्यूतविषशाखिन सभूतचिरकालसबद्धवैरालवालस्य पाञ्चालीकेशग्रहणकुसुमस्य फल परिणमति । यथात्रैष विविधरत्नप्रभासवलितसूर्यकिरणप्रसूतशक्रचापसहस्रसपूरितदशदिशामुखो लूनकेतुवशो रथो दृश्यते तदह तर्कयाम्यवश्यमेतेन महाराजदुर्योधनस्य विश्रामोद्देशेन भवितव्यम् । यावन्निरूपयामि ।

ऽन्विष्यतेऽन्विष्यमाणोऽपि न ज्ञायते कस्मिन्नु देशे वर्तत इति । अथ वा किमिति दैवमुपालभे । यतस्तस्य खल्वेतन्निर्भर्त्सितन्निदुरवचनबीजस्यावधीरितपितामहहितोपदेशाङ्कुरस्य शकुनिप्रोत्साहनादिरूढमूलस्य जतुगृहद्यूतविषशाखिन सभूतस्य चिरकालसबद्धवैरालवालस्य पाञ्चालीकेशग्रहकुसुमस्य फल परिणमति । अम्मो, यथा चैष विविधरत्नप्रभाभास्वरसगलितसूरकिरणप्रसूतशक्रचापसहस्रपूरितदशदिङ्मुखो लूनकेतुवशो रथो दृश्यते तथा तर्कयाम्यवश्यमेतेन महाराजदुर्यो-

---

१ 'अण्णेसीअन्तो वि ण जाणीअदि । ण जाणे कस्सिं उद्देसे सो वट्टइ त्ति', 'ण जाणे कस्सिं उद्देसे सो वट्टइ त्ति' इति वा पाठ २ '(विचिन्त्य निश्वस्य च ।)' इत्यत्र '(विमृश्य ।)' इति क्वचित्पाठ ३ 'परिभूदपिदामहहिदोवदेसङ्कुरस्स' ४ 'सउणिहृदअप्पोच्छाहणादिविरूढमूलस्स', 'सउणिप्पोच्छाहणारूढमूलस्स' ५ 'कूडविससाहिणो' इति दशरूपके पाठ ६ 'पञ्चालिआकेसग्गहणकुसुमस्स' ७ 'यावन्निरूपेमि' इत्यारभ्य 'अये, कथ सङ्ग्रामात्सुन्दरक प्राप्त' इत्यन्त केषुचित्पुस्तकेषु नास्ति

कध एआदहाण अक्खोहिणीण णाअको भविअ महाराओ दुज्जोहणो पइदपुरिसो विअ असलाहणीए भूमीए उवविट्ठो चिट्ठदि । अध वा तस्स क्खु एद पंच्चालीकेसग्गहकुसुमस्स फल परिणमदि । (क)

(उपसृत्य सूत सज्ञया पृच्छति ।)

सूतः—(दृष्ट्वा) अये, कथ सङ्ग्रामात्सुन्दरक प्राप्त ।

सुन्दरकः—(उपगम्य ।) जअदु जअदु महाराओ[3] । (ख)

दुर्योधनः—(विलोक्य) अये सुन्दरक, कच्चित्कुशलमङ्गराजस्य ।

सुन्दरकः—देव, कुसल सरीरमेत्तकेण । (ग)

कथमेकादशानामक्षौहिणीना नायको भूत्वा महाराजो दुर्योधन प्राकृतपुरुष इवाश्लाघनीयाया भूमावुपविष्टस्तिष्ठति । अथ वा तस्य खल्विद पाञ्चाली-केशग्रहकुसुमस्य फल परिणमति ।

(ख) जयतु जयतु महाराज ।

(ग) देव, कुशल शरीरमात्रकेण ।

धनस्य रथोद्देशेन भवितव्यम् । भवतु । उपसर्पामि । कथमेष देव एकादशानामक्षौहिणीना नाथो महाराजदुर्योधनोऽश्लाघनीय प्राकृतपुरुष इव भूमावुपविष्टस्तिष्ठति । नूनं तस्य खल्वेतत्पाञ्चालीकेशग्रहकुसुमस्य फल परिणमति । अत्र परिमण्डल मण्डली । कङ्कवदन सदंशिका । 'रणबन्ध' इति पाठे रणबन्ध सङ्ग्रामानुबन्ध । नेपथ्य प्रसाधनम् । 'नेपथ्यं प्रतिकर्म प्रसाधनम्' इत्यमर । वध्वा पुत्रवध्वा । भागधेय भाग्यम् । 'भागरूपनामभ्यो धेय' इति धेयप्रत्यय । शीलतया कालावस्थानुरूपमित्यन्वय । विदुरो मन्त्री । पितामहो भीष्म । आलवाल 'थलम्' इति प्रसिद्धम् । अम्मोशब्दो देशी ज्ञातार्थो हर्षार्थो वा । भास्वर परप्रकाशक । सगलित सबद्धो य सूरकिरण आदित्यतेज । उत्तमरत्नतेजोभिरिन्द्रधनुरारभ्यत इति रत्नपरीक्षा । उद्देश प्रदेश । प्राकृत पामर । स्वागत कुशलम् ॥ **सुन्दरक-वाक्ये** । सारथे, कुत स्वागत निवेदय ममागमन देवस्य ॥ जयति देव ॥ 'कच्चित्कामप्रवेदने' इत्यमर । तेन कथयेत्यर्थ ॥ **सुन्दरकवाक्ये** । देव, कुशल स्वामिन

---

१ 'पञ्चालिआकेसग्गहकुसुमस्स', २ '(उपसृत्य दृष्ट्वा च ।)' ३. 'महाराओ' इत्यसादनन्तर केषुचित्पुस्तकेषु 'सूत —(विलोक्य ।) आयुष्मन्, समरात्सुन्दरक आगत' इत्यधिक पाठ ४ 'सरीमेत्तेण'

दुर्योधनः—किं किरीटिनास्य निहता [1]धौरेया हत' सारथिर्भग्नो वा रथ ।

सुन्दरकः—[2]देव, ण भग्गो रहो । से मणोरहो । (क)

[3]दुर्योधनः—किमविस्पष्टकथितैराकुलमपि पर्याकुलयसि मे हृदयम् । [4]तदल सभ्रमेण । अशेषतो विस्पष्ट कथ्यताम् ।

सुन्दरकः—ज देवो आणवेदि । [5]देवस्स मउडमणिप्पहावेण अवणीदा मे रणप्पहारवेअणा (इति साटोप परिक्रम्य ।) सुणादु देवो । अत्थि दाणी कुमालदुस्सासणवह—(इत्यर्धोक्ते [6]मुखमाच्छाद्य शङ्का नाटयति ।)(ख)

सूतः—सुन्दरक, कथय । कथितमेव दैवेन ।

दुर्योधनः—कथ्यताम् । श्रुतमस्माभि ।

(क) देव, न भग्नो रथ । अस्य मनोरथः ।

(ख) यद्देव आज्ञापयति । देवस्य मुकुटमणिप्रभावेणापनीता मे रणप्रहारवेदना । शृणोतु देव. । अस्तीदानी कुमारदु शासनवध—

शरीरमात्रकेणैव ॥ धौरेया अश्वा । धुर वहन्तीत्यर्थे 'धुरो यड्ढौ' इति ढकि धौरेय इति साधु ॥ **सुन्दरकवाक्ये**। देव, न हि रथो भग्नोऽस्माक स्वामिनो मनोरथ.॥ यद्देव आज्ञापयति । अपनीय दूरीकृत्य । **सुन्दरकवाक्ये**। दिष्ट्या महाराजस्य मुकुटमहामणिप्रभावेनापगता मे बाणव्रणवेदना । शृणोतु देव । शृणोतु सारथिश्च । अस्तीदानी कुमारदु शासनवध इति श्रुत स्वामिना दु शासनवध.। 'अथकि स्वीकियार्थकम्' इति भरत ॥ **सुन्दरकवाक्ये**। शृणोतु देव । शृणोतु सारथिश्च ।

---

१ 'राजा—(ससभ्रमम् ।) सुन्दरक, किं किरीटिनाऽस्य निहता धौरेयका ', 'राजा—कि तस्य किरीटिना हता धौरेया ' इति पाठौ २ 'देव, ण भग्गो रहो । से मणोरहो वि', 'देव, ण रहो भग्गो । से मणोरहो वि', 'देव, ण भग्गो रहो । भग्गो से मणोरहो', 'देव, ण भग्गो रहो किं तु अह्माण सअलराअचक्कस्स मणोरहो' इति पाठान्तराणि ३. 'दुर्योधन —(सरोषम् ।) अरे, किमेवमस्पष्टकथितैराकुलमपि मे मन पर्याकुलयसि', 'दुर्योधन —किमविस्पष्टकथितैराकुलमपि मे मन पर्याकुलयसि', 'राजा—किमेवमस्पष्टकथितैराकुलमपि मे मन पर्याकुलयसि' इति नानाविध पाठ ४ 'तदल सभ्रमेण। स्पष्ट कथय', 'तदशेषतो विस्पष्ट कथ्यताम्' इति पाठौ ५ 'अए, देवस्स मउडमणिप्पहावेण', 'देवस्स मउडमणिदसणप्पहावेण' ६ 'मुखमावृणोति' इति पाठ .

सुन्दरकः—(स्वगतम् ।) कध दुस्सासणवहो सुदो देवेण । (प्रकाशम् ।) सुणादु देवो । अज्ज दाव कुमालदुस्सासणवहामरिसिदेण सामिणा अङ्गराएण किदकुडिलभिउडीभङ्गभीसणलाडवट्टेण अविण्णादसधाणतीक्खमोक्खणिक्खित्तसरधारावरिसिणा अभिजुत्तो सो दुराआरो दुस्सासणवेरिओ मज्झमपण्डवो । (क)

उभौ—ततस्तत ।

सुन्दरकः—तदो देव, उहअबलमिलन्तदीप्पन्तकरितुरअपदादिसमुब्भूदधूलिणिअरेण पल्लत्थगअघडासघादेण अ वित्थरन्तेण अन्धआरेण अन्धीकिद उहअबलम् । णं हु गगणतल लक्खीअदि । (ख)

(क) कथ दु शासनवध. श्रुतो देवेन । श्रृणोतु देव. । अद्य तावत्कुमारदुःशासनवधामर्षितेन स्वामिनाङ्गराजेन कृतकुटिलभ्रुकुटीभङ्गभीषणललाटपट्टेनाविज्ञातसधानतीक्ष्णमोक्षनिक्षिप्तशरधारावर्षिणाभियुक्त. स दुराचारो दुःशासनवैरी मध्यमपाण्डव. ।

(ख) ततो देव उभयबलमिलद्दीप्यमानकरितुरगपदातिसमुद्धूतधूलिनिकर-पर्यस्तगजघटासघातेन च विस्तीर्यमाणेनान्धकारेणान्धीकृतमुभयबलम् । न · गगनतलं लक्ष्यते ।

अस्तीदानीं कुमारदु शासनवधामर्षितेन स्वामिनाङ्गराजेन कृतकुटिलभ्रुकुटीभङ्गभीषणेन ललाटपट्टेनाविज्ञातसधानतीक्ष्णमोक्षनिक्षिप्तशरसपातवर्षिणाभियुक्तोऽसौ दुराचारदु शासनवैरी । अत्र सपात आसार । दुराचारेत्यत्र द्वन्द्वसमास ॥**सुन्दरकवाक्ये** । ततो देव, उभयबलमिलद्दीप्यमानकरितुरगपदातिपदसमुद्धूतबहलधूलीनिकरेण पर्यस्तगजघटासघातेनोत्थितेन घनान्धकारेणान्धीकृतमुभयबलम् । प्रनष्ट गगनाङ्गणम् । कुत्रापि किमपि न दृश्यते । ततो देव दूराकृष्टधनुर्गुणास्फा-

---

१ '(स्वगतम् ।) कध दुस्सासणवहो सुदो देवेण। (प्रकाशम् ।)' इति केषुचित्पुस्तकेषु नास्ति २. 'कुमाल' इति क्वचिन्नास्ति ३ 'किद' इति क्वचिन्नास्ति ४ 'णिडलवट्टेण', 'णिडालवट्टेण' ५ 'अविण्णादसधाणमोक्खेण सिलीमुहसधादवरिसिणा अभिजुत्तो सो दुराआरो मज्झमपण्डवो भीमसेणहदओ' इति बहव पाठा ६ 'दीप्पन्त' इति क्वचिन्नास्ति ७ 'णिवहेण' ८ 'पल्लत्थतत्तद्दअघडा—', 'पसत्थगअघडा—'. ९. 'विअ'. १० 'ण भुवणतल लक्खीअदि' इति पाठ

उभौ—ततस्तत ।

सुन्दरकः—तदो देव, दूराकट्टिअधणुग्गुणाच्छोडणटङ्कारेण गम्भीरभीसणेण जाणीअदि गज्जिद पलअजलहरेण त्ति । (क)

दुर्योधनः—ततस्तत ।

सुन्दरकः—[3]तदो देव, दोहिण [3]वि ताण अण्णोण्णसिहणादगज्जिदपिसुण विविहपरिमुक्कप्पहरणाहदकवअसग्गलिदजलणविज्जुच्छडाभासुर गम्भीरत्थणिअचापजलहर प्पसरन्तसरधारासहस्सवरिस जाद समरदुद्दिणम् । (ख)

दुर्योधनः—ततस्तत ।

(क) ततो देव, दूराकृष्टधनुर्गुणाच्छोटनटङ्कारेण गम्भीरभीषणेन ज्ञायते गर्जित प्रलयजलधरेणेति ।

(ख) ततो देव, द्वयोरपि तयोरन्योन्यसिंहनादगर्जितपिशुन विविधपरिमुक्तप्रहरणाहतकवचसगलितज्वलनविद्युच्छटाभासुर गम्भीरस्तनितचापजलधर प्रसरच्छरधारासहस्रवर्षि जात समरदुर्दिनम् ।

लनटकारेण गभीरभीषणेन नभस्तलापूरिणा ज्ञायते गर्जित प्रलयजलधरेणेति ॥ ततो देव, द्वयेषामपि तेषा द्वयोरपि तयो (१) अन्योन्यसिंहनादगर्जितपिशुनाना विविधप्ररूढप्रहरणाहतकवचसगलितज्वलनविद्युच्छटाभास्वर गम्भीरस्तनितचापजलधर प्रसरच्छरधारासहस्रवर्षि जात तत्समरदुर्दिनम् । अत्र पर्यस्त इतस्ततो गत आस्फालनेन यष्टकारस्तेन । सिंहनाद एव गर्जित तस्य पिशुनाना सूचकानाम् । 'पिशुनौ खलसूचकौ' इत्यमर । प्ररूढमुपचितम् । कवच सन्नाह । स्तनित गर्जितम् । 'धारासंपात आसार' इत्यमर । 'मेघच्छन्नेऽह्नि दुर्दिनम्' इत्यमर ॥ **सुन्दरकवाक्ये ।** ततो देव एतस्मिन्नन्तरे ज्येष्ठस्य भ्रातु परिभवशङ्किना धनजयेन वज्रनिर्घातोद्घोषविषमरसितध्वजयष्टित (१) महावानरस्तुरङ्गमसवाहनाव्याकुलवासुदेव

---

१ 'धणुग्गुणच्छोटणटकारगम्भीरभीसणेण अन्धआरेण जाणीअदि', 'धणुग्गुणच्छोडणटकारगम्भीरभीसणेण भअआरिणा अन्धआरेण जाणीअदि' इति पाठौ २ 'तदो अ देव' ३ 'वि' इति क्वचिन्नास्ति ४ 'सजलिदजलणविज्जुअ बहल्लुहिलबिन्दुखज्जोअभासुर गम्भीरत्थणिअचापजलहरप्पसरिदसरधारासहस्सवरिसदुद्दसण सभूद समरदुद्दिणम्' इति बहुपुस्तकाना पाठ, 'सजनिदजलणविज्जुअ' इत्यत्र 'सजलिदजलणविज्जुछअ इत्यपि क्वचित्पाठो दृश्यते

सुन्दरकः—[1]तदो देव, एदस्सिं अन्तरे जेट्ठस्स भादुणो [2]परिभवसङ्किणा धणंजएण [3]वज्जणिग्घादणिग्घोसविसमरसिदधअअग्गट्ठिदमहावाणरो [4]तुरङ्गमसवाहणवापिदवासुदेवसङ्खचक्कासिगदालञ्छिदचउब्बाहुदण्डो आपूरिअपञ्चजण्णदेअदत्ततारररसिदप्पडिरवभरिददसदिसामुहकुहरो धाविदो त उद्देस [5]रहवरो । (क)

दुर्योधनः—ततस्तत ।

सुन्दरकः—तदो भीमसेणधणजएहि अभिजुत्त पिदर पेक्खिअ ससभम विअलिअ अवधूणिअ रअणसीसअ आकण्णाकट्ठिदकठिणकोदण्डजीओ [6]दाहिणहत्तुक्खित्तसरपुखविघट्टणतुवराइदसारहीओ त देस उवगदो कुमालविससेणो । (ख)

(क) ततो देव, एतस्मिन्नन्तरे ज्येष्ठस्य भ्रातु परिभवशङ्किना धनजयेन वज्रनिर्घातनिर्घोषविषमरसितध्वजाग्रस्थितमहावानरस्तुरङ्गमसवाहनव्यापृतवासुदेवशङ्खचक्रासिगदालाञ्छितचतुर्बाहुदण्ड आपूरितपाञ्चजन्यदेवदत्ततारररसितप्रतिरवभरितदशदिशामुखकुहरो धावितस्तमुद्देश रथवर ।

(ख) ततो भीमसेनधनजयाभ्यामभियुक्त पितर प्रेक्ष्य ससम्भ्रम विगलितमवधूय रत्नशीर्षकमाकर्णाकृष्टकठिनकोदण्डजीवो दक्षिणहस्तोत्क्षिप्तशरपुङ्खविघट्टनत्वरायितसारथिकस्त देशमुपगत कुमारवृषसेन. ।

शङ्खचक्रासिगदालाञ्छितचतुर्बाहुदण्ड आपूरितपाञ्चजन्यदेवदत्ततारररसितप्रतिरवोद्धरितदशदिङ्मुखकुहर प्रापितस्तमेवोद्देश धनजयस्यैव रथवर । अत्र वज्रस्य निर्घातवद्य उद्घोष उच्चै शब्दस्तद्वद्विषम रसित यस्य स तथा । 'शङ्खो लक्ष्मीपते पाञ्चजन्य' इत्यमर । देवदत्तोऽर्जुनशङ्ख । तार उच्च । भरितेति तारकादिखादितच् ॥ **सुन्दरकवाक्ये** । ततो देव, भीमसेनधनजया+याममियुक्त पितरं प्रेक्ष्य ससम्भ्रमामुक्तविगलितमवधूय रत्नशीर्षकमाकर्णाकृष्टकठिनकोदण्डजीवो दक्षिणहस्तनिक्षिप्तशरपुङ्खविघट्टनात्वरितसारथिस्तमेवोद्देशमुपगत कुमारवृषसेन ।

---

१ 'तदो अ देव' २ 'पराभवसङ्किणा'. ३ 'वज्जणिग्घादणिग्घोसो विसमरसिदहरसिदहओ सिहरट्ठिदवाणरो', 'वज्जणिग्घादणिग्घोसविसमरसिदरहसिदहओ सिहरट्ठिदवाणरो', 'वज्जणिग्घादणिग्घोसविसमरहरसिदहओ सिहरट्ठिदवाणरो' इति नानाविध पाठ ४ 'तुरङ्गमधारणवावारिद—' ५ 'सङ्खचक्कगदासिलञ्छिदचडुलचाउ[illegible]हुदण्डदुद्दसणो' इति बहुपुस्तकाना पाठ ६ 'रहो' 'कोदण्डमण्डलो' ८ 'दाहिणहत्थविक्खित्तसरपुङ्खबन्धणो विघट्टणतुवराइदसारहीओ' इत्यपर. पाठ .

दुर्योधनः—(सावष्टम्भम्।) ततस्तत ।

सुन्दरकः—तदो अ देव, तेण आअच्छन्तेण एव्व कुमालविस-सेणेण विदलिदासिलदासामलसिणिद्धपुङ्खेहि कठिणकङ्कवत्तेहि किसणवण्णेहि [2]साणसिलाणिसिदसामलसल्लबन्धेहि कुसुमिदो विअ तरू मुहुत्तएण सिलीमुहेहि पच्छादिदो धणजअस्स रहवरो। (क)

उभौ—(सहर्षम्।) ततस्तत ।

सुन्दरकः—तदो देव, तीक्खविक्खित्तणिसिदभल्लबाणवरिसिणा धणजएण ईसि विहसिअ भणिदम्—अरे रे विससेणे, पिदुणो वि दाव दे ण जुत्त मह [3]कुविदस्स अभिमुह ठादुम्। किं उण भवदो बालस्स। ता गच्छ। अवरेहि कुमारेहि [4]सह गदुअ आओधेहि।'

(क) ततश्च देव, तेनागच्छतैव कुमारवृषसेनेन विदलितासिलताशामललिग्धपुङ्खै कठिनकङ्कपत्रै कृष्णवर्णै शाणशिलानिशितश्यामलश्यल्यबन्धै कुसुमित इव तरुर्मुहूर्तेन शिलीमुखै प्रच्छादितो धनजयस्य रथवर ।

(ख) ततो देव, तीक्ष्णविक्षिप्तनिशितभल्लबाणवर्षिणा धनजयेनेषद्विहस्य भणितम्—'अरे रे वृषसेन, पितुरपि तावत्ते न युक्त मम कुपितस्याभिमुख स्थातुम्। कि पुनर्भवतो बालस्य। तद्गच्छ। अपरै. कुमारै सह गत्वा युध्यस्व।

अत्रामुक्त परिहित । शीर्षक 'टोप्पर' इति ख्यातम्। 'शीर्षकम्। शीर्षण्यं च शिरस्त्रे' इत्यमर । जीवा पतञ्चिका ॥ **सुन्दरकवाक्ये**। ततो देव, स्वागतेनैव कुमारवृषसेनेन महदाश्चर्यं कृतम् । वैडूर्यशिलाश्यामलसुस्निग्धशल्यबन्धैः कठिनकङ्कपक्षकृष्णाभनै शिलानिशितमासलोज्ज्वलैर्यथा कुसुमितस्तरुवर शिलीमुखैस्तथा प्रच्छादितो धनजयस्य रथवर । अत्र वैडूर्यशिला मणिविशेष । शल्यबन्धो बाणभेद । कङ्क 'कङ्कारी' इति प्रसिद्ध पक्षी। शिलाया यन्निशित निघर्षण तेन मासलै स्निग्धैरत एवोज्ज्वलितै । 'शिलीमुखौ बाणभृङ्गौ' इत्यमर । **सुन्दरकवाक्ये** । ततो देव, तीक्ष्णमोक्षनिक्षिप्तनिशितशरसपाताभिघातजातमन्युना धनजयेनेषद्विहस्य भणितम्—'अरेरे वृषसेन, पितुरपि तावन्न ते युक्त मम परिकुपितस्य पुरत स्थातुम्। कि पुनर्भवतो बालकस्य ।तद्गच्छ रे गच्छ। अपरै

---

१ 'विदलिदसिहासामल–' २ 'सिलाणिसिद–' ३ 'कुविदस्स' इति क्वचिन्नास्ति ४ 'सह गदुअ' इति क्वचिन्नास्ति

एव्व वाअ णिसमिअ गुरुअणाहिक्खेवेण उद्दीविअकोवोपरत्त-मुहमण्डलविअम्भिअभिउडीभङ्गभीसणेण चावधारिणा [1]कुमालविस-सेणेण मम्मभेदएहि परुसविसमेहि [2]सुदिवहकिदप्पणएहि णिब्भ-च्छिदो गण्डीवी बाणेहि ण उण दुट्ठवअणेहि [3]। (ख)

दुर्योधनः—साधु वृषसेन, साधु । [4]सुन्दरक, ततस्तत ।

सुन्दरकः—तदो देव, [5]णिसिदसराभिघादवेलअणोपजादमण्णुणा किरीटिणा चण्डगण्डीवजीआसद्दणिज्जिदवज्जणिग्घादघोसेण बाण-णिपडणपडिसिद्धदसणप्पसरेण पत्थुद सिक्खाबलाणुरूव किं वि अच्चरिअम् । (क)

दुर्योधनः—(साकूतम् ।) ततस्तत ।

एव वाच निशम्य गुरुजनाधिक्षेपेणोद्दीपितकोपोपरक्तमुखमण्डलविजृम्भित-भ्रुकुटीभङ्गभीषणेन चापधारिणा कुमारवृषसेनेन मर्मभेदकै परुषविषमै. सुदिवसकृतप्रणयैर्निर्भर्त्सितो गाण्डीवी बाणैर्न पुनर्दुष्टवचनै ।

(क) ततो देव, निशितशराभिघातवेदनोपजातमन्युना किरीटिना चण्ड-गाण्डीवजीवाशब्दनिर्जितवज्रनिर्घातघोषेण बाणनिपतनप्रतिषिद्धदर्शनप्रसरेण प्रस्तुत शिक्षाबलानुरूप किमप्याश्चर्यम् ।

कुमारकै सह गत्वा योधय' इति । एव वाच निशम्य गुरुजनाधिक्षेपजनितकोपोपर-क्तमुखमण्डलभ्रुकुटीविजृम्भितनेपथ्यधारिणा कुमारवृषसेनेन मर्मभेदकरै सुतव-धकृतप्रणयैर्निर्भर्त्सितो गाण्डीवी बाणैर्न पुनर्दुष्टवचनै । अत्र विजृम्भित कृतम् सुतवधेऽर्जुनसुतस्याभिमन्योर्वधे । निर्भर्त्सितो वर्षित ॥ **सुन्दरकवाक्ये** । ततो देव, निशितशराभिघातजातमन्युना किरीटिना चण्डगाण्डीवजीवाशब्दविनिर्जित-वज्रनिर्घातघोषेणाविज्ञातबाणनिपातप्रतिषिद्धदर्शनप्रसरेण प्रस्तुत शिक्षाबलानुरूप किमप्याश्चर्यम् । अत्र प्रस्तुत कृतम् । शिक्षाबलाभ्यास ॥ **सुन्दरकवाक्ये** । ततो देव, तत्तादृश प्रेक्ष्य शत्रो समरव्यापारचतुरत्वमविभाविततूणीरमुखधनुर्गु-णसन्धानागमनशरसधानतीक्ष्णमोक्षचटुलकरतलेन कुमारवृषसेनेन सविशेष प्रस्तुत समरकर्मान्त । अत्राविभावितोऽप्रकाशित । तूणीर 'तोन' इति ख्यातम् ।

---

१ 'कुमालविससेणेण वि' २ 'सुदवहकिदप्पणएहिं', 'सुदिपधकिदप्पणएहिं' इति पाठौ ३ 'दुव्वअणेहिं' ४ 'सुन्दरक' इति क्वचिन्नास्ति ५ 'तदो अ देव' ६ 'सिदसराभिघाद—' ७ 'गण्डीविणा'

सुन्दरकः—तदो[1] देव, [2]त तारिस पेक्खिअ सत्तुणो समरव्वावार-चउरत्तण अविभाविअतूणीरमुहधणुग्गुणगमणागमणसरसधाणमोक्ख-चडुलकरअलेण कुमालविससेणेण वि सविसेस पत्थुद समलकम्म ।(क)

दुर्योधनः—ततस्तत ।

सुन्दरकः—तदो देव, एत्थन्तरे विमुक्कसमरव्वावारो मुहुत्तवि-स्सामिदवेराणुबन्धो दोण वि कुरुराअपण्डवबलाण 'साहु कुमालविस-सेण, साहु' त्ति किदकलअलो वीरलोओ अवलोइदु पउत्तो । (ख)

दुर्योधनः—(सविस्मयम् ।) ततस्तत ।

(क) ततो देव, तत्तादृश प्रेक्ष्य शत्रो समरव्यापारचतुरत्वमविभावित तूणीरमुखधनुर्गुणगमनागमनशरसधानमोक्षचटुलकरतलेन कुमारवृषसेनेनापि सविशेष प्रस्तुत समरकर्म ।

(ख) ततो देव, अत्रान्तरे विमुक्तसमरव्यापारो मुहूर्तविश्रामितवैरानु-बन्धो द्वयोरपि कुरुराजपाण्डवबलयो 'साधु कुमारवृषसेन, साधु' इति कृतकल-कलो वीरलोकोऽवलोकयितु प्रवृत्त ।

चटुल मनोज्ञ कुशल वा । प्रस्तुत आरब्ध । आरम्भ उपक्रम । 'समरकर्मान्त' इति पाठे समर एव कर्मान्त 'कीमत' इति प्रसिद्ध ॥ **सुन्दरकवाक्ये** । इतो देव, अत्रान्तरे विमुक्तसमरव्यापारो मुहूर्तविश्रामितवैरानुबन्धो द्वयोरपि तयो कुरुपाण्डवराजबलयो 'साधु कुमारवृषसेन, साधु' इति कृतकलकलो वीरलोकोऽव-

---

१ 'तदो अ देव' २ 'त पेक्खिअ तस्स सत्तुणो समरव्वावारचउरत्तण', 'त अ तारिस समरव्वावारचउरत्तण पेक्खिअ' इति पाठौ ३ 'तूणी-मुहधणुग्गुणगमणासणसधाणमोक्खचडुलकरअलेण', 'तूणीमुहधणुग्गुणगमणासणसर-सधाणचडुलकरअलेण,' 'तूणीरमुहधणुग्गुणगमणागमणसधाणमोक्खचटुलकरअलेण', 'तूणीमुहधणुग्गुणगमणागमणबाणसधाणमोक्खचटुलकरअलेण' इति पाठान्तराणि ४ 'तदो अ देव, परिसेसिदरणव्वावारेसु विमुक्कचिरणिघडिअवेराणुबन्धेसु कुरुराअपण्डवबलेसु साहु विससेण, साहु त्ति कलअलमुहरो वीरलोओ आलो-इदु पउत्तो', 'तदो अ देव, परिसेसिदरणव्वावारो विमुक्कचिरणिव्वट्टिअवेराणुबन्धो दोण वि कुरुराअपण्डवबलेसु साहु विससेण, साहु त्ति कलअलमुहरो वीरलोओ आलोइदु पउत्तो' इति पाठौ ५ 'सुपरिच्चत्तचिरआलसवट्टिअवेराणुबन्धो' इति पाठ ६ 'कुरुपण्डवाण हि'

सुन्दरकः—तदो अ देव, [1]अवहीरिदसअलराअधाणुक्कचक्कपराक्कमसालिणो सुदस्स तहाविहेण समलकम्मालम्भेण [2]हरिसरोसकरुणासकडे [3]वट्टमाणस्स सामिणो अङ्गराअस्स णिवडिआ सरपद्धइ भीमसेणे [4]बाप्पपज्जाउला दिट्ठी कुमालविससेणे । (क)

दुर्योधनः—(सभयम् ।) ततस्तत ।

सुन्दरकः—तदो अ देव, उभअबलप्पउत्तसाहु[5]कारामरिसिदेण गण्डीविणा तुरगेसु सारहि पि रहवरे धणु पि जीआइ पि णलिन्दलञ्छणे सिदा[6]दवत्ते अ व्वावारिदो सम सिलीमुहासारो । (ख)

दुर्योधनः—(सभयम् ।) ततस्तत ।

(क) ततश्च देव, अवधीरितसकलराजधानुष्कचक्रपराक्रमशालिन. सुतस्य तथाविधेन समरकर्मारम्भेण हर्षरोषकरुणासकटे वर्तमानस्य स्वामिनोऽङ्गराजस्य निपतिता शरपद्धतिर्भीमसेने बाष्पपर्याकुला दृष्टि कुमारवृषसेने ।

(ख) ततश्च देव, उभयबलप्रवृत्तसाधुकारामर्षितेन गाण्डीविना तुरगेषु सारथावपि रथवरे धनुष्यपि जीवायामपि नरेन्द्रलाञ्छने सितातपत्रे च व्यापारित. सम शिलीमुखासार ।

लोकितु प्रवृत्त । अत्र विश्रामित उपशान्त' ॥ **सुन्दरकवाक्ये** । ततो देव अवधीरितसकलराजधानुष्कचक्रपराक्रमशालिन सुतस्य तथाविधसमरकर्मारम्भेण हर्षरोषकरुणसकटे वर्तमानस्य स्वामिनोऽङ्गराजस्य निपतिता शरपद्धतिर्भीमसेने बाष्पपर्याकुला दृष्टि कुमारवृषसेने । अत्र धानुष्को धनुर्धर । धनु प्रहरणमस्येत्यर्थे 'प्राग्वहतेष्ठक्' इति ठक्प्रत्यय । सुतविक्रमदर्शनेन हर्ष । शत्रुदर्शनेन रोष । बालस्य महाबलेन युद्धात्करुणमिति रसत्रयमत्र । पद्धति पङ्क्ति ॥ **सुन्दरकवाक्ये** । ततो देव, उभयबलविमुक्तसाधुकारामर्षितेन गाण्डीविना तुरगेषु सारथौ रथवरे धनुषि जीवाया नरेन्द्रकुललाञ्छने सितातपत्रे सम व्यापारित शिलीमुखासार । अत्र लाञ्छने चिह्ने । सितातपत्रे श्वेतच्छत्रे । सममेकदैव ॥ **सुन्दरकवाक्ये** । ततो

---

१ 'अवहीरिदसअलधाणुक्कचक्क—' २. 'करुणहरिसरोससकडे', 'हरिसरोसकरुणासङ्कासकडे' ३ 'अणुवट्टमाणस्स'. ४. 'बाप्पआउला' ५. साहुकारामरिसिदेण सरबरिसपज्जलिदेण गण्डीविणा' इति बहव. ६ 'सिदादवत्ते व्वावारिदा सम सिलीमुहा' इत्यपर पाठ

सुन्दरकः—तदो देव, विरहो [1]लूणगुणकोदण्डो परिब्भमणमेत्तव्वावारो मण्डलाग्गेण विअरिदु पउत्तो कुमालविससेणो । (क)

[2]दुर्योधनः—(साशङ्कम् ।) ततस्तत· ।

सुन्दरकः—तदो देव, सुदरहविद्धं[3]सणामरिसिदेण सामिणा अङ्गराएण अगणिअभीमसेणाभिजोएण [4]पॅडिमुक्को धणजअस्स उवरि सिलीमुहासारो । [5]कुमालो वि परिजणोवणीद अण्ण रह आरुहिअ पुणो वि पउत्तो [6]धणजएण सह आओधेदुम् । (ख)

[7]उभौ—साधु वृषसेन, साधु । ततस्तत ।

(क) ततो देव, विरथो लूनगुणकोदण्ड· परिभ्रमणमात्रव्यापारो मण्डलाग्रेण विचरितु प्रवृत्त कुमारवृषसेन ।

(ख) ततो देव, सुतरथविध्वसनामर्षितेन स्वामिनाङ्गराजेनागणितभीमसेनाभियोगेन परिमुक्तो धनजयस्योपरि शिलीमुखासार । कुमारोऽपि परिजनोपनीतमन्य रथमारुह्य पुनरपि प्रवृत्तो धनजयेन सहायोधितुम् ।

देव, अत्रान्तरे विरथ कुमारवृषसेनो लूनगुणकोदण्ड परिभ्रमणमात्रव्यापारो मण्डलाग्रेण विचरितु प्रवृत्त । अत्र मण्डलाग्रेण खड्गेन । सहार्थे तृतीया । 'कौक्षेयको मण्डलाग्र करवाल· कृपाणवत्' इत्यमर· ॥ **सुन्दरकवाक्ये** । ततो देव, स्वामिना सुतरथविध्वसनामर्षितेनागणितभीमसेनाभियोगेन परिमुक्तो धनजयस्योपरि शिलीमुखासार । कुमारोऽपि परिजनोपनीतमन्यं रथमारुह्य पुनरपि प्रवृत्तो धनजयेन सहायोधितुम् । अत्रायोधितु युद्ध कर्तुम् ॥ **सुन्दरकवाक्ये** । ततो

---

१ 'लूणगुणकोदण्डमेत्तपरिब्भमणव्वारप्पडिसिद्धसरसपादो मण्डलेहिं विआरिदु पउत्तो कुमालो', 'लूणगुणकोदण्डो परिब्भमणमेत्तव्वावारप्पडिसिद्धसरसपादो मण्डलाई विरइदु पउत्तो कुमालो', 'लूणगुणकोदण्डो परिब्भमणव्वावारमेत्तप्पडिसिद्धसरसपादो मण्डलाइ विरचइदु पउत्तो कुमालो' इति पाठान्तराणि २ 'दुर्योधन —अहो, बालस्य पराक्रमो मूढता च । उभौ—'ततस्तत ' इति क्वचित्पाठ ३ 'विद्धसणामरिसुद्दीविदेण' ४ 'पल्लत्थो' ५ 'कुमालविससेणो' ६ 'धर्णजआभिजोए' ७ 'उभौ—साधु वृषसेन' इत्यसादारभ्य 'सुन्दरक —तदो देव' इत्यन्त बहुषु पुस्तकेषु नास्ति

सुन्दरकः—तदो देव, भणिद च कुमालेण—'रे रे तादाहिक्खेवमुहल मज्झमपण्डव, मह सरा तुह सरीर [1]उज्जिअ अण्णस्सिं ण णिवडन्ति' त्ति [2]भणिअ सरसहस्सेहि पण्डवसरीरं पच्छादिअ सिंहणादेण गज्जिदु पउत्तो । (क)

दुर्योधनः—(सविस्मयम् ।) अहो, बालस्य पराक्रमो [3]मुग्धस्वभावेऽपि । ततस्तत ।

सुन्दरकः—तदो अ देव, [4]त सरसपाद समवधूणिअ [5]णिसिदसराभिघादजादमण्णुणा किरीटिणा गहिदा रहुच्छङ्गादो कणन्तकणअकिङ्किणीजालझङ्कारविराइणी मेहोवरोहविमुक्कणहत्थलणिम्मला णिसिदसामलसिणिद्धमुही विविहरअणप्पहाभासुरभीसणरमणिज्जद[6]सणासत्ती विमुक्का कुमालाहिमुही । (ख)

(क) ततो देव, भणित च कुमारेण—'रे रे ताताधिक्षेपमुखर मध्यमपाण्डव, मम शरास्तव शरीरमुज्झित्वान्यस्मिन्न निपतन्ति' इति भणित्वा शरसहस्रै पाण्डवशरीर प्रच्छाद्य सिंहनादेन गर्जितु प्रवृत्त. ।

(ख) ततश्च देव, त शरसपात समवधूय निशितशराभिघातजातमन्युना किरीटिना गृहीता रथोत्सङ्गात्कणत्कनककिङ्किणीजालझङ्कारविराविणी मेघोपरोधविमुक्तनभस्तलनिर्मला निशितश्यामलस्निग्धमुखी विविधरत्नप्रभाभासुरभीषणरमणीयदर्शना शक्तिर्विमुक्ता कुमाराभिमुखी ।

देव, भणित [illegible] कुमारेण—'अरे रे ताताधिक्षेपकारक मुखरमध्यमपाण्डव, न मम शरासारास्तव शरीरमुज्झित्वान्यस्मिन्निपतन्ति' इति भणित्वा शरशतसहस्रै पाण्डवशरीर प्रच्छाद्य सिंहनाद विचरितु प्रवृत्तम् । अत्र प्रच्छाद्य व्याप्य ।विचरितु कर्तुम् । प्रवृत्त दृषसेनेनेति शेष ॥ **सुन्दरकवाक्ये** । ततो देव, त शरसपात समवधूय निशितशराभिघातजातमन्युना किरीटिना गृहीता रथोत्सङ्गात्कणत्कनककिङ्किणीजालहुकाररावणी महामेघोपरोधविमुक्तनभस्तलनिर्मला निशितश्यामलस्निग्धमुखी विविधरत्नप्रभाघटितशीर्षभीषणरमणीयदर्शना महाशक्तिविमुक्ता

---

१. 'वज्जिअ' २ 'भणन्तेण सरसहस्सेहिं पण्डवसरीर पच्छादिद कुमालेण ।' इति क्वचित्पाठ ३ 'मुग्धस्वभावस्यापि', 'मुग्धस्वभावोऽपि' ४ 'तस्स सरसहस्सस्सपादं समवधूणिअं', 'तस्सा सरसहस्सासपाद अवधूणिअ' ५ 'णिसिदसराभिघादजादमण्णुणा' इति क्वचिन्नास्ति ६ 'सत्ती सोवहास विमुक्का अ धणजएण कुमारेण' इति बहुपुस्तकाना पाठ

दुर्योधनः—(सविषादम् ।) अहह । ततस्तत ।

सुन्दरकः—तदो देव, पज्जलन्ती सत्ति पेक्खिअ विअलिअ अङ्गराअस्स हत्थादो सैसरं धणु हिअआदो वीरसुलहो उच्छाहो णैअणादो बाप्पसलिलं पि । रसिद अ सिंहणाद विओदलेण । दुक्कल दुक्कल त्ति आक्कन्दिद कुरुबलेण । (क)

दुर्योधनः—(सविषादम् ।) ततस्तत ।

सुन्दरकः—तदो देव, कुमालविससेणेण आकण्णपूरिदेहि णिसिदखुरप्पबाणेहि चिर णिज्झइअ अद्धपहे एव्व भाईरही विअ आअच्छन्ती जधा भअवदा विसमलोअणेण तधा तिधा किदा सत्ती । (ख)

दुर्योधनः—साधु वृषसेन, साधु । ततस्तत ।

(क) ततो देव, प्रज्वलन्तीं शक्तिं प्रेक्ष्य विगलितमङ्गराजस्य हस्तात्सशरं धनुर्हृदयाद्वीरसुलभ उत्साहो नयनाद्बाष्पसलिलमपि । रसित च सिंहनाद वृकोदरेण । दुष्कर दुष्करमित्याक्रन्दित कुरुबलेन ।

(ख) ततो देव, कुमारवृषसेनेनाकर्णपूरितैर्निशितक्षुरप्रबाणैश्चिर निर्ध्यार्धपथ एव भागीरथीवागच्छन्ती यथा भगवता विषमलोचनेन तथा त्रिधा कृता शक्ति ।

कुमाराभिमुखी । अत्र क्वणच्छब्दायमानम् । भीषणता विचित्ररूपतया । रमणीयता स्वभावादेव ॥ **सुन्दरकवाक्ये** । ततो देव, ता तादृशीं प्रज्वलन्तीं शक्तिं प्रेक्ष्य विगलितमङ्गराजस्य हस्तात्सशरं धनुर्हृदयाद्वीरसुलभउत्साहो नयनाद्बाष्पसलिल च।रसित च सिंहनाद वृकोदरेण । दुष्कर दुष्करमिति कृत्वाक्रन्दित कुरुबलेन । अत्र रसित्त शब्दितम् । सिंहस्येव नाद यथा स्यात्तथा ॥ **सुन्दरकवाक्ये** । ततो देव, कुमारेणाकर्णपूरितैर्निशितक्षुरप्रबाणैर्दूर निर्ध्यार्त्वार्धपथ एवागच्छन्ती भागीरथी भगवता विषमलोचनेनेव त्रिधा कृता शक्ति । अत्र निर्ध्यात्वा विचिन्त्य । भागीरथी गङ्गा । विषमलोचनेन हरेण । गङ्गापि हरेण त्रिपथगा कृतेति भाव ॥ **सुन्द-**

---

१ 'दुर्योधन —(सविषादम् ।) अहह', 'दुर्योधन —(सविषादम् ।) ततस्तत ' इति पाठौ २ 'सबाण' ३ 'णअणादो बाप्पसलिल वअणादो रसिदम् । हसिद अ धणजएण सिंहणाद विणादिद विओदलेन अ' इति बहुपुस्तकाना पाठ ४ 'आकण्णाकिट्ठणिसिदखुरप्पेण सुचिर विज्झइअ अद्धपहे एव्व भाईरही विअ भअवदा विसमलोअणेण तिधा किदा सत्ती' इति बहुपुस्तकाना पाठ

दरकः—तदो अ देव, एदस्सि अन्तले [1]कलमुहरे[2]ण लोअसाहुवादेण अन्तरिदो [3]समरतूरणिग्घोसो । सिद्धचालणगणाव[4]मुक्ककुसुमप्पअरेण पच्छादिद समलाङ्गणम्[5] । भणिअ अ सामिणा अङ्गराएण—'भो वीर विकोदल, असमत्तो तुह मह वि समलव्वावारो । ता अण्णुमण्ण म मुहुत्तअम् । पेक्खामहे [6]दाव वस्सस्स तुह भादुणो अ धणुव्वेदसिक्खाचउरत्तणम् । [7]तुह वि एद पेक्खणिज्जम्' त्ति । (क)

दुर्योधनः—ततस्तत ।

सुन्दरकः—तदो देव, विस्समिदाओधनव्वावारा मुहुत्तविस्स[8]दणिअवेराणुबन्धा दुवे वि पेक्खआ जादा भीमसेणाङ्गराआ । (ख)

(क) ततश्च देव, एतस्मिन्नन्तरे कलमुखरेण वीरलोकसाधुवादेनान्तरित' समरतूर्यनिर्घोष । सिद्धचारणगणविमुक्तकुसुमप्रकरेण प्रच्छादित समराङ्गणम् । भणित च स्वामिनाङ्गराजेन—'भो वीर वृकोदर, असमाप्तस्तव ममापि समरव्यापार । तदनुमन्यस्व मा मुहूर्तम् । प्रेक्षावहे तावद्वत्सस्य तव भ्रातुश्च धनुर्वेदशिक्षाचतुरत्वम् । तवाप्येतत्प्रेक्षणीयम्' इति ।

(ख) ततो देव, विश्रमितायोधनव्यापारौ मुहूर्तंविश्रमितनिजवैरानुबन्धौ द्वावपि प्रेक्षकौ जातौ भीमसेनाङ्गराजौ ।

रकवाक्ये। ततो देव एतस्मिन्नन्तरे कलमुखरेण वीरसाधुवादेनान्तरित समरतूर्यनिर्घोष । सिद्धचारणगणप्रमुक्तकुसुमप्रकरेण संच्छादित समराङ्गणम् । भणित च स्वामिनाङ्गराजेन—'भो वीर वृकोदर, असमाप्त एव तव मम समरव्यापार । तदनुमन्यस्व क्षणमात्रमेव । प्रेक्षावस्तावत्तव भ्रात्रा सम मम पुत्रस्य धनुर्वेदशिक्षाचतुरत्वम् । तवाप्येतत्प्रेक्षणीयम्' इति ॥ **सुन्दरकवाक्ये**। ततो देव,

---

१ 'किदकलकलमुहरेण' २ 'समरतूररवो' ३ 'विमुक्केण कुसुमप्पअरेण' ४ 'समलाङ्गणम्' इत्यसादनन्तर बहुषु पुस्तकेषु 'दुर्योधन —अहो, बालस्य पराक्रम । ततस्तत' । सुन्दरक —तदो अ देव, भणिअ सामिणा अङ्गराएण, भो विकोदल' इति पाठो वर्तते. ५ 'अण्णुमण्णद्धु' ६ 'दाव क्खणमेत्त वस्सस्स तुह भादुणो धणुव्वेदसिक्खाणिउणत्तणम्' इति पाठ ७ 'तुह वि एद पेक्खणिज्ज त्ति । तदो विरमिदरणद्वावारा मुहुत्तविस्सामिदलिणिअवेराणुबन्धादो मुहुत्तअ प्पसमिदवेरा जादा दुवे वि अ पेक्खआ भीमसेणाङ्गराआ' ८ 'तुह वि एद पेक्खणिज्ज त्ति । तदो विरमिदरणद्वावारा मुहुत्तविस्सामिदलिणिअवेराणुबन्धा मुहुत्त दुवे पेक्खआ भीमसेणाङ्गराआ' इति पाठौ

सुन्दरकः—तदो अ देव, सत्तिखण्डणामरिसिदेण गण्डीविणा भणिअम्—'अरे रे दुज्जोहणप्पमुहा—(इत्यर्धोक्ते लज्जा नाटयति ।) (क)

दुर्योधनः—सुन्दरक, कथ्यताम् । परवचनमेतत् ।

सुन्दरकः—सुणादु देवो । 'अरे दुज्जोहणप्पमुहा कुरुबलसेणापहुणो, अविणअणोकण्णधार कण्ण, तुह्मेहि मह परोक्ख बहुहि महारहेहि पडिवारिअ एआई मम पुत्तओ अहिमण्णू ववावादिदो । अह उण तुम्हाण पेक्खन्ताण एव्व एद कुमालविससेण सुमरिदव्वसेस करोमि' त्ति भणिअ सगव्व आप्फालिद णेण वज्जणिग्घादघोसभीसणजीआरव गण्डीवम् । सामिणा वि सज्जीकिद कालपुट्ठम् । (ख)

(क) ततश्च देव, शक्तिखण्डनामर्षितेन गाण्डीविना भणितम्—'अरे रे दुर्योधनप्रमुखाः—

(ख) शृणोतु देव । 'अरे, दुर्योधनप्रमुखा कुरुबलसेनाप्रभव', अविनय नौकर्णधार कर्ण, युष्माभिर्मम परोक्ष बहुभिर्महारथै परिवृत्यैकाकी मम पुत्रको-ऽभिमन्युर्व्यापादित । अह पुनर्युष्माक प्रेक्षमाणानामेवैत कुमारवृषसेन स्मर्तव्यशेष करोमि । इति भणित्वा सगर्वमास्फालितमनेन वज्रनिर्घातघोषभीषणजीवारव गाण्डीवम् । स्वामिनापि सज्जीकृत कालपृष्ठम् ।

विश्रमितायोधनव्यापारौ मुहूर्तविश्रमितनिजवैरानुबन्धौ द्वावपि प्रेक्षकौ जातौ भीमसेनाङ्गराजौ । अत्र विश्रमित उपशान्त । प्रेक्षको द्रष्टा ॥ **सुन्दरकवाक्ये ।** ततो देव, शक्तिखण्डनामर्षितेन गाण्डीविना भणितम्—'अरे रे दुर्योधनप्रमुखाः कुरुयोधा, अविनयनौकर्णधार कर्ण, युष्माभिर्बहुभिर्महारथैर्मिलित्वा मया शून्ये मम पुत्रोऽभिमन्युर्बाल एकाकी व्यापादित । अह पुनर्युष्माक प्रेक्षकाणामेवैत कुमार वृषसेन स्मर्तव्यशेष करोमि । तद्भ्रियता भ्रियताम्' इत्यास्फालित तेन वज्रनिर्घातोद्घोषगम्भीरभीषणजीवारव गाण्डीवम् । स्वामिनापि सज्जीकृत काल

१ '(सामिप्रायम् ।)' इति क्वचिन्नास्ति २ 'तदो अ देव, एदस्सि अन्तरे सत्ति खण्डणामरिसिदेण गण्डीविणा एव्व भणिअम्' इति पाठ ३ 'भय' ४ 'परवचनमत्र को दोष' इति पाठ ५ 'अरे अविणअणईकण्णधार कण्ण' इति पाठ ६ 'एआई पुत्तओ अहिमण्णु ववावादिदो' इति पाठ ७ 'एव्व' इति क्वचिन्नास्ति ८ 'सुमरिदव्वमेत्तसेस' ९ 'णिग्घादघोसभीमणजीआरव'

दुर्योधनः—([1]सावहित्थम् ।) ततस्तत ।

सुन्दरकः—[2]तदो अ देव, पडिसिद्धभीमसेणसमरकम्मालम्भेण गण्डीविणा विरइदा अङ्गराअविससेणरहकूलकसाओ दुवे बाणणदीओ। तेहि वि दुवेहिं [3]अण्णोण्णदसिदसिक्खाविसेसेहि अभिजुत्तो-सो[4] दुराआरो मज्झमपण्डवो । (क)

दुर्योधनः—ततस्तत ।

सुन्दरकः—तदो अ देव, [5]गण्डीविणा तारसदजीआणिग्घोसमेत्तविण्णादबणवरिसेण तह आअरिद पत्तिहि जह ण णहत्तल ण सामी ण रहो ण धरणी ण कुमालो ण केदुवसो ण बलाइ ण सारही ण [6]तुलङ्गमा ण दिसाओ ण वीरलोओ अ [7]लक्खीअदि । (ख)

(क) ततश्च देव, प्रतिषिद्धभीमसेनसमरकर्मारम्भेण गाण्डीविना विरचिते अङ्गराजवृषसेनरथकूलकषे द्वे बाणनद्यौ । ताभ्यामपि द्वाभ्यामन्योन्यदर्शितशिक्षाविशेषाभ्यामभियुक्त. स दुराचारो मध्यमपाण्डव ।

(ख) ततश्च देव, गाण्डीविना तारसितज्यानिर्घोषमात्रविज्ञातबाणवर्षेण तथाचरित पत्रिभिर्यथा न नभस्तल न स्वामी न रथो न धरणी न कुमारो न केतुवशो न बलानि न सारथिर्न तुरङ्गमा न दिशो न वीरलोकश्च लक्ष्यते ।

पृष्टम् । अत्राविनय एव नौरिति रूपकम् । प्रेक्षकाणामित्यनादरे षष्ठी । तेन भवत प्रेक्षकाननादृत्येत्यर्थ । स्मर्तव्य स्मरणार्ह शेषोऽवसान यस्य तम् । तथाच स्मरणमात्रावशिष्टमित्यर्थ ॥ **सुन्दरकवाक्ये** । ततो देव, प्रतिषिद्धभीमसेनसमरकर्मारम्भेन गाण्डीविना विरचितेऽङ्गराजवृषसेनरथकूलकषे द्वे बाणनद्यौ । ताभ्या द्वाभ्यामप्यन्योन्यदर्शितशिक्षाविशेषाभ्यामभियुक्त स दुराचारमध्यमपाण्डव । अत्र कूल कषतीत्यर्थे 'सर्वकूलाभ्रकरीषेषु कष' इति खच्प्रत्यय । 'खित्यनव्ययस्य' इति मुम् ॥ **सुन्दरकवाक्ये** । ततो देव, गाण्डीव तारसितमात्रनिर्घोषेणाविज्ञातबाणवर्षेण तथाचरित पार्थेन यथा न नभस्तल न दिशो न धरणी न स्वामी न तेषा रथा न सारथिर्न कुमारो न खलु किमपि लक्ष्यते ॥

१ '(सावहित्थम् ।)' इति क्वचिन्नास्ति २ 'तदो अ देव, एदस्सिं अन्तरे पडिसिद्धभीमसेणसमलकम्मालम्भेण' इति पाठ ३ 'अण्णोण्णसिणेहदसिद—' ४ 'सो दुराआरो' इति क्वचिन्नास्ति ५ 'गण्डीवतारसिदमङ्गलगोधाणिग्घोसदुव्विण्णादबाणवरिसेण' इति पाठ ६ 'तुलङ्गमो' ७ 'सलक्खीअदि'

दुर्योधनः—(सविस्मयम् ।) ततस्तत ।

सुन्दरकः—[1]तदो अ देव, अदिक्कन्ते सरवरिसे क्खणमेत्त ससिंह-णादे पण्डवबले विमुक्काक्कन्दे कोरवबले उत्थिदो महन्तो कलअलो [2]हा हदो कुमालविससेणो हा हदो त्ति । (क)

दुर्योधनः—([3]सबाष्परोधम् ।) ततस्तत ।

सुन्दरकः—[4]तदो देव, महन्तीए वेलाए पेक्खिअ हदसारहितुलङ्ग लूणादवत्तकेदुवस सग्गप्पब्भट्ट विअ सुलकुमाल एक्केण ज्जेव मम्मभेदि-णा सिलीमुहेण भिण्णदेह रहमज्झे परिट्ठिद कुमाल आअदो । (ख)

(क) ततश्च देव, अतिक्रान्ते शरवर्षे क्षणमात्र ससिंहनाद पाण्डवबले विमुक्ताक्रन्दे कौरवबल उत्थितो महान्कलकलो हा हत कुमारवृषसेनो हा हत इति ।

(ख) ततो देव, महत्या वेलया प्रेक्ष्य हतसारथितुरङ्ग लूनातपत्रकेतुवश स्वर्गप्रभ्रष्टमिव सुरकुमारमेकेनैव मर्मभेदिना शिलीमुखेन भिन्नदेह रथमध्ये परिस्थित कुमारमागत ।

सुन्दरकवाक्ये । ततो देव, अतिक्रान्ते शरवर्षे पाण्डवबले विमुक्तसिंहनादे साक्रन्दे कौरवबले हा हत कुमारो वृषसेनो हा हत इति महान्कलकल उत्थित ॥ **सुन्दरकवाक्ये** । ततो देव, महत्या वेलयाह प्रेक्ष्य हतसारथितुरङ्गम लूनातपत्रकेतुवश स्वर्गपरिभ्रष्टमिव सुरकुमारकमेकेनैव मर्मभेदिना बाणेन भिन्नदेह रथमध्ये परिस्थित कुमारमागत । अत्र केतुश्चिह्नम् । कुमार प्रेक्ष्याहम्-

---

१ 'तदो अ देव, क्खणमेत्त एव्व अदिक्कन्ते सरसंपादे सहरिससिंहणादे पण्डव-सेण्णे सविसादविमुक्काक्कन्दे कोरवबले समुत्थिदो' इति बहव पाठा २ 'हा हदो कुमालविससेणो त्ति' इति पाठ ३ '(सबाष्परोधम् ।)' इति पाठ ४ 'तदो अ देव, पेक्खामि कुमाल हदसारहितुलङ्ग लूणादवत्तचावचामरकेदुवस सग्गब्भट्ट विअ सुलकुमाल हिअअमम्मभेदिणा एक्केण सिलीमुहेण भिण्णदेह रहमज्झे पल्लत्थम् ।', 'तदो अ देव, कुमाल हदसारहितुलङ्ग लूणादवत्तचामरकेदुवस सग्गप्पब्भट्ट विअ सुलकुमाल हिअअमम्मभेदिणा एक्केण सिलीमुहेण भिण्णदेह रहमज्झे पल्लत्थ पेक्खिअ अह आअदो ।', 'तदो देव, महन्तीए वेलाए पेक्खामि कुमार हदसारथिं हदतुरङ्ग लूणादवत्तर संसग्गपरिब्भट्ट विअ सुकुमारअ एक्केण ज्जेव मम्मभेदिणा सिलीमुहेण हिअए विभिण्ण रहोत्सङ्गादो धराअले लुडितम् ।' इति पाठान्तराणि

दुर्योधनः—(साश्रम् ।) अहह कुमारवृषसेन । अलमतः परं श्रुत्वा । हा वत्स वृषसेन, हा मदङ्कदुर्ललित, हा गदायुद्धप्रिय, हा राधेयकुलप्ररोह, हा प्रियदर्शन, हा दु शासननिर्विशेष, हा सर्वगुरुवत्सल, प्रयच्छ मे प्रतिवचनम् ।

पर्याप्तनेत्रमचिरोदितचन्द्रकान्त-
मुद्भिद्यमाननवयौवनरम्यशोभम् ।
प्राणापहारपरिवर्तितदृष्टि दृष्ट
कर्णेन तत्कथमिवाननपङ्कज ते ॥ १० ॥

सूतः—आयुष्मन्, अलमत्यन्तदु खावेगेन ।

दुर्योधनः—सूत, पुण्यवन्तो हि दु खभाजो भवन्ति । अस्माक पुनः

प्रत्यक्ष हतबन्धूनामेतत्परिभवाग्निना ।
हृदय दह्यतेऽत्यर्थं कुतो दु ख कुतो व्यथा ॥ ११ ॥

(इति मोहमुपगत ।)

गत इत्यन्वय ॥ प्ररोहोऽङ्कुर । **पर्याप्तेति** । पर्याप्तं तृप्तं यथेष्टं वा नेत्रं यत्र तत्तथा । 'पर्याप्त तु यथेष्ट स्यात्कृत्स्नौ शक्तिनिवारणे' इति विश्व । अचिरोदितचन्द्रवत्कान्त रम्यं यस्य । उद्भिद्यमानमुद्गच्छत् । एतादृशमप्यानन तव प्राणापहारे विनाशे परिवर्तितदृष्टि विपरीतदर्शन कथं कर्णेन दृष्टम् । इवशब्दोऽनवकृप्तौ ॥ १० ॥ **प्रत्यक्षमिति** । एतद्धृदयमित्यन्वयः । दह्यते दाहवत्क्रियते ॥ ११ ॥ **सुन्दरकवाक्ये** ।

१ 'दुर्योधन —(साश्रम् ।) अहह कुमारवृषसेन । अलमत परं श्रुत्वा । हा वत्स वृषसेन, हा मदङ्कदुर्ललित, हा मदाज्ञाकर, हा गदायुद्धप्रिय, शिष्य, हा शौर्यसागर, हा राधेयकुलप्ररोह' इति बहुपुस्तकाना पाठ , 'राजा—सुन्दरक, अलमिदानीं कथितेन । (साश्रम् ।) हा वत्स वृषसेन, क्वासि । देहि मे प्रतिवचनम् । (इति मोहमुपागत ।) सूत —समाश्वसिहि समाश्वसिहि । राजा—(उत्थाय । सकरुणम् ।) हा वत्स वृषसेन, हा मदङ्कदुर्ललित, हा गदायुद्धप्रिय, हा राधेयकुलद्रुमप्ररोह' इत्यपि क्वचित्पाठ २ 'हा प्रियदर्शन' इत्यसादारभ्य 'प्रयच्छ मे प्रतिवचनम्' इत्यन्त क्वचिन्नास्ति ३ 'प्राणापचारपरिवर्तितदृष्टि' ४ 'अत्यतशोकावेगेन', 'अत्यन्त दु खावेगेन' ५ 'सूत, पुण्यवन्तो दु खभाजो भवन्ति । अस्माक च' इति क्वचित्पाठ ६ 'प्रत्यक्षहतबन्धूनां' ७ 'व्यर्थं' ८ 'कुतो दु ख कुतो व्यथा ॥ भद्र सुन्दरक, ततो वयस्येन किं प्रतिपन्नमङ्गराजेन' इति क्वचित्पाठः

सूतः—समाश्वसितु समाश्वसितु महाराजः । (इति पटान्तेन वीजयति ।)

दुर्योधनः—(लब्धसञ्ज्ञ ।) भद्र सुन्दरक, ततो वयस्येन किं प्रतिपन्नमङ्गराजेन ।

सुन्दरकः—तदो अ देव, तधाविधस्स पुत्तस्स दसणेण सगलिद अस्सुजाद उज्झिअ अणवेक्खिदपरप्पहरणाओएण सामिणा अभिजुत्तो धणजओ । त अ सुदवहामरिसुद्दीविदपरक्कम तह परिक्कमन्त पेक्खिअ णउलसहदेवपञ्चालप्पमुहेहि अन्तरिदो धणजअस्स रहवरो । (क)

दुर्योधनः—ततस्तत ।

(क) ततश्च देव, तथाविधस्य पुत्रस्य दर्शनेन सगलितमश्रुजातमुज्झित्वानवेक्षितपरप्रहरणाभियोगेन स्वामिनाभियुक्तो धनजय । त च सुतवधामर्षोद्दीपितपराक्रम तथा परिक्रामन्त प्रेक्ष्य नकुलसहदेवपाञ्चालप्रमुखैरन्तरितो धनजयस्य रथवर ।

ततो देव, स्वामिना तथाविधस्य पुत्रस्य दर्शनेन सगलितमश्रुजातमुज्झित्वानवेक्षितपरप्रहरणाभियोगेनाभियुक्तो धनजयस्य । त च सुतवधामर्षोद्दीपितपराक्रम वन्त प्रेक्ष्य नकुलसहदेवपाञ्चालप्रमुखैरन्तरितो धनजयस्य रथवर । अत्रान्तरित

---

१ '(इति पटान्तेन वीजयति ।)' इत्यसादनन्तर 'आयुष्मन्, अलमत्यन्तदु खावेगेन ।' इति क्वचिदधिक पाठ २ 'भद्र सुन्दरक, वयस्येन किं प्रतिपन्नमङ्गराजेन', 'भद्र सुन्दरक, सप्रति किं प्रतिपन्न वयस्येनाङ्गराजेन' इति पाठौ ३ 'तहहदस्स पुत्तस्स', 'तधाविधस्स सुदस्स' ४ 'अस्सुजल' ५ 'अणवेक्खिदपरप्पहरणाभिओएण सामिणा अङ्गराएण अहिउत्तो सो दुराआरो मज्झमपण्डवो । दुर्योधन—ततस्तत । सुन्दरक—तदो देव, सुदवहामरिसुद्दीविदपरमक्कम विमुक्कजीविदास तह परिक्कमन्त', 'अणवेक्खिदपरप्पहरणेण सामिणा अङ्गराएण अभिजुत्तो धणजओ । तदो त सुदवहामरिसिद्ध विमुक्कजीविदास तथा परिक्कमन्त', 'अणवेक्खिदपरप्पहरणेण सामिणा अङ्गराएण अभिजुत्तो धणजओ । तदो त अ सुदवहामरिसिद विमुक्कजीविदास तह परक्कमन्त' इति पाठान्तराणि ६ 'भीमणउलसहदेवपञ्चालप्पमुहेहिं'; 'सासङ्केहिं भीमणउलसहदेवपञ्चालप्पमुहेहिं', 'णउलसहदेवप्पमुहेहिं पाञ्चालवलेहिं' इति पाठान्तराणि ७ 'रहो'

सुन्दरकः—[1]तदो देव, सल्लेण भणिदम्—'अङ्गराअ, [2]हदतुलङ्गमो भग्गकूवरो दे रहो ण जोग्गो भीमाज्जुणेहि सह आजुज्झिदुम्' त्ति पडिवट्टिदो रहो ओदारिदो सामी सन्दणादो बहुप्पआर अ [3]समस्सासिदो। तदो अ सामिणा सुइर विडविअ परिअणोवणीद अण्ण रह पेक्खिअ दीह निस्ससिअ मइ दिट्ठी विणिक्खिविदा। सुन्दरअ, एहि त्ति भणिद अ। तदो अह उवगदो सामिसमीवम्। तदो अवणीअ सीस-

---

(क) ततो देव, शल्येन भणितम्—'अङ्गराज' हततुरङ्गमो भग्नकूबरस्ते रथो न योग्यो भीमार्जुनाभ्या सहायोद्धुम्' इति परिवर्तितो रथोऽवतारित स्वामी स्यन्दनाद्बहुप्रकार च समाश्वासित'। ततश्च स्वामिना सुचिर विलप्य परिजनोपनीतमन्य रथ प्रेक्ष्य दीर्घ नि श्वस्य मयि दृष्टिर्विनिक्षिप्ता। सुन्दरक, एहीति भणित च। ततोऽहमुपगत स्वामिसमीपम्। ततोऽपनीय शीर्ष-

---

पिहित **सुन्दरकवाक्ये**। ततो देव, शल्येन भणितम्—'अयि राधेय, स्खलिततुरङ्गमो भग्नकूबरस्ते रथो न योग्यो वोढु भीमार्जुनाभ्या सह साप्रतमायोधितुम्।' तत परिवर्तितो रथोऽवतारित स्वामी स्यन्दनाद्बहुप्रकारं च समाश्वासित। तत स्वामिना सुचिर विलप्य परिजनोपनीतमन्य रथमारुह्य क्षणेन दीर्घं नि श्वस्य मयि दृष्टिर्विनिहिता। सुन्दरक, आगच्छेति भणित च। तत उप-

---

१ 'तदो अज्जुणचावमहाप्पलअपओहरणिस्सरिदसरधारासहस्सेहिं पूरिदेसु दिसामुहेसु सल्लेण भणिदो सामी अङ्गराओ। जहा अङ्गराअ' इति बहुपुस्तकाना पाठ. २ 'क्खुभिदतुलङ्गमो मथिदचक्कणेमिकूवरो दे रहो। ता ण जुत्त भीमाज्जुणेहिं सह आजुज्झिदु त्ति भणिअ णिवट्टिदो रहो समराङ्गणादो', 'हदतुलङ्गमो मथिदचक्कणेमिकूवरो दे रहो। ता ण जुत्त भीमाज्जुणेहिं अहिजुज्जिदु त्ति भणिअ णिवट्टिदो रहो','हदतुरङ्गमो भग्गकूवरो रहो ण जोग्गो भीमसेणाज्जुणेहि अभिजुत्त त्ति भणिअ परिवट्टिअ रह' इति पाठान्तराणि ३ 'अस्सासिदो। दुर्योधन —ततस्तत। सुन्दरक —तदो अ सामिणा सुइर विलम्बिअ परिअणो अभिहिदो अण्ण रह मे उवणेहि त्ति। परिअणोवणीद अण्ण रह पेक्खिअ मइ दिण्णदिट्ठी सुन्दरअ, एहि त्ति भणिअ अहं। अह उवगदो समीवम्', 'आस्सासिदो दुर्योधन —ततस्तत। सुन्दरक —तदो अ देव, सामिणा वि सुइर विलविअ परिअणो अभिहिदो अण्ण रह मे उवणेहि त्ति। परिअणोवणीद अ अण्ण रह पेक्खिअ अस्सुजल उज्झिअ दीह निस्ससिअ मइ दिट्ठी विणिक्खिविदा। भणिद अ, सुन्दरअ, एहि त्ति। तदो गदोह्मि सामिसमीवम्' इति पाठा.

ट्ठाणादो पट्टिअ सरीरसगलिदेहि सोणिअबिंदुहि लित्तमुह बाण कदुअ अहिलिहिअ प्पेसिदो देवस्स सदेसो (इति पट्टिकामर्पयति ।) (क)

(दुर्योधनो गृहीत्वा वाचयति ।)

यथा—'स्वस्ति, महाराजदुर्योधन समराङ्गणात्कर्ण एतदन्त कण्ठे गाढमालिङ्ग्य विज्ञापयति ।

अस्त्रग्रामविधौ कृती न समरेष्वस्ति तुल्य पुमा-
न्भ्रातृभ्योऽपि ममाधिकोऽयममुना जेया पृथासूनव ।
यत्सभावित इत्यह न च हतो दु शासनारिर्मया
त दुःखप्रतिकारमेहि भुजयोर्वीर्येण बाष्पेण वा ॥ १२ ॥'

दुर्योधनः—वयस्य कर्ण, किमिद भ्रातृशतवधदु.खित माम-परेण वाक्शल्येन घट्टयसि । भद्र सुन्दरक, अथेदानीं किमारम्भोऽङ्गराज ।

स्थानात्पट्टिका शरीरसगलितै शोणितबिन्दुभिर्लिप्तमुख बाण कृत्वाभिलिख्य प्रेषितो देवस्य सदेश ।

गतोऽह स्वामिसमीपम् । तत शीर्षस्थानात्पट्टिकामपनीय स्वशरीरसगलितै शोणितबिन्दुभि सुस्निग्धमुख बाण कृत्वाभिलिख्य प्रेषितो देवस्य सदेश । अत्र 'कूबरस्तु युगधर' इत्यमर । शीर्ष मस्तकम् । अपनीयानीय । **अस्त्रेति** । अय कर्ण । कृती कुशल । इत्यनेनाकारेणाह यत्सभावितो भवता प्रसिद्ध कृत । 'प्रतिकार प्रतीकार' इति शब्दभेद । त प्रतीकारमेहि गच्छ । तथा च युद्ध्वा वा रुदित्वा वा । राजन्, भ्रातृदु ख त्यजेति भाव ॥ १२ ॥ **सुन्दरकवाक्ये** ।

---

१ 'दिद्धवअण' २ 'अहिलिहिदो एसो देवस्स सलेहो', 'अहिलिहिदो एसो देवस्स सदेसो', 'प्पेसिदो देवस्स सदेसो' इति पाठान्तराणि ३ (इति पत्रिकामर्पयति ।)', (पट्टिका दर्शयति ।) इति पाठौ ४ 'महाराज दुर्योधन' ५ 'त्वत्सभावित इत्यह' इति पाठ ६ 'त्व' ७ 'वयस्य कर्ण कर्ण' इति पाठ ८ 'भ्रातृशतवधदु खदु खित', 'हतभ्रातृशत'.

सुन्दरकः—देव[1], अज्जवि आरम्भो पुच्छीअदि। अवणीदसरीरावरणो अप्पवहकिदणिच्चओ पुणोवि पत्थेण सह समल मग्गदि। (क)

दुर्योधनः—[2](आवेगादासनादुत्तिष्ठन्।) सूत रथमुपनय। सुन्दरक, त्वमपि मद्वचनात्त्वरिततर गत्वा वयस्यमङ्गराज प्रतिबोधय। अलमतिसाहसेन। अभिन्न एवायमावयो सकल्प। न खलु भवानेको जीवितपरित्यागाकाङ्क्षी। किं तु

हत्वा [3]पार्थान्सलिलमशिव बन्धुवर्गाय दत्त्वा
मुक्त्वा बाष्प सह कतिपयैर्मन्त्रिभिश्चारिभिश्च।
कृत्वान्योन्य सुचिरमपुनर्भावि गाढोपगूढ
सत्यक्ष्यावो हततनुमिमा [4]दुः खितौ निर्वृतौ च ॥ १३ ॥

अथवा [5]शोक प्रति मया न किंचित्सदेष्टव्यम्।

वृषसेनो न ते पुत्रो न मे दुःशासनोऽनुज।
[6]त्वा बोधयामि किमहं त्व मा सस्थापयिष्यसि ॥ १४ ॥

(क) देव, अद्याप्यारम्भ पृच्छ्यते। अपनीतशरीरावरण आत्मवधकृतनिश्चय पुनरपि पार्थेन सह समर मार्गयते।

देव, अद्याप्यारम्भ पृच्छ्यते। अपनीतशरावरण आत्मवधकृतनिश्चय पुनरपि पार्थेन सह समर मृगयते॥ 'सकल्प कर्म मानसम्' इत्यमर॥ **हत्वेति।** अशिवममङ्गलम्। बाष्प मुक्त्वा रुदित्वा। अपुनर्भावि न पुनर्भविष्यत्। गाढोपगूढ गाढालिङ्गनम्। इमा हततनु निन्द्यशरीरमेवमेव कृत्वावा सत्यक्ष्याव इत्यन्वय। आवा कीदृशौ। प्रथम दुःखितौ ततो निर्वृतौ मुमुक्षू॥ १३॥ **वृषसेन इति।** अनुज कनिष्ठ॥ १४॥ **सुन्दरकवाक्ये।** यद्देव आज्ञापयति॥

---

१ 'देव, अवणीदसरीरावरणो अप्पवहकिदणिच्चओ सअ एव्व समल मग्गदि' इति पाठ २ 'दुर्योधन —(श्रुत्वा सत्वरमुत्तिष्ठन्।)सुन्दरक, त्वमपि मद्वचनात्त्वरिततर गत्वा वयस्यमङ्गराज प्रबोधय। न खलु जयाकाङ्क्षी भवानिदानीम्। अभिन्न एवायमावयो सकल्प। किं तु' इति पाठ ३ 'पार्थ' ४ 'बन्धुभि ५ 'दु खितौ निर्वृतौ वा', 'निर्वृतौ दु खितौ वा', 'निर्वृतौ दु खितौ च' ६ 'कर्ण प्रति', 'सशोक प्रति', 'सशोक कर्ण प्रति' ७ 'त्वा बोधयिष्ये यदहं मा त्व वा बोधयिष्यसि' इति पाठ

सुन्दरकः—ज देवो आणवेदि । ([1]इति निष्क्रान्त ।) **(क)**

दुर्योधनः—तूर्णमेव रथमुपस्थापय ।

सूतः—(कर्णं दत्वा ।) देव, हेषासवलितो नेमिध्वनि श्रूयते । तथा तर्कयामि नून परिजनोपनीतो रथ ।

दुर्योधनः—सूत, गच्छ त्व सज्जीकुरु ।

सूतः—यदाज्ञापयति देव । (इति निष्क्रम्य पुन प्रविशति ।)

दुर्योधनः—(विलोक्य ।) किमिति नारूढोऽसि ।

सूतः—एव खलु [2]तातोऽम्बा च [3]सजयाधिष्ठित रथमारुह्य देवस्य [4]समीपमुपगतौ ।

दुर्योधनः—[5]किं नाम तातोऽम्बा च सप्राप्तौ । [6]कष्टमतिबीभत्समाचरित दैवेन । सूत, गच्छ त्व स्यन्दन तूर्णमुपहर । अहमपि तातदर्शन परिहरन्नैकान्ते तिष्ठामि ।

सूतः—देव, [7]त्वंदेकशेषबान्धवावेतौ कथमिव न समाश्वासयसि ।

दुर्योधनः—सूत, कथमिव समाश्वासयामि [8]विमुखभागधेय । पश्य ।

अद्यैवावा रणमुपगतौ तातमम्बा च दृष्ट्वा
भ्रातस्ताभ्या शिरसि विनतोऽह च दु शासनश्च ।

(क) यद्देव आज्ञापयति ।

हेषाश्वशब्द । नेमिश्चक्रप्रान्त ॥ त्वदेकबान्धवौ त्वमेको बान्धवो यस्येति समास ॥ **अद्येति** । आवामह दु शासनश्च । तामवस्था मरणरूपाम् । पित्रोरित्यत्र

---

१ '(इति निष्क्रान्त ।) दुर्योधन —अये नेमिध्वनिरिव । सूत —आयुष्मन्, एष सद्य एव सवर्धितो नेमिध्वनि । दुर्योधन —नून परिजनोपनीतो रथ । गच्छ त्व सज्जीकुरु ।' इत्यपर पाठ २ 'तातो धृतराष्ट्रोऽम्बा च' ३ 'सजयाधिरूढ रथमारूढौ देवसकाशमनुप्राप्तौ', 'सजयेनाधिरूढौ देवदर्शनमनुप्राप्तौ', 'सजयाधिरूढ रथमारूढौ देवदशनमनुप्राप्तौ' इति पाठान्तराणि ४ 'समीपमागतौ'. ५ 'किं नाम तातोऽम्बा च सप्राप्तौ' इति पाठ केषुचित्पुस्तकेषु नास्ति ६ 'अहो अतीव बीभत्समाचरित दैवेन । सूत, गच्छ स्यन्दनमुपहर' इति पाठ ७ 'त्वदेकबान्धवौ' ८ 'मन्दभाग्य '

तस्मिन्बाले प्रसभमरिणा प्रापिते तामवस्था
पार्श्वं पित्रोरपगतघृणः किं नु वक्ष्यामि गत्वा ॥ १५ ॥
तथाप्यवश्य वन्दनीयौ गुरू ।

(इति निष्क्रान्तौ ।)

इति चतुर्थोऽङ्कः ।

'पिता मात्रा' इत्येकशेष । घृणा करुणा जुगुप्सा वा । 'जुगुप्साकरुणे घृणे' इत्यमर । पित्रो पार्श्वं गत्वा किं नु वक्ष्यामीत्यन्वय ॥ १५ ॥

असूत य रत्नधरो गुणाढ्यो नानागुणाढ्या दमयन्तिकापि ।
जगद्धर तस्य कृतौ व्यरसीदङ्कश्चतुर्थो वरटिप्पनेऽत्र ॥

इति चतुर्थोऽङ्कः ।

'पार्श्वं मित्रोरहमपघृण' किं नु वक्ष्यामि गत्वा', 'पार्श्वं पित्रोरहमुपगत किं नु वक्ष्यासि ताभ्याम्', 'पार्श्वं पित्रोरहमुपगत किं नु वक्ष्यामि गत्वा' इति पाठान्तराणि

(तत प्रविशति [1]रथयानेन गान्धारी सजयो धृतराष्ट्रश्च ।)

धृतराष्ट्रः—[2]वत्स सजय, कथय कथय कस्मिन्नुद्देशे कुरुकुलकाननैकशेषप्रवालो वत्सो मे दुर्योधनस्तिष्ठति । कच्चिज्जीवति वा न वा ।

गान्धारी—[3]जाद, जइ सच्च [4]जीवदि मे वच्छो ता कधेहि कस्सिं देसे वट्टदि । (क)

संजयः—[5]नन्वेष महाराज एक एव न्यग्रोधच्छायायामुपविष्टस्तिष्ठति ।

[6]गान्धारी—(सकरुणम् ।) जाद, एआइ त्ति भणासि । [7]किं णु क्खु सपद भादुसद से पास्से भविस्सदि । (ख)

(क) जात, यदि सत्य जीवति मे वत्सस्तत्कथय कस्मिन्देशे वर्तते ।

(ख) जात, एकाकीति भणसि । किं नु खलु साम्प्रत भ्रातृशतमस्य पार्श्वे भविष्यति ।

एकशेषोऽवशिष्ट । प्रवालोऽङ्कुर । 'प्रवालमङ्कुरेऽप्यस्त्री' इत्यमर । **गान्धारीवाक्ये** । जात, यदि सत्य जीवति मे पुत्रस्तत्कथय कस्मिन्नुद्देशे वर्तते ॥ जात, एकाकीति भणसि । अन्यथा कि साम्प्रत भ्रातृशतमस्य पार्श्वे भविष्यति ।

---

१ 'स्यन्दनयानेन' २ 'वत्स सजय, कुरुकुलकाननैकशेषप्रवालो मे वत्सो दुर्योधन ', 'सजय, कथय कस्मिन्नुद्देशे स कुरुकाननैकशेषप्रवालो मे वत्सो दुर्योधनस्तिष्ठति ।', 'वत्स सजय, कथय कथय कस्मिन्नुद्देशे कुरुकुलकाननैकशेषप्रवाले वत्सो मे दुर्योधन ।', 'सजय, कथय कथय कस्मिन्नुद्देशे सकलकुलकाननैकप्रवालो वत्सो मे दुर्योधनः ।', 'वत्स सजय, कस्मिन्नुद्देशे कुरुकुलकाननैकप्रवालो दुर्योधन ।', 'वत्स संजय, कुलकाननैकशेषप्रवालो मे वत्सो दुर्योधन ' इति पाठान्तराणि ३ 'जाद' इति क्वचिन्नास्ति ४ 'जीवदि वच्छो ता कस्सिं कधेहि त उद्देसम्', 'जीवदि सो मे वच्छो कहेहि त उद्देसम्', 'जीवदि सो ता कस्सिं कधेहि त उद्देसम्' इति पाठान्तराणि. ५ 'तात, अम्ब, नन्वेष महाराज ' इति पाठ ६ 'गान्धारी—(साश्रुम् ।) जाद, एआइ त्ति भणासि', 'गान्धारी—(सकरुणम् ।) जाद, एआइ त्ति ण भणासि'; 'गान्धारी—जाद, एआइ त्ति भणासि' इति पाठान्तराणि ७ 'किं णु क्खु सापद भादुसद से पास्से णत्थि', 'किं णु क्खु सपद तस्स भादुसद पास्से णत्थि', 'किं सापद भादुणो से समीवे ण होन्ति', 'ण क्खु संपद भादुसद से पास्से भविस्सदि' इति पाठान्तराणि.

संजय—तात, अम्ब, [1]अवतरत स्वैरं रथात् ।

([2]उभाववतरण नाटयत ।)

([3]तत प्रविशति सव्रीडमुपविष्टो दुर्योधन ।)

संजयः—([4]उपसृत्य ।) विजयता महाराज । [5]नन्वेष तातोऽम्बया सह प्राप्त । [6]किं न पश्यति महाराज ।

(दुर्योधनो वैलक्ष्य नाटयति ।)

धृतराष्ट्रः—

शल्यानि व्यपनीय कङ्कवदनैरुन्मोचिते कङ्कटे
बद्धेषु व्रणपट्टकेषु शनकै कर्णे [7]कृतापाश्रय ।
दूरान्निर्जितसान्त्वितान्नरपतीनालोकयल्लीलया
सद्य पुत्रक वेदनेति न मया पापेन [8]पृष्टो भवान् ॥ १ ॥

(धृतराष्ट्रो गान्धारी च [9]स्पर्शेनोपेत्यालिङ्गत ।)

गान्धारी—वच्छ, [10]अदिगाढप्पहारवेअणापज्जाउलस्स [11]अम्हेसु सण्णिहिदेसु वि ण प्पसरदि दे वाणी । (क)

धृतराष्ट्रः—वत्स दुर्योधन, [12]किमकृतपूर्वं सम्प्रति मय्यप्यय-मभ्याहार ।

(क) वत्स, अतिगाढप्रहारवेदनापर्याकुलस्यास्मासु सनिहितेष्वपि न प्रसरति ते वाणी ।

अत्र जात पुत्रक ॥ सव्रीड सलज्ज यथा स्यादेवम् ॥ **गान्धारीवाक्ये** । जात, अतिगाढप्रहारवेदनापर्याकुलस्यास्मासु सनिहितेष्वपि न प्रसरति ते वाणी ॥ अपकृतमपकार कृत ॥ **गान्धारीवाक्ये** । जात, यदि त्व मा नालपसि

---

१ 'अवतरत रथात्', 'अवतरत स्वैर रथात्' २. '(सर्वेऽवतरण नाट्यन्ति ।)' इति पाठ ३ 'सव्रीडोपविष्ट' ४ '(उपगम्य ।)' ५ 'ननु' इति क्वचि-न्नास्ति ६ 'किं न पश्यसि महाराज' ७ 'कृतोपाश्रय' ८ 'निर्जितशात्र-वान्' ९. 'दृष्ट' १० 'स्पर्शेनोपेत्य परिष्वजेते' इति पाठ ११ 'गाढप्प-हार—' १२ 'अस्मासु वि ण दे प्पसरदि वाणी', 'किं अस्मासु वि ण प्पसरदि दे वाणी' इति पाठौ १३ 'किमकृतपूर्वं सम्प्रति मय्यव्यवहार', 'अभूतपूर्वं मय्यपि सम्प्रत्यभ्याहार' इति पाठौ.

गान्धारी[1]—वच्छ, जइ तुम वि अम्हे[2] णालवसि ता किं सपद वच्छो दुस्सासणो आलवदि अध दुम्मरिसणो वा अण्णो वा। (क) (इति रोदिति।)

दुर्योधनः[3]—

जातोऽहमप्रतिकृतानुजनाशदर्शी[4]
तातस्य बाष्पपयसा तव चाम्ब हेतु।
दुर्जातमत्र विमले भरतान्वये वै[5]
किं मा सुतक्षयकर सुत इत्यवैषि॥ २॥

गान्धारी—जाद, अल[6] परिदेविदेण। तुम वि दाव एक्को[7] इमस्स अन्धजुअलस्स मग्गोवदेसओ। ता चिरं जीव। कि मे रज्जेण जएण वा। (ख)

(क) वत्स, यदि त्वमप्यस्मान्नालपसि तत्किं साम्प्रत वत्सो दु शासन आलपत्यथ दुर्मर्षणो वान्यो वा।

(ख) जात, अल परिदेवितेन। त्वमपि तावदेकोऽस्यान्धयुगलस्य मार्गोपदेशक। तच्चिर जीव। कि मे राज्येन जयेन वा।

तदा कि मा साम्प्रत वत्सो दु शासन आलपतु दुर्मर्षणो वाथान्यो वा॥ **जात इति**। हे अम्ब, तव तातस्य च बाष्पपयसा हेतु कारण जातोऽस्मि। कीदृश। अप्रतिकृतोऽप्रतीकारविषयीकृतो योऽनुजनाशस्तद्दर्शी। त्व मा सुत इति किमवैषि जानासि। कीदृशम्। वो युष्माकमिह भरतकुले दुर्जात दुष्टपुत्रम्। पुन कीदृशम्। व सुतविनाशकरम्। व इति काक्षिगोलकवदुभयान्वयि। आकाङ्क्षाया उभयत्र सत्त्वात्। शब्दान्वयस्य वाकाङ्क्षाक्रमेणोत्थानादित्यन्यत्र विस्तर॥ २॥ **गान्धारीवाक्ये**। जात, अल परिदेवितेन। त्वमेव तावदेतस्या-

---

१. गान्धारी—(सकरुणम्।) २ 'वच्छ' इति क्वचित्पाठ. २ 'अम्हे णालवसि किं दाणी दुस्सासणो दुम्मरिसणो अण्णो वा आलविस्सदि', 'अम्हेसु णालवसि ता किं सपद वच्छो मे दुस्सासणो आलवदि अध दुम्मरिसणो विकण्णो वा', 'अम्हे णालवसि किं दाणी दुस्सासणो आलविस्सदि दुम्मरिसणो वा' इति पाठान्तराणि ३ 'दुर्योधन—अम्ब' इति क्वचित्पाठ ४ 'पाप', 'योध' ५ 'अपि', 'असिन्' ६ 'अलमल परिदेविदेण' ७ 'एक्को इमस्स अन्धजुअलस्स मग्गोवदेसओ चिरजीव। अल मे रज्जेण जएण वा।', 'एक्को अन्धजुअलस्स मग्गोवदेसओ चिरजीव। कि मे रज्जेण वेरेण वा।', 'एक्को इमस्स अन्धजुअलस्स पन्थोक्देसओ चिर जीव। भोदु मे रज्जेण वेरेण वा।' इति पाठान्तराणि.

दुर्योधनः—

मात[1]: किमप्यसदृश कृपण वचस्ते
सुक्षत्रिया क्व भवती क्व च दीनतैषा[2] ।
निर्वत्सले सुतशतस्य विपत्तिमेता[3]
त्व नानुचिन्तयसि रक्षसि मामयोग्यम् ॥ ३ ॥

नून[4] विचेष्टितमिद सुतशोकस्य ।

संजयः—महाराज, किं वाय लोकवादो वितथ 'न घटस्य कूपपतने रज्जुस्त्रैव प्रक्षेप्तव्या' इति ।

दुर्योधनः—अपुष्कलमिदम्[5] । उपक्रियमाणाभावे किमुपकरणेन[6] ।
(इति रोदिति ।)

धृतराष्ट्रः—(दुर्योधन परिष्वज्य ।) वत्स[7], समाश्वसिहि । समाश्वासय चासानिमामतिदीना[8] मातर च ।

दुर्योधनः—तात, दुर्लभ[9]. समाश्वास इदानी युष्माकम् । किं तु

~~कुन्त्या सह युवामद्य मया निहतपुत्रया ।~~
विराजमानौ शोकेऽपि तनयाननुशोचतम् ॥ ४ ॥

मार्गोपदेशको भव । तच्चिर जीव । किं मे राज्येन जयेन वा । **मातरिति** । किमप्यनिर्वचनीयम् । कृपण दीनम् । सुक्षत्रिया शोभनक्षत्रियजाति[1] । क्वेति । 'अत्यन्तासभवेऽर्थे क्वौ क्वा प्रयुज्येते' इति कोष । हे निर्वत्सले वात्सल्यवति वात्सल्यहीने वा ॥ ३ ॥ किं वितथोऽसत्य । किं तु सत्य एवेत्यर्थ । रज्जु रशनादिग्रहण ॥ इद वचोऽपुष्कलमश्रेष्ठम् । 'श्रेयान्श्रेष्ठ पुष्कल स्यात्'

---

१ 'विकृत' २ 'एना' ३ 'नून विचेष्टितमिद सुतशोकस्य' इति क्वचिन्नास्ति ४ 'महाराज, किं चाय लोकप्रवादोऽपि विस्मृतो न च घटस्य कूपपाते रज्जुरपि तत्र प्रक्षेप्तव्येति', 'महाराज, किं वाय लोकवादो वितथो न घटस्य कूपपाते रज्जुरपि तत्र प्रक्षेप्तव्येति' इति पाठौ ५ 'अलमलम् । उपक्रियमाणे किमपकारेण', 'अयुक्तमिदम् । अपक्रियमाणे किमुपकारेण', 'अपुष्कलमिदम् । ननु उपक्रियमाणाभावे किमुपकरणेन' इति पाठान्तराणि ६ 'वत्स, समाश्वसिहि समाश्वसिहि', इति क्वचित्पाठ . ७ 'समाश्वासय मा जननीं च', 'समाश्वासय च मामिमामतिदीना मातर च', 'समाश्वासय चासानिमामतिदीना मातर ते च' इति पाठान्तराणि ८. 'दुर्लभमिदानीं पुन समाश्वासन युष्माकम्' इति पाठ ९. 'लोके'.

गान्धारी—[1]जाद, एद एव्व सपद प्पभूद [2]ज तुम वि दाव एक्को णाणुसोचइदव्वो । ता जाद, प्पसीद । एसो दे सीसञ्जली । णिवट्टीअदु समरव्वावारादो । अपच्छिम करेहि पिदुणो वअणम् । (क)

धृतराष्ट्रः—वत्स, शृणु वचन [3]तवाम्बाया [4]मम च निहताशेषबन्धुवर्गस्य । [5]पश्य ।

[6]दायादा न ययोर्बलेन गणितास्तौ द्रोणभीष्मौ हतौ
कर्णस्यात्मजमग्रत [7]शमयतो भीत जगत्फाल्गुनात् ।

(क) जात, एतदेव साम्प्रत प्रभूत यत्त्वमपि तावदेको नानुशोचितव्य । तज्जात, प्रसीद । एष ते शीर्षाञ्जलि । निवर्त्यता समरव्यापारात् । अपश्चिम कुरु पितुर्वचनम् ।

इत्यमर ॥ **कुन्त्येति** । युवामद्य कुन्त्या सह तनयाननुशोचतमित्यन्वय ॥ ४ ॥ **गान्धारीवाक्ये** । जात, इदमेव साम्प्रत मे प्रभूत यत्त्वामप्येक नानुशोचिष्ये । तज्जात, प्रसीद । एष ते शीर्षेऽञ्जलि । निवर्त्यतामेतस्मात्समरव्यापारात् । अपश्चिम कुरु पितुर्वचनम् । अत्र प्रभूत युक्तम् । शीर्षेऽञ्जलि प्रणाम । अपश्चिममलङ्घ्यम् ॥ सपत्न शत्रु ॥ **दायादा इति** । दायादा शत्रव । अग्रत कर्णस्यैव । फाल्गुनादर्जुनात् । मे वत्साना निधनेनाय रिपुस्त्वयि शेषप्रतिज्ञ

---

१ 'जाद, दाणिं एद एव्व सपद प्पभूद', 'जाद, एद वि सपद प्पभूद', 'जाद, एद एव्व सपद मे प्पभूद', 'जाद, एद एव्व सपद प्पभूददर' इति पाठान्तराणि २ 'ज तुम वि दाव एक्को जीवसि । क अण्ण अणुसोचिस्सम् । ता जाद, अकालो दे समरस्स । प्पसीद । एसो दे अञ्जली । णिवट्टेहि समरव्वावारादो । अपच्छिम करेहि वअणम् ।'; 'ज तुम वि दाव एक्को जीवसि । क अण्ण अणुसोइस्सम् । ता जाद, अकालो दे समरस्स । प्पसीद । एसो दे अञ्जली । णिवट्टेहि समरनिब्बन्धादो । अपच्छिम करेहि वअणम् ।', 'ज तुम वि दाव एक्क णाणुसोचइस्सम् । ता जाद, णिवट्टेहि समरादो । अपच्छिम करेहि सुवअणम् ।', 'तुम वि दाव एक्को णाणुसोचइदव्वो । ता जाद, प्पसीद प्पसीद । एसो दे सीसञ्जली । णिवट्टीअदु समरव्वावारादो । अवस्स पिदुणो वअण करेहि ।' इति पाठान्तराणि ३ 'तव' इति क्वचिन्नास्ति ४ 'ममापि च निहताशेषबन्धुवर्गस्य', 'मम च निहतसकलबन्धुवर्गस्य', 'मम सकलबान्धवस्य च', 'मम च सकलहतबन्धुवर्गस्य', 'मम च निहताशेषवर्गस्य' इति पाठान्तराणि ५ 'पश्य' इत्यत्र 'अपि च तात दुर्योधन' इति क्वचित्पाठ. ६ 'देवा वा' ७ 'शमयता भीत यत फाल्गुनात्', 'शमयता भीत न बीभत्सुना'.

वत्साना निधनेन मे त्वयि रिपु शेषप्रतिज्ञोऽधुना
मान वैरिषु मुञ्च तात पितरावन्धाविमौ पालय ॥ ५ ॥

दुर्योधनः—समरात्प्रतिनिवृत्य किं मया कर्तव्यम् ।

गान्धारी—जाद, ज पिदा दे विउरो वा भणदि । (क)

संजयः—देव, एवमिदम् ।

दुर्योधनः—सजय, अद्यार्प्युपदेष्टव्यमस्ति ।

संजयः—देव, यावत्प्राणिति तावदुपदेष्टव्यभूमिर्विजिगीषु-प्रज्ञावताम् ।

दुर्योधनः—(सक्रोधम् ।) शृणुमस्तावद्भवत एव प्रज्ञावतोऽस्मान्प्रति प्रतिरूपमुपदेशम् ।

(क) जात, यत्पिता ते विदुरो वा भणति ।

इत्यन्वय । त्वदेकावशिष्टप्रतिज्ञ इत्यर्थ । हे तात मान्य । पितरौ मातापितरौ । एकशेषात् ॥ ५ ॥ **गान्धारीवाक्ये** । जात, पिता ते विदुरो यद्भणति । पिता पितृकल्पो हितोपदेशात् ॥ प्राणित जीवितम् । 'सपन्नश्च प्रकृतिभिर्महोत्साह कृतश्रम । जेतुमेषणशीलश्च विजिगीषुरिति स्मृत ॥' इति विजिगीषुलक्षणम् ॥

---

१ 'निधनाच्च मारुतिरसौ शेषप्रतिज्ञस्त्वयि' इति पाठ २ 'क्रोध' ३ 'वैरिणि', ४ 'वत्स' ५ 'तात, अम्ब, समरात्प्रतिनिवृत्य किं करिष्यामि' इति पाठ ६ 'गान्धारी—जाद, ज पिदा दे विउरो वा भणिस्सदि', 'गान्धारी—ज पिदा दे भणिस्सदि त अणुचिट्ठ', 'गान्धारी—ज पिदा दे विउरो वा भणिस्सदि त अणुचिट्ठ', 'गान्धारी—ज पिदा दे विउरो वा भणदि त अणुचिट्ठिदव्वम्' इति पाठान्तराणि ७ 'राजन्' ८ 'उपदेष्टव्यमस्तीति', 'उपदेष्टव्यमिति' ९ 'राजन्, यावत्प्राणितव्य तावदुपदेष्टव्यभूमयो विजिगीषव प्रज्ञावताम्', 'राजन्, यावत्प्राणनाशस्तावदुपदेष्टव्या नृपतय प्रज्ञावताम्', 'राजन्, यावत्प्राणनाशस्तावदुपदेष्टव्या नृपतयो विजिगीषव प्रज्ञावताम्', 'देव, यावत्प्राणास्तावदुपदेष्टव्यभूमयो विजिगीषव प्रज्ञावताम्', 'राजन्, यावत्प्राणनाशस्तावदुपदेष्टव्यभूमयो विजिगीषव प्रज्ञावताम्', 'राजन्, यावत्प्राणितव्य तावदुपदेष्टव्या नृपतयो विजिगीषव प्रज्ञावताम्' इति पाठान्तराणि. १० '(सक्रोधम् ।) शृणुमस्तावद्भवत एव प्रज्ञावत सप्रत्यसदनुरूपमुपदेशम्', '(सासूयम् ।) शृणुमस्तावत्प्रज्ञावतो भवतोऽसत्प्रतिरूपमेवमुपदेशम्', 'शृणुमस्तावद्भवत प्रज्ञावतः सप्रत्यसदनुरूपमुपदेशम्' इति पाठान्तराणि

धृतराष्ट्रः—वत्स, युक्तवादिनि संजये किमत्र क्रोधेन । यदि प्रकृतिमापद्यते तदहमेव भवन्त ब्रवीमि । श्रूयताम् ।

दुर्योधनः—कथयतु तात ।

धृतराष्ट्रः—वत्स, किं विस्तरेण । सधत्ता भवानिदानीमपि युधिष्ठिरमीप्सितपणबन्धेन ।

दुर्योधनः—तात, तनयस्नेहवैक्लव्यादम्बा बालिशत्वेन सजयश्च कामममेव ब्रवीतु । युष्माकमप्येव व्यामोह । अथ वा प्रभवति पुत्रनाशजन्मा हृदयज्वरः । अन्यच्च । तात, अस्खलितभ्रातृशतोऽहं यदा तदानवधीरितवासुदेवसामोपन्यास सप्रति हि दृष्टपितामहाचार्यानुजराजचक्रविपत्ति स्वशरीरमात्रस्नेहादुदात्तपुरुषव्रीडावहमसुखावसानं च कथमिव करिष्यति दुर्योधन सह पाण्डवै सधिम् । अन्यच्च । नयवेदिन्सजय,

---

वैक्लव्याद्विह्वलत्वात् । अम्बा वदतीति शेष । बालिशत्वेन मूर्खतया । सजयो वदतीति शेष । नाम निश्चये । हृदयज्वरस्तातस्येति शेष । **तातेत्यादि** । हे तात, दुर्योधन कथ सधिं करिष्यतीत्यन्वय । अस्खलितमविनष्टम् । साम सधानम् । पितामहो भीष्म । आचार्यो द्रोण । राजचक्र क्षत्रियसघ । कीदृश सधिम् । उदात्तकथात्रीडाकरमुत्तमकथालज्जाकरम् । दु खान्त च ॥ **हीयमाना-**

---

१ 'तव किमत्र' २ 'तदहमेव भवन्त किंचित्कथयामि', 'तदहमेव कथयामि', 'तदहमेव तावद्भवन्त ब्रवीमि', 'तदहमेव ब्रवीमि' इति पाठान्तराणि ३. 'वत्स, किं विस्तरेण' इत्यत्र 'किं विचारेण' इति क्वचित्पाठ ४ 'इदानीमपि युधिष्ठिरस्य समीप्सितेन पणेन', 'इदानीं युधिष्ठिरप्रार्थितपणेन', 'इदानीं युधिष्ठिरस्य समीप्सितेन पणेन' इति पाठान्तराणि ५ 'तनयस्नेहात्' ६ 'बालिशत्वात्' ७. 'एतद्ब्रवीतु', 'एतद्ब्रवीति' ८ 'युक्तो युष्माकमप्यय मोह इति प्रभवति', 'युष्माकमपि चाय मोह । अथ वा प्रभवति', 'अम्बा तनयवैक्लव्याद्बालिशत्वेन सजयो मामेव ब्रुवता नाम व्यामोहो भवतामपि । अथ वा प्रभवति' इति नानाविध पाठ ९ 'पुत्रनाशशोकज मा' १० 'अन्यच्च' इति क्वचिन्नास्ति ११ 'अस्खलितभ्रातृशतस्तदावधीरितवासुदेवसामोपन्यास', 'अस्खलितभ्रातृशतस्तदावधीरितवासुदेवशमोपन्यास' इति पाठौ. १२ 'हि' इति क्वचिन्नास्ति १३ 'अनुराजचक्रविपत्ति', 'अनुजराजन्यशतविपत्ति'. १४ 'शरीरमात्रस्नेहात्', 'शरीरमात्रकस्नेहात्'

हीयमाना किल रिपोर्नृपा संदधते परान् ।
दुःशासने हतेऽहीना सानुजा पाण्डवा कथम् ॥ ६ ॥

धृतराष्ट्रः—वत्स, एव गतेऽपि मत्प्रार्थनया नै किंचिन्न करोति युधिष्ठिर । अन्यच्च । सैर्वमेवापकृत नानुमन्यते ।

दुर्योधनः—कैथमिव ।

धृतराष्ट्रः—वैत्स, श्रूयता प्रतिज्ञा युधिष्ठिरस्य । नाहमेकस्यापि भ्रातुर्विपत्तौ प्राणान्धारयामीति । बहुच्छलत्वात्सङ्ग्रामस्यैंनुजनाशमाशङ्कमानो यैदैव भवते रोचते तदैवासौ सज्ज. सधातुम् ।

संजयः—एवमिदम् ।

गान्धारी—जौद,उपपत्तिजुत्त पडिवज्जस्स पिदुणो वअणम् । (क)

(क) जात, उपपत्तियुक्त प्रतिपद्यस्व पितुर्वचनम् ।

इति । किलागमे । रिपोरहितात् । हीयमाना हीना । नृपा पराञ्शत्रून्सदधते । स्वापेक्षया यदि परे शक्ता भवन्ति तदा तै सम सधि कर्तव्य इति भाव । दु शासने हते सति सानुजा पाण्डवा अहीना सन्त कथ परान्सदधत इत्यर्थ ॥ ६ ॥ एवगतेऽपि भवदुक्तनीतेर्यथार्थत्वेऽपीत्यर्थ । मम प्रार्थनया युधिष्ठिर किंचिन्न करोत्येव न । किंतु किंचित्करोत्येव । ननु हे राजन्, युधिष्ठिर सर्वमेवापकृत नैवानुमन्यते । तस्य दक्षिणत्वात्सदा धर्मपरायणत्वात्रेति भाव । कथमिव कृत्वा इदमित्यर्थ । भवते रोचते तुभ्य रुचिविषयी भवति । 'रुच्यर्थाना प्रीयमाण' इति चतुर्थी ॥ **गान्धारीवाक्ये** । जात, उपपत्तियुक्त प्रतिपद्यस्व पितुर्वचनम् । अत्र प्रतिपद्यस्व जानीहि ॥ **एकेनेति** । विना-

१ 'हीयमानाकिल रिपून्नृपा सदधते कथम् । दु शासनेन हीनोऽह सानुज पाण्डवोऽधुना ॥' इति बहुपुस्तकाना पाठ, 'हीयमाना किल रणे नृपा सदधते परान् । दु शासने हते हीना पाण्डवा सानुजे कथम् ॥' इत्यपि क्वचित्पाठ . २. 'किं न करोति युधिष्ठिर '. ३ 'सर्व दैवापकृष्ट मन्यते युधिष्ठिर ', 'सवदैवापकृष्टमात्मान मन्यते स भवत्य ', 'सदैवापकृष्ट मन्यते युधिष्ठिर ', 'सर्वदैवापाकृष्ट मन्यते भवत्यो युधिष्ठिर ', 'सर्वदैवात्मानमपकृष्ट मन्यते भवत्यो युधिष्ठिर,', 'सर्वमेवापकृत न मन्यते भवत्यो युधिष्ठिर ' इति नानाविध पाठ ४ 'कथमेवेति' ५ 'वत्स' इति क्वचिन्नास्ति ६ 'सधारयामीति' ७ 'अनुजनाश शङ्कमान ', 'अनुजनाशशङ्कमान ', 'अनुजनाशशङ्कया शङ्कमान ' ८ 'यथैव भवते रोचते तथैवासौ सज्ज सधातुम्' इति बहुपुस्तकाना पाठ ९. 'जाद' इति क्वचिन्नास्ति.

दुर्योधनः—तात, अम्ब, सजय,

एकेनापि विनानुजेन मरण पार्थ प्रतिज्ञातवा-
न्भ्रातॄणा निहते शते विषहते[1] दुर्योधनो जीवितुम् ।
त दु शासनशोणिताशनमरिं भिन्न[2] गदाकोटिना
भीम दिक्षु न विक्षिपामि[3] कृपण सधिं विदध्यामहम् ॥ ७ ॥

गान्धारी—हीं[4] जाद दुस्सासण, हा मदङ्कदुल्ललिद, हा जुअराअ, अस्सुदपुव्वा क्खु कस्स वि लोए ईदिसी विपत्ती । हा वीरसदप्पस-विणी हदगान्धारी दुक्खसद प्पसूदा ण उण सुदसदम् । (क)

(सर्वे रुदन्ति ।)

संजयः—(बाष्पमुत्सृज्य ।) तात, अम्ब,[5] प्रतिबोधयितु[6] महाराज-मिमा भूमिं युवामागतौ । तदात्मापि[7] तावत्सस्तभ्यताम् ।

(क) हा जात दु शासन, हा मदङ्कदुर्ललित, हा युवराज, अश्रुतपूर्वा खलु कस्यापि लोक ईदृशी विपत्ति । हा वीरशतप्रसविनी हतगान्धारी दु खशत प्रसूता न पुन सुतशतम् ।

नुजेनेत्यत्र 'पृथग्विना—' इत्यादिना तृतीया । पार्थो युधिष्ठिर । विषहते शक्नोति । तथाच लज्जाकरेण मम जीवितेनालमिति भाव । शोणिताशिन रक्तभोजिनम् । भोजनपद लक्षणया पानेऽपि प्रवर्तत इहेत्यवधेयम् । कोटिरग्रम् । 'कोटिरग्रे प्रकर्षे च' इति धरणि । अह भीम दिक्षु न विक्षिपामि । किं तु विक्षिपाम्येवेत्यर्थ । न चिरस्थालने । अह कृपण सन्सधिं विदध्या करिष्ये । तथा च भीम-वधादेव समीहितसिद्धिर्न तु सधिनेति भाव ॥ ७ ॥ **गान्धारीवाक्ये** । हा जात दु शासन, हा युवराज, हा मदङ्कदुर्ललित, अश्रुतपूर्वा कस्यापि लोक ईदृशी विपत्ति । हा वीरशतप्रसविनि, हन्त गान्धारि, दु खशत प्रसूतासि न पुन पुत्रशतम् ॥ सस्त-

---

१ 'अभिलषते' २ 'भिन्दन्गदाकोटिभि ' ३ 'विक्षिपत्यनुनय तस्मिन्विधत्ते कथम्' इति पाठ ४ 'हा जाद दुस्सासण, हा दुम्मरिसण, हा विकण्ण, हा वीरसदप्पसविणी गान्धारी दुक्खसद प्पसूदा । ण सुदसदम्' इति बहुपुस्तकाना पाठ ५ 'अम्ब' इति क्वचिन्नास्ति ६ 'समाश्वासयितु' ७ 'तदात्मानमपि', 'तदात्मैव', 'तदात्मनैव'

धृतराष्ट्रः—वत्स दुर्योधन, एव विमुखेषु भागधेयेषु त्वयि चामुञ्चति सहज मानमरिषु त्वदेकशेषजीवितालम्बनेय तपस्विनी गान्धारी कमवलम्बता शरणमह च ।

दुर्योधनः—श्रूयता यत्प्रतिपत्तुमिदानी प्राप्तकालम् ।

कलितभुवना मुक्तैश्वर्यास्तिरकृतविद्विष
प्रणतशिरसा राज्ञा चूडासहस्रकृतार्चना ।
अभिमुखमरीन्क्रुद्धान्घ्नन्तो हता शतमात्मजा
वहतु सगरेणोढा तातो धुर सहितोऽम्बया ॥ ८ ॥

विपर्यये त्वस्याधिपतेरुल्लङ्घित क्षात्रधर्म स्यात् ।

स्थता स्थिरीक्रियताम् ॥ तपस्विन्यनुकम्प्या । 'तपस्वी तापसे चानुकम्पार्हे च तपस्विनि' इति विश्व । त्वदेकशेषरूप जीविताशावलम्बन तद्योगिनी । न तु बहुव्रीहिं कृत्वा मत्वर्थीय । तयोरेकेनैवापरस्य गतार्थत्वादित्यवधेयम् । 'किशरण' इति पाठे किं शरण यस्य स किशरण । अशरण इत्यर्थ । 'शरण गृहरक्षित्रो' इत्यमर । अह सुवलम्ब इत्यन्वय (?) ॥ प्रतिपत्तु कर्तुम् । **कलितभुवना इति** । कलितभुवना साधितलोका । 'कलिवलीकामधेनू' इति वैयाकरणा । हे तात, यतस्त्वदात्मजा शत शतसख्याका हता अतोऽम्बया सह सगरेणोढा धुरं तातो वहतु । यथा समरस्य शत पुत्रा शत्रुणा हतास्तथा तवापीति भाव । कीदृशाः । अभिमुख क्रुद्धाञ्शत्रून्घ्नन्तो नाशयन्त । इद विशेषण सगरसुतेष्वपि । एव कलितभुवना इत्याद्यपि । शतमात्मजा इति शतसख्याया एकवचनान्तेनैव शतशब्देनोक्तत्वादात्मजपदेन बहुवचनान्तेन च तदभिधानादन्वय । ऊढा धृताम् ॥ ८ ॥ क्षात्रवृत्ति क्षत्रियधर्म ॥ **गान्धारीवाक्ये** । जानीत किमिद हाहाकार-

---

१ 'दुर्योधन' इति क्वचिन्नास्ति २ 'त्वयि चामुञ्चति मानबन्धमरिषु' इत्यपि पाठ: ३ 'त्वदेकशेषजीविताशावलम्बनेय' इति जगद्धरसमादृत पाठ ४ 'किमवलम्बता' ५ 'यत्प्रतिप्रत्तुमिदानीं प्राप्तकालम्' इति क्वचिन्नास्ति ६ 'अभिमुखमरीन्क्रोधाद्घ्नन्तो हता शतमात्मजा', 'अभिमुखमरीन्घ्नत सख्ये हता शतमात्मजा:' इति पाठौ ७ 'विपर्यये तु समुल्लङ्घित क्षात्रधर्म स्यात्', 'विपर्यये त्वस्याधिपतेरुल्लङ्घित क्षात्रधर्म स्यात्' ८ 'क्षात्रधर्म स्यात्' इत्यसादनन्तर क्वचित् 'धृतराष्ट्र—वत्स, हित निधीयते न पुन क्षात्रवृत्तिरियम्' इत्यधिक पाठ समुपलभ्यते.

(नेपथ्ये महान्कलकल ।)

गान्धारी—(आकर्ण्य । सभयम् ।) जाद, कहि एद हाहाकारमिस्स तूररसिद सुणीअदि । (क)

संजयः—अम्ब, भूमिरियमेवविधाना भीरुजनत्रासजननी महानिनादानाम् ।

धृतराष्ट्रः—वत्स सजय, ज्ञायतामतिभैरव खलु विस्तारी हाहारव । कारणेनास्य महता भवितव्यम् ।

दुर्योधनः—तात, प्रसीद । पराङ्मुख खलु दैवमस्माकम् । यावदपरमपि किंचिदत्याहित न श्रावयति तावदेवाज्ञापय मा संग्रामावतरणाय ।

गान्धारी—जाद, मुहुत्तअ दाव म मन्दभाइणीं समस्सासेहि । (ख)

धृतराष्ट्रः—वत्स, यद्यपि भवान्समराय कृतनिश्चयस्तथापि रहः परप्रतीघातोपायश्चिन्त्यताम् ।

दुर्योधनः—

प्रत्यक्षं हतबान्धवस्य न परान्हन्तु रथो मे क्षम
किं वा तेन कृतेन तैरिव कृत यन्न प्रकाश्य रणे ।

(क) जात, कुत्रैतत् हाहाकारमिश्र तूर्यरसित श्रूयते ।

(ख) जात, मुहूर्त तावन्मा मन्दभाग्या समाश्वासय ।

विमिश्र तूर्यरसित श्रूयते ॥ अत्याहितमनिष्टम् ॥ **गान्धारीवाक्ये** । जात, मुहूर्तकमपि तावन्मामनाथा समाश्वासय । अत्र मुहूर्तकमित्यत्र स्वार्थे क ॥ प्रतीघातो विनाश । **प्रत्यक्षमिति** । मम रथ परान्हतु न क्षम इत्यन्वय । तेन परप्रतीघातोपायेन । कृतेन वा किम् । किंतु न किमपि । तैरपि कर्म कृत

---

१ 'नाद' २ '(श्रुत्वा । सभयम् ।)' इति क्वचित्पाठ ३ 'सजअ, हाहाकारमिस्स', 'सजअ, किं एद हाहाकारमिस्स' इति पाठौ ४ 'समरतूररसिद', 'विसम तूररसिद', 'विसम रसिद', ५ 'सजय —अभूमिरियमेवविधाना भीरुजनानाम् ।' इति पाठ ६ 'अस्य' इति क्वचिन्नास्ति ७ 'तावदेवानुमन्यस्व' ८ 'सङ्ग्राम प्रति'. ९, 'रह' इति क्वचिन्नास्ति १० 'प्रत्यक्ष हतबान्धवा मम परे हन्तु न योग्या रह' इति बहुपुस्तकाना पाठ ११. 'तैरिह', 'तैरपि'. १२. 'प्रकाश'.

गान्धारी—[1]जाद, एआइ-तुमम्। [2]कोदे सहाअत्तण करिस्सदि। (क)

दुर्योधनः—

[3]एक्कोऽह भवतीसुतक्षयकरो मात' कियन्तोऽरय
[4]सौम्य केवलमेतु दैवमधुना निष्पाण्डवा मेदिनी ॥ ९ ॥

Malabeer Prasad (नेपथ्ये। कलकलानन्तरम्।)

भो भो योधाः, निवेदयन्तु भवन्त कौरवेश्वराय, [5]इदं महत्कदन प्रवृत्तम्। [6]अलमप्रियश्रवणपराङ्मुखतया। यत कालानुरूप [7]प्रतिविधातव्यमिदानीम्। तथा हि।

[8]त्यक्तप्राजनरश्मिरङ्कितधनु पार्थाङ्कितैर्मार्गणै-
र्वाहै [9]स्यन्दनवर्त्मना परिचयादाकृष्यमाण शनै'।

(क) जात, एकाकी त्वम्। कस्ते साहाय्य करिष्यति।

निष्फल यद्रणे न प्राकाश्येन बोधनीयम्। यदित्यत्र जात्यभिप्रायमेकवचनम्। 'तैरिव कृतम्' इति पाठे यथा तै शत्रुभि कृत निष्फल रणाप्रकाशनादित्यर्थ। **गान्धारीवाक्ये।** जात, एकाकी त्वम्। कस्ते साहाय्य करिष्यति॥ हे मातरेकोऽहमद्वितीय श्रेष्ठो वास्मि। कीदृश। भवत्या पुत्रनाशकर। भव-तीत्यत्र पुत्रशब्दाभाव. प्रियादिपाठात्। 'स्त्रिया पुवत्' इति योगविभागाद्वा। कियन्तोऽल्पा। केवलं दैवमेव श्लाघ्यमस्तु। मेदिनी निष्पाण्डवास्तु॥ ९॥ यत्र क्रिया नास्ति तत्र कृम्बस्तयो ग्राह्या इति व्युत्पत्ति॥ कदन पाप भीषण वा। 'कदन भीषणे पापे' इति विश्व। **त्यक्तेति।** शल्य शिबिर ग्रातीत्यन्वय.। किं कुर्वन्। कुरून्कुरुबलानि शल्ययन्तु खितानि कुर्वन्। कीदृश। त्यक्तौ प्राजन-रश्मी येन स तथा। प्राजन 'पएना' इति ख्यातम्। 'प्राजन तोदन तोत्रम्' इत्यमर। रश्मिर्वल्गा। मार्गणैर्बाणै। 'पृषत्कमार्गणशरा' इत्यमर। वाहै शनै-र्मन्दमाकृष्यमाण.। स्यन्दनवर्त्मना परिचयाद्रथमार्गानुसधानात्। पृच्छता जनाना

---

१. 'ता जाद्र' २ 'कोवि दे', ३ 'नन्वेक' ४ 'साह्य केवलमेतु दैवमधुना', 'शमय केवलमेतु दैवमधुना', 'सह्य केवलमेतदैवमधुना', 'श्लाघ्य केवलमस्तु दैवम-धुना' इति पाठान्तराणि ५ 'जना'. ६ 'प्रतन्महत्कदन सवृत्तम्' इति क्वचित्पाठ ७ 'अलमिदानीमप्रियश्रवणपराङ्मुखतया। यत कालानुरूप प्रतिविधातव्यम्।' इति पाठ. ८ 'विधातव्यम्' ९ 'न्युब्जप्रोज्झितरश्मिरङ्कितनु', 'त्यक्तप्राजनरश्मिर-[illegible] १० 'स्यन्दनवर्त्मन', 'स्यन्दनवर्त्मना',

वार्तामङ्गपतेर्विलोचनजलैरावेदयन्पृच्छता
शून्येनैव रथेन याति शिबिर शल्य कुरूञ्शल्ययन् ॥ १० ॥

दुर्योधनः—(श्रुत्वा । साशङ्कम् ।) आ, केनेदमविस्पष्टमशनिपातदारुणमुद्घोषितम् । क. कोऽत्र भो ।

(प्रविश्य सभ्रान्त ।)

सूतः—हा, हता स्म । (इत्यात्मान पातयति ।)

दुर्योधनः—अयि, कथय ।

धृतराष्ट्रसंजयौ—कथ्यता कथ्यताम् ।

सूतः—आयुष्मन्, किमन्यत् ।

शल्येन यथा शल्येन मूर्छितः प्रविशता जनौघोऽयम् ।
शून्य कर्णस्य रथ मनोरथमिवाँधिरूढेन ॥ ११ ॥

दुर्योधनः—हा वयस्य कर्ण । (इति मोहमुपागत ।)

कृतेऽङ्गपतेर्वार्तां नेत्रजलैरावेदयन्कथयन् । तथाच कर्णो मृत इति रोदनेनैव सूचितमिति भाव ॥ १० ॥ अशनिर्वज्रम् । उभय क्रियाविशेषणम् । उद्घोषित मुच्चै शब्द कृत ॥ स्मो भवाम ॥ **शल्येनेति** । हे देव, अय जनौघ शल्येन राज्ञा हेतुभूतेन मूर्छितोऽस्ति । कीदृशेन । प्रविशता । अर्थाज्जनौघमेव । कर्णस्य रथमधिरूढेन च । यथा शल्येनाप्रविशेषेण मूर्च्छितो जनौघो भवति । कीदृश रथम् । मनोरथमिव । शून्यमित्यर्थ । आर्याच्छन्द ॥ ११ ॥ **गान्धारीवाक्ये** ।

---

१. 'पृच्छते' २ 'कम्पयन्' ३ 'दुर्यो०—(आकर्ण्य । सभयम् ।) आ, केनेदमविस्पष्टमशनिपातदारुणमुद्घोषितम् । क कोत्र भो', 'दुर्यो०—(श्रुत्वा । साशङ्कम् ।) आ, केनेतदविस्पष्टमशनिपातदारुणमुद्घोषितम् । क कोत्र भो', 'दुर्यो०—(श्रुत्वा । सशङ्कम् ।) सूत, केनेदमविस्पष्टमशनिपातदारुणमुद्घोषितम् । शायताम् । क कोऽत्र भो', 'दुर्योधन —(श्रुत्वा । साशङ्कम् ।) सूत, केनेदमविस्पष्टमशनिपातदारुणमुद्घोषितम् । शायताम् । क कोऽत्र भो', 'राजा—आ, किमेवमविस्पष्टमशनिनिर्घातदारुणमुद्घोषितम् । क कोऽत्र भो' इति पाठान्तराणि ४ 'हतोऽस्मि' ५ '(इत्यात्मानमपातयत् ।)' इति बहुपुस्तकाना पाठ ६ 'कथय कथय' इति पाठ ७ 'धृतराष्ट्रसजयौ—कथ्यता कथ्यताम्' इति क्वचिन्नास्ति ८ 'आयुष्मन्, किमन्यत्' इत्यत्र 'कथयामि किं देव' इति क्वचित्पाठ ९. 'स्वल्पेन' १० 'आरूढेन' ११ 'हा वयस्य, हा कर्ण' इति क्वचित्पाठ १२ '(इति मोह गत ।)' इति पाठ

गान्धारी—जाद, समस्सस समस्सस । (क)

संजयः—[1]समाश्वसितु समाश्वसितु देवः ।

धृतराष्ट्रः—भो[2], कष्ट कष्टम् ।

भीष्मे द्रोणे च निहते य आसीदवलम्बनम् ।
[2]वत्सस्य च सुहृच्छूरो राधेय[2] सोऽप्यय हत[2]. ॥ १२ ॥

वत्स, समाश्वसिहि समाश्वसिहि । [3]ननु भो हतविधे,

अन्धोऽनुभूतशतपुत्रविपत्तिदुःखः
शोच्या दशामुपगत सह भार्ययाहम् ।
[4]असिन्नशेषितसुहृद्गुरुबन्धुवर्गे
दुर्योधनेऽपि हि कृतो भवता निरा[5]श ॥ १३ ॥

[6]वत्स दुर्योधन, समाश्वसिहि समाश्वसिहि । समाश्वासय तपस्विनीं मातरं च ।

दुर्योधनः—(लब्धसञ्ज्ञः ।)

अयि कर्ण कर्णसुखदा प्रयच्छ मे
गिरमुद्विरन्निव मुद मयि स्थिराम् ।

(क) जात, समाश्वसिहि समाश्वसिहि ।

जात, समाश्वसिहि समाश्वसिहि ॥ **अन्ध इति** । अशेषितो विनष्ट । विरामो निरस्तता । 'निराश' इति पाठे आशाशून्य ॥ १३ ॥ **अयीति** । त्व मे कर्णसुख दामित्यन्वय । हे कर्ण, मयि धीर प्रयच्छ । कीदृश । मयि स्थिरा मुदमुद्विरन्निव ।

---

१ 'समाश्वसितु समाश्वसितु महाराज', 'समाश्वसिहि समाश्वसिहि महाराज' इति पाठौ २ 'वत्सस्य मे सुहृच्छूर', 'पुत्रस्य मे सुहृत्प्रेयान्', 'वत्सस्य मे सुहृत्प्रेयान्' इति पाठान्तराणि ३ 'ननु भो हतविधे भरतकुलविमुख', 'भो हतविधे', 'भगवन्विधे' इति पाठान्तराणि ४ 'नि शेषिताखिलसुहृद्गुरुबन्धुवर्ग' इति पाठ ५ 'विराम' ६ 'वत्स दुर्योधन, समाश्वासय तपस्विनीं मातरम्', 'वत्स समाश्वसिहि समाश्वासय चात्मानम्' इति पाठौ

[1]सततावियुक्तमकृताप्रिय प्रिय
वृषसेनवत्सल विहाय यासि माम् ॥ १४ ॥

([2]पुनर्मोहमुपागत ।)

([3]सर्वे समाश्वासयन्ति ।)

दुर्योधनः—

मम प्राणाधिके तस्मिन्[4]नज्ञानामधिपे हते ।
उच्छ्वसन्नपि लज्जेऽहमाश्वासे तात का कथा ॥ १५ ॥

अपि च ।

शोचामि शोच्यमपि शत्रुहृत न वत्स
दु शासन तमधुना नै च बन्धुवर्गम् ।
येनातिदु श्रवमसाधु [6]कृतं तु कर्णे
कर्तास्मि तस्य निधन समरे कुलस्य ॥ १६ ॥

गान्धारी—जाद, सिढिलेहि दाव क्खणमेत्त बाप्पमोक्खम् ।(क)

धृतराष्ट्रः—वत्स, [7]क्षणमात्र परिमार्जयाश्रूणि ।

(क) जात, शिथिलय तावत्क्षणमात्र बाष्पमोक्षम् ।

इत्येकोऽन्वय । द्वितीयस्तु । हे कर्ण, मे मम कृते कर्णसुखदा गिर प्रगच्छ । मुदमुद्विरन्निव । त्वमिति शेष । अकृताप्रिय न कृतमप्रिय यस्य तम् । प्रिय मित्रम् । वृषसेनो वत्सलो यस्य स तथा ॥ १४ ॥ **ममेति** । तस्मिन्नज्ञानामधिपे हते सत्यु च्छ्वसन्नपि श्वासावधारणेऽपि लज्जा करोमि । आश्वासे का कथा । अपितु न कापि ॥१५॥ **शोचामीति** । शोच्य शोचनार्हम् । येन कर्णेन मम कर्णेऽसाध्वयोग्यमतिदु श्रवमत्यर्थदु खश्राव्य वचो न कृत तस्य कर्णस्य निधने सति मम कुलस्य निधन विनाश इत्यर्थ । दु श्रवमिति विशेषणद्वारा विशेष्यलाभ । 'ईषद्दु सुषु–' इत्यादिना खल् ॥ १६ ॥ **गान्धारीवाक्ये** । जात, शिथिलय तावत्क्षणमात्र बाष्पमोक्षम् ।

---

१ 'सततावियुक्तमकृताप्रिय कथ', 'अनुजैर्वियुक्तमकृताप्रिय प्रिय' इति पाठौ २ '(इति पुनर्मोहमुपगत ।)' ३ 'आश्वासयन्ति' ४ 'अज्ञानामीश्वरे गते', 'अज्ञानामीश्वरे हते' इति पाठौ ५ 'हतबन्धुवर्गम्' इति क्वचित्पाठ ६ 'कृत न कर्णे कर्णस्य तस्य निधने निधन कुलस्य' इति जगद्धरसमादृत पाठ, 'कृत च कर्णे कर्तास्मि तस्य निधन समरे कुलस्य' इत्यपि क्वचित्पाठ ७ 'क्षणमेक त्यजाश्रूणि' इति क्वचित्पाठ

दुर्योधनः—

मामुद्दिश्य त्यजन्प्राणान्केनचिन्न निवारित ।
तत्कृते त्यजतो बाष्प कि मे दीनस्य वार्यते ॥ १७ ॥

सूत, केनैतदसभवनीयमसत्कुलान्तकरण कर्म कृत स्यात् ।

सूतः—आयुष्मन्, एव किल जनः कथयति ।

भूमौ निमग्नचक्रश्चक्रायुधसारथे शरैस्तस्य ।
निहत किलेन्द्रसूनोरसत्सेनाकृतान्तस्य ॥ १८ ॥

दुर्योधनः—

कर्णाननेन्दुसरणात्क्षुभितः शोकसागर ।
वाडवेनेव शिखिना पीयते क्रोधजेन मे ॥ १९ ॥

तात, अम्ब, प्रसीदतम् ।

ज्वलनः शोकजन्मा मामय दहति दु सह ।
समानाया विपत्तौ मे वरं सशयितो रण ॥ २० ॥

अत्र मोक्षस्त्याग ॥ **मामिति** । न निवारितो य इति शेष । तत्कृते त लक्ष्यी कृत्वाप्राणे त्यजतो मे किं वार्यते । न वारयितुमर्हतीति भाव ॥ १७ ॥ असभावनीयं दुष्करम् ॥ **भूम्यामिति** । किल प्रसिद्धौ । तस्येन्द्रसूनोरर्जुनस्य शरै. स कर्णो निहत । कीदृश भूमौ निमग्नरथाङ्ग । 'चक्रं सैन्यरथाङ्गयो' इति विश्व । चक्रायुध कृष्ण । कृतान्तो यम ॥ १८ ॥ **कर्णेति** । वाडवेन वडवाजातेन । शिखिनाग्निना ॥ १९ ॥ **ज्वलन इति** । समानाया तुल्याया दाहमरणयोर्विपदि सत्याम् । सशयितोऽपि जये भङ्गे च सदिग्धोऽपि । रणो वर श्रेष्ठ इत्यर्थ । वरं

---

१ 'केनापि न स वारित', 'केनचिन्न स वारित' २ 'सूत, केनेदमसभावित मसत्कुलान्तकर कर्म कृत स्यात्', 'धृतराष्ट्र —'केनेदमसभावितमसत्कुलान्तकर कर्मं कृतम्' इति पाठौ ३ 'आयुष्मन्' इति कचिन्नास्ति ४ भूम्या निमग्नचक्रस्तु स चक्रायुधसारथे । सख्ये किल हतो बाणैरसत्सेनान्तकारिण ॥' इति पुस्तकान्तरे पाठ ५ 'दुर्योधन —कष्ट भो कष्टम् । कर्णाननेन्दुसरणात्' इति कचित्पाठ. ६ 'अम्ब, तात, प्रसीदतम्' इति कचित्पाठ ७ 'शोकज्वलनजन्मा मा तापो दहति दु सह ' इति कचित्पाठ ८ 'वर सशयितु रणे', 'वर सशयन रणे', 'वर सँशयतो रणे', 'वर सशयतो रणम्' इति पाठान्तराणि

धृतराष्ट्रः—([1]दुर्योधन परिष्वज्य रुदन् ।)

[2]भवति तनय लक्ष्मी साहसेष्वीदृशेषु
[3]द्रवति हृदयमेतद्भीममुत्प्रेक्ष्य भीमम् ।
[4]अनिकृतिनिपुण ते चेष्टित मानशौण्ड
[5]छलबहुलमरीणा सङ्गरं हा हतोऽस्मि ॥ २१ ॥

गान्धारी—[6]जाद, तेण एव्व सुदसदकदन्तेण [7]विओदलेन सम समल मग्गसि । (क)

दुर्योधनः—तिष्ठतु तावद्वृकोदर ।

पापेन येन [8]हृदयस्य मनोरथो मे
सर्वाङ्गचन्दनरसो नयनामलेन्दु ।
पुत्रस्तवाम्ब तव तात [9]नयैकशिष्य
कर्णो हतः सपदि तत्र शरा पतन्तु ॥ २२ ॥

(क) जात, तेनैव सुतशतकृतान्तेन वृकोदरेण सम समर मार्गयसे ।

शब्दो मनागर्थे वा ॥ २० ॥ **भवतीत्यादि** । हे तनय पुत्र, ईदृशेषु साहसेषु लक्ष्मीर्भवति । तदुक्तम्—'न साहसमनारुह्य नरो भद्राणि पश्यति' इति । द्रवति चपल भवति । भीम भयानकम् । उत्प्रेक्ष्य विचिन्त्य । हे मानशौण्डाभिमानख्यात, ते चेष्टितमनिकृतिनिपुण परक्षेपाकुशल परभर्त्सनाकुशल वा अस्तीति शेष । 'निकृतिर्भर्त्सने क्षेपे' इति विश्व । अरीणा सङ्गरं युद्ध छलबहुलमस्ति । अतो हा कष्टम् । हतोऽस्मि ॥ २१ ॥ **गान्धारीवाक्ये** । जात, तेनैव सुतशतकृतान्तेन वृकोदरेण सह समरप्रार्थयेथा ॥ **पापेनेति** । हे अम्ब, तव पुत्र कर्ण । हे तात, तव नयैकशिष्य कर्ण । येन पापेन हत इत्यन्वय ॥ २२ ॥

---

१ '(दुर्योधन परिष्वज्य ।)', (पुत्र परिष्वजन् रुदन् ।)' इति पाठौ २ 'भवति तनय सत्य सशय साहसेषु' इति बहुपुस्तकाना पाठ ३ 'दहति हृदयमेतत्', 'द्रवति च हृदय मे' ४ 'अनिकृतनिपुण', 'पतिकृतिनिपुणम्' ५ 'छलबहुलम्' ६ 'जाद' इति क्वचिन्नास्ति ७ 'विओदलहदएण' ८ 'अवतिष्ठतु', 'अम्ब, तिष्ठतु' ९ 'हृदयस्थमनोरथ' १० 'ममैकमित्र' इति क्वचित्पाठ

सूत, अलमिदानी कालातिपातेन । सज्ज मे रथमुपाहर । भय चेत्पाण्डवेभ्यस्तिष्ठ । गदामात्रसहाय एव समरभुवमवतरामि ।

सूतः—अलमन्यथा सभावितेन । अयमहमागत एव । (इति निष्क्रान्त ।)

धृतराष्ट्रः—वत्स दुर्योधन, यदि स्थिर एवास्मान्दग्धुमय ते व्यवसायस्तत्सन्निहितेषु वीरेषु सेनापतिं कञ्चिदभिषिच्यताम् ।

दुर्योधनः—नन्वभिषिक्त एव ।

गान्धारी—जाद, कदरो उण सो जस्सिं आस ओलम्बिस्सम्।(क)

धृतराष्ट्रः—किं वा शल्य उत वाश्वत्थामा ।

संजयः—हा कष्टम् ।

गते भीष्मे हते द्रोणे कर्णे च विनिपातिते ।
आशा बलवती राजन्शल्यो जेष्यति पाण्डवान् ॥ २३ ॥

दुर्योधनः—किं वा शल्येनोत वाश्वत्थाम्ना ।

(क) जात, कतर पुनः स यस्मिन्नाशामवलम्बिष्ये ।

अतिपातोऽतिक्रम ॥ **गान्धारीवाक्ये** । जात, कतर स यस्मिन्नाशा समवलम्बिष्ये । अत्र कतर क इत्यर्थ । आशा प्रत्याशाम् ॥ **गत इति** । गते शरशय्यामिति शेष । विनिपातिते घातिते ॥ २३ ॥ **कर्णेति** । अय ममात्मा

---

१ 'उपहर' २ 'त्व चेद्विभेषि पाण्डवेभ्य', 'त्व चेद्विभ्यत्पाण्डवेभ्य' ३ 'समर' ४ 'अयमहमागतोऽस्मि', 'अयमागतोऽस्मि' इति पाठौ ५ '(इति निष्क्रान्त ।)' इत्यसादनन्तर '(नेपथ्ये कलकल ।) दुर्योधन —अनुमोदध्वमनुमोदध्वम् । पराङ्मुखोऽस्माक विधि' इति क्वचिदधिक पाठ समुपलब्धते ६ 'यदि स्थिर एवाय निश्चयस्तथा सन्निहितेषु', 'यदि स्थिर एष ते समराभ्यवसायस्तथा सन्निहितेषु' इति पाठौ ७ 'एवेति' ८ 'जाद' इति क्वचिन्नास्ति ९ 'जस्सिं आसा अवलम्बीअदु', 'जहिं एद हदास ओलम्बिस्सम्' इति पाठौ १० 'किं शल्योऽथवाश्वत्थामा वा' इति क्वचित्पाठ ११. 'सजय—हा कष्टम्' इत्यसादारभ्य 'शल्यो जेष्यति पाण्डवान्' इत्यन्त पुस्तकान्तरे नास्ति १२ 'हते' १३ 'किं वा शल्येनोत वाश्वत्थाम्ना' इति पाठ क्वचिन्नास्ति

कर्णालिङ्गनदायी वा पार्थप्राणहरोऽपि वा ।
अनिवारितसपातैरयमात्माश्रुवारिभि ॥ २४ ॥

(नेपथ्ये कलकल कृत्वा ।)

भो भोः कौरवबलप्रधानयोधा, अलमस्मानवलोक्य भयादितस्ततो गन्तुम् । कथयन्तु भवन्त कस्मिन्नुद्देशे सुयोधनस्तिष्ठतीति ।

(सर्वे ससभ्रममाकर्णयन्ति ।)

(प्रविश्य सभ्रान्त ।)

सूतः—आयुष्मन्,
प्राप्तावेकरथारूढौ पृच्छन्तौ त्वामितस्ततः ।

सर्वे—कश्च कश्च ।

सूतः—
सैं कर्णारिः स च क्रूरो वृकोदर ॥ २५ ॥

गान्धारी—(सभयम् ।) जाद, किं एत्थ पडिपज्जिदव्व । (क)

दुर्योधनः—ननु सनिहितैवेय गदा ।

गान्धारी—हा हदाह्मि मन्दभाइणी । (ख)

(क) जात, किमत्र प्रतिपत्तव्यम् ।

(ख) हा हतास्मि मन्दभागिनी ।

कर्णालिङ्गनदायी कर्णानुयायीत्यर्थ । अश्रुवारिभिर्लक्षित । लक्षणे तृतीया । कीदृशै । अनिवारितासारै । 'धारासपात आसार' इत्यमर । तथा च मर्तव्य वा मयार्जुनवधो वा कर्तव्य इति भाव ॥ २४ ॥ इतस्तत सर्वत्र **प्राप्ताविति** । कर्णारिरर्जुन । वृको 'हुण्डार' इति ख्यात । तद्वद्युद्धकर्म यस्य स वृककर्मा । वृको मृगविशेषो वा । 'कोक स्त्वीहामृगो वृक' इत्यमर । 'वृको मृगे तथोरगे' इति धरणि ॥ २५ ॥ **गान्धारी वाक्ये** । जात, किमत्र कर्तव्यम् । 'प्रतिपत्तव्यम्' इत्यपि पाठ ॥ हा हतास्मि

---

१ 'अस्रवारिभि', २ '(नेपथ्ये कलकल कृत्वा ।)' इत्यत्र '(नेपथ्ये ।)' इति क्वचित्पाठ ३ 'गमनेन' इति क्वचित्पाठ ४ 'सर्वे—कश्च ।' इति क्वचित्पाठ ५ 'कर्णस्यारि' ६ 'भीमकर्मा' ७ 'एत्थ सपद पडिपज्जिदव्वम्', 'एत्थ कादव्वम्' ८ 'अम्ब, ननु' ९ 'हा हदह्मि अह मन्दभाइणी', 'हा हदह्मि सपद पावा' इति पाठौ

दुर्योधनः—[1]अम्ब, अलमिदानी कार्पण्येन। [2]सजय, रथमारोप्य पितरौ शिबिरं [3]प्रतिष्ठस्व। [4]समागतोऽस्माकं शोकापनोदी जन।

धृतराष्ट्रः—वत्स, क्षणमेकं प्रतीक्षस्व यावदनयोर्भावमुपलभे।

दुर्योधनः—तात, किमनेनोपलब्धेन।

(तत प्रविशतो भीमार्जुनौ।)

भीमः—भो भोः [8]युयोधनानुजीविनः, [9]किमिति सभ्रमादयथायथं चरन्ति भवन्तः। [10]कथयत तावदिदमावयोरागमनं स्वामिनस्तस्य कुरुपतेः। [11]अलमावयोः शङ्कया।

कर्ता द्यूतच्छलानां [12]जतुमयशरणोद्दीपनः सोऽभिमानी [13]
कृष्णाकेशोत्तरीयव्यपनयनमरुत्पाण्डवा यस्य दासाः।
राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रं
कास्ते दुर्योधनोऽसौ कथयत [14]न रुषा द्रष्टुमभ्यागतौ स्वः २६

धृतराष्ट्रः—सजय, दारुणं [15]खल्वपक्षेपं पापस्य।

मन्दभागिनी॥ प्रतीक्षस्व क्षमस्व। अनयोर्भीमार्जुनयोः। भावमभिप्रायम्। अयथायथमितस्ततः। **कर्तेति**। असौ स दुर्योधनः कास्ते तत्कथयत। रुषा तं द्रष्टुं नाभ्यागतौ स्वः। सदनं गृहम्। व्यपनयनं दूरीकरणम्। मरुद्वातः। मित्रं स इत्यत्र मित्रशब्दस्याजहल्लिङ्गतयान्वयः॥ २६॥

---

१ 'अम्ब' इति क्वचिन्नास्ति २ 'सजय, सजय' इति बहुपुस्तकानां पाठः ३ 'प्रस्थापय', 'प्रवेशय', 'प्रतिप्रवेशय' ४ 'प्राप्तोऽस्माच्छोकापनोदप्रणयी जनः' इति बहुपुस्तकानां पाठः ५ 'उपलभामहे' ६ 'उपलब्धेन। तद्गम्यताम्।', 'उपलम्भेन। तद्गम्यताम्। (धृतराष्ट्रो गान्धारी च किञ्चिद्गत्वा तिष्ठतः)' इति पाठौ ७ 'रथारूढौ भीमार्जुनौ' ८ 'युयोधनानुजीविनो योधाः' इति क्वचित्पाठः ९ 'किमिति सभ्रमात्सचरन्ति भवन्तः', 'किमिति ससभ्रममयथायथं सचरन्ति भवन्तः', 'किमिति ससभ्रममयथातथं सचरन्ति भवन्तः' इति पाठान्तराणि १० 'कथयत तावदिदमावयोरागमनं स्वामिनस्तस्य कुरुपतेः' इति पाठः केषुचित्पुस्तकेषु नास्ति ११ 'अलमावयोः शङ्कया' इति क्वचिन्नास्ति १२ 'जतुमयसदनोद्दीपनः' १३ 'अतिमानी' १४ 'व्यपनयनपटुः' इति बहुभिः प्राचीनैः समादृतः पाठः १५ 'न रुषा' इत्यत्र 'परुषा' इति क्वचित्पाठः १६ 'खल्वाक्षेपं पापस्य' इति बहुपुस्तकानां पाठः

संजयः—तात, कर्मणा कृतनिःशेषविप्रिया. सप्रति वाचा व्यवस्यन्ति ।

दुर्योधनः—सूत, कथय गत्वोभयोरय तिष्ठतीति ।

सूतः—यथाज्ञापयति देव । (तावुपसृत्य ।) ननु भो वृकोदरार्जुनौ, एष महाराजस्तातेनाम्बया च सह न्यग्रोधच्छायायामुपविष्टस्तिष्ठति ।

अर्जुनः—आर्य, प्रसीद । न युक्त पुत्रशोकोपपीडितौ पितरौ पुनरसद्दर्शनेन भृशमुद्वेजयितुम् । तद्वच्छाव ।

भीमः—मूढ, अनुल्लङ्घनीय सदाचार । न युक्तमनभिवाद्य गुरूनगन्तुम् । (उपसृत्य ।) सजय, पित्रोर्नमस्कृतिं श्रावय । अथवा तिष्ठ । स्वय विश्राव्य नामकर्मणी वन्दनीया गुरव ।

अर्जुनः—(उपगम्य ।) तात, अम्ब,

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते
तृणमिव परिभूतो यस्य गर्वेण लोक ।

उद्वेजयितुमित्यत्र ण्यन्तत्वाद्भुण ॥ सदाचार शिष्टाचार । 'समुदाचार' इति पाठे सद्व्यवहार इत्यर्थ । नमस्कृति नमस्कारम् ॥ **सकलेति** । वा पितरावयं मध्यम

१, 'कृतनि शेषविप्रिया सप्रति वाचा व्यवस्यत', 'कृतनि शेषेऽपि सप्रति विप्रिय वाचा व्यवस्यन्ति' इति पाठौ २ 'ब्रूहि' ३ 'गत्वानयोरय महाराजस्तिष्ठतीति' इति क्वचित्पाठ ४ 'यथाज्ञापयसि', 'यथाज्ञापयसि देव' इति पाठौ ५ '(इति तावुपसृत्य ।)' ६ 'ननु' इति क्वचिन्नास्ति' ७ 'तिष्ठतीति' ८ 'पुत्रशोकपीडितौ पितरौ पुनरसद्दर्शनेनोद्वेजयितुम्', 'पुत्रशोकोपपीडितौ पितरौ पुनरसद्दर्शनेनोद्वेजयितुम्', 'पुत्रशोकपीडितौ पुनरसद्दर्शनेन भृशमुद्वेजयितुम्' इति पाठान्तराणि ९ 'मूढ' इत्यत्र 'पण्डितमन्य', 'अयि पण्डित' इति पाठौ १० 'अलङ्घनीय' ११. 'समुदाचार' १२ 'स्वगुरु' १३ 'अथवा तिष्ठ । स्वयमेव श्रावयाव ।' (इति रथादवतरत ।) भीम—'विश्राव्य स्वकर्म नाम च वन्दनीया गुरव' इति बहुपुस्तकाना पाठ १४ '(उपसृत्य ।)'

रणशिरसि निहन्ता तस्य राधासुतस्य
प्रणमति पितरौ वा मध्यम[1] पाण्डवोऽयम् ॥ २७ ॥

भीमः—

चूर्णिताशेषकौरव्य[2] क्षीबो[3] दुःशासनासृजा ।
भङ्क्ता सुयोधनस्योर्वोर्भीमोऽयं शिरसाञ्चति[4] ॥ २८ ॥

धृतराष्ट्रः—दुरात्मन्[5] वृकोदर, न खल्विद[6] भवतैव केवलं सपत्ना-नामपकृतम् । यावत्क्षात्र[7] तावत्समरविजयिनो जिता हताश्च वीरा । तत्किमेव विकत्थनाभिरस्मानुद्वेजयसि ।

भीमः—तात, अलम[8] मन्युना ।

कृष्णा[9] केशेषु कृष्टा तव सदसि पुर[10] पाण्डवाना नृपैर्यैः
सर्वे ते क्रोधवह्नौ कृशशलभकुलावज्ञया येन[11] दग्धाः ।
एतत्[12] साच्छ्रावयेऽह न खलु भुजबलश्लाघया नापि दर्पा-
त्पुत्रै पौत्रैश्च कर्मण्यतिगुरुणि[13] कृते तात साक्षी त्वमेव[14] ॥२९॥

दुर्योधनः—अरे रे मरुत्तनय, किमेव वृद्धस्य राज्ञः पुरतो[15] निन्दितव्यमात्मकर्म श्लाघसे । अपि च ।

पाण्डवोऽर्जुन प्रणमति । 'वाम्' इति द्वितीयाद्विवचनान्तम् ॥२७॥ **चूर्णितेति**। क्षीबो मत्त । भङ्क्ता भङ्गकर्ता ॥ २८ ॥ अपकृतमपकार कृत । वीरा जयिनो हताश्च भवन्तीति क्षात्रधर्मोऽयम् । विकत्थनोपहास । **कृष्णेति**। पुर । पाण्डवानामेव। पाण्डवाना वधू कृष्णा । ते सर्वेऽनेनार्जुनेन दग्धा इत्यन्वय । कृश यच्छलभ-कुलं तद्वदवज्ञयापमानेनेत्यर्थ । तेनाह त्वा श्रावये । खलु निश्चये । न भुजबल-श्लाघया श्रावये । नापि दर्पाच्छ्रावये ॥ २९ ॥ **कृष्टेति**। तव भीमस्य । तव

---

१ 'मध्यम पाण्डुपुत्र', 'फाल्गुन पाण्डवोऽयम्' इति पाठौ २ 'निहता-शेषकौरव्य' ३ 'शिरसा नत्त' ४ 'दुरात्मन्वृकोदर, मा तावद्विकत्थयात्मानम्' 'न खल्विद' इति केचित् ५ 'क्षात्र' ६ 'अलमल मन्युना', 'अलमिदानी मन्युना' ७ 'कृष्टा केशेषु कृष्णा' इत्यपि पाठ ८ 'वधू' ९ 'कृतशलभकुलावज्ञया' १० 'तेन', 'अनेन' ११ 'तात, त्वा श्रावयेऽह' इति क्वचित्पाठ १२ 'भव-त्वम्' १३ 'पुर' १४ 'अतिनिन्दितव्यमपि', 'निन्दितमपि'.

कृष्टा केशेषु भार्या तव तव च पशोस्तस्य राज्ञस्तयोर्वा
प्रत्यक्षं भूपतीना[1] मम भुवनपतेराज्ञया द्यूतदासी ।
अस्मिन्वैरानुबन्धे वद[2] किमपकृत तैर्हता ये नरेन्द्रा
बाह्वोर्वीर्यातिरेक[3]द्रविणगुरुमद मामजित्वैव दर्प[4] ॥ ३० ॥

(भीम क्रोध नाटयति ।)

अर्जुनः[5]—आर्य, प्रसीद । किमत्र क्रोधेन ।

अप्रियाणि करोत्येष[6] वाचा शक्तो न कर्मणा[7] ।
हतभ्रातृशतो दु खी प्रलापैरस्य का व्यथा[8] ॥ ३१ ॥

भीमः—अरे रे भरतकुलकलङ्क[9],

अत्रैव[10] कि न विशसेयमह भवन्त
दु शासनानुगमनाय कटुप्रलापिन् ।
विघ्न गुरु[11]र्न कुरुते यदि मत्करा[12]ग्र-
निर्भिद्यमानरणितास्थनि[13] ते शरीरे ॥ ३२ ॥

चार्जुनस्य । तस्य राज्ञो युधिष्ठिरस्य । तयोर्नकुलसहदेवयो । एतेषा प्रत्यक्ष भूपतीनां च प्रत्यक्षम् । अनुबन्धे प्रकरणे । ये नरेन्द्रा हतास्तै किमपकृतमित्यन्वय । द्रविण धनम् ॥३०॥ **अप्रियाणीति** । एष वाचा अप्रियाणि करोति । कर्मणा न शक्तोऽसमर्थ इत्यन्वय । यद्वा । अशक्त एष वाचाप्रियाणि करोति न कर्मणेत्यन्वय । 'प्रलापोऽनर्थक वच' इत्यमर ॥ ३१ ॥ **अत्रैवेति** । अह भवन्त किमत्रैव न विशसेय न विनाशयामि । यदि ते शरीरे गुरुर्विघ्न न कुरुत इत्यन्वय । विशसेयमिति 'शसु हिंसायाम्' लिङि उत्तमपुरुषैकवचने रूपम् । हे कटुप्रलापिन् । कीदृशे शरीरे । मत्कराग्रैर्निर्भिद्यमानान्यत एव रणितानि शब्दितान्यस्थीनि यत्र तादृशे । 'कीकस कुल्यमस्थि च' इत्यमर ॥ ३२ ॥

---

१ 'क्ष्मापतीना २ 'तव किमपकृत', 'कथमनपकृत' इति पाठौ ३ 'वीर्यातिसार–', 'वीर्यातिभार–' ४ 'दर्प' इत्यसादनन्तर 'आ दुरात्मन्, एष न भवसि । (इति सक्रोधमुत्थाय हन्तुमिच्छति । धृतराष्ट्रो धृत्वोपवेशयति ।)' इत्यधिक पाठो बहुपुस्तकेषु दृश्यते ५ 'अर्जुन —(निवारयन् ।) आर्य, प्रसीद प्रसीद । किमत्र क्रोधेन ।', 'अर्जुन —आर्य, किमत्र क्रोधेन' इति पाठौ ६ 'करोत्येव' ७ 'कथा' ८ 'भरतकुले न्दुकलङ्क' ९ 'अत्रैव किं न विसृजेयम्', 'अद्यैव किं न विसृजेयम्' इति पाठौ १० 'गुरू न कुरुत' ११ 'मद्गदाग्र–', 'मद्गदाग्रै' १२ 'अस्थिनि'

अन्यच्च मूढ,

[1]शोक स्त्रीवन्नयनसलिलैर्यत्परित्याजितोऽसि
आतुर्वक्ष स्थलविघटने यच्च साक्षीकृतोऽसि ।
आसीदेतत्तव कुनृपते [2]कारण जीवितस्य
क्रुद्धे युष्मत्कुलकमलिनीकुञ्जरे भीमसेने ॥ ३३ ॥

दुर्योधनः—दुरात्मन्, [3]भरतकुलापसद, पाण्डवपशो, नाहं भवानिव विकत्थनाप्रगल्भः । किं तु

द्रक्ष्यन्ति न चिरात्सुप्त बान्धवास्त्वा रणाङ्गणे ।
मद्गदाभिन्नवक्षोऽस्थिवेणिं[4]काभीमभूषणम् ॥ ३४ ॥

भीमः—(विहस्य ।) यद्येव नाश्रद्धेयो भवान् । तथापि प्रत्यासन्नमेव कथयामि ।

शोकमिति । शोकैर्यथा स्त्री रुदति तथा यत्त्व नयनसलिल त्याजितोऽसि । 'शोकम्' इति पाठे नेत्रजलैर्यथा स्त्री शोक त्याज्यते तथा त्वमपि त्याजित इत्यर्थः । यथा स्त्री रुदित्वा शोक त्यजति तथा त्वयापि कृतमिति भाव । भीमसेने क्रुद्धे सति तव कुनृपस्य जीवितस्यैतत्कारणमासीद्यदेतत् त्वद्वधदर्शनं च नाम । उभय चेदृत्त त्वद्वा मया त्वमपि घातयितव्य इति भाव ॥ ३३ ॥ **द्रक्ष्यन्तीति** । न चिरादचिरम् । श्रेणिका परंपरा । 'वेणिका' इति पाठे वेणिका प्रवाह । 'वेणी तु केशवेशे स्यात्प्रवाहेऽपि निगद्यते' इति धरणि । अतएव त्रिवेणीति । 'कणिका' इति पाठस्तु सुगम एव । सैव भयानकालकरण यत्र तम् । नृणा पुर इति शेष ॥ ३४ ॥ **पीनाभ्यामिति** । श्व 'कल्लि' । 'ह्यो गतेऽ-

---

१ 'शोकै स्त्रीवन्नयनसलिल', 'शोक स्त्रीवन्नयनसलिल' इति पाठौ २ 'विद त्वं' ३ 'कारणा' ४ 'भरतकुलाधम, धृतदास पाण्डवपशो', 'भरतकुलापसद, धृतदास, पाण्डवपशो' इति पाठौ ५ 'पाण्डवास्त्वा रणाजिरे' इति पाठ ६ 'अस्त्रवेणिकाभीमभूषणम्', 'अस्थिवेणिकाभङ्गभीषणम्'. ७ 'श्रेणिका' इति जगद्धरसमत पाठ, 'कणिका' इत्यपि पाठो जगद्धरेण कथित ८ 'यद्येव न श्रद्धेयो भवास्तथापि प्रत्यासन्नमेव कथयामि', 'यदि न श्रद्दधते तदा प्रत्यासन्नमेव कथयामि', 'यद्येव श्रद्धत्ते भवास्तदा प्रत्यासन्नमेव कथयामि' इति पाठान्तराणि

पीनाभ्या मद्रुजाभ्या [1]भ्रमितगुरुगदाघातसचूर्णितोरो
क्रूरस्याधाय पाद तव शिरसि नृणा पश्यता श्व प्रभाते।
[2]त्वन्मुख्यभ्रातृचक्रोद्दलनगलदसृक्चन्दनेनानखाग्र
[3]स्त्यानेनार्द्रेण चाक्त [4]स्वयमनुभविता भूषण भीममस्मि ॥३५॥

(नेपथ्ये।)

भो भो भीमसेनार्जुनौ, [5]एष खलु निहताशेषारातिचक्र [6]आक्रान्त-परशुरामाभिरामयशा [7]प्रतापतापितदिङ्मण्डलस्थापितस्वजन श्रीमानजातशत्रुर्देवो युधिष्ठिर समाज्ञापयति।

उभौ—किमाज्ञापयत्यार्य।

(पुनर्नेपथ्ये।)

[8]कुर्वन्त्वाप्ता हताना रणशिरसि [9]जना वह्निसाद्देहभारा-
[10]नश्रून्मिश्र कथचिद्ददतु जलममी बान्धवा बान्धवेभ्य।

नागतेऽह्नि श्व' इत्यमर। अनेन चन्दनेनाहमक्त सबद्ध। स्वय भीम भूषण-मनुभवितास्मि। त्व मुख्यो यत्र तादृश यद्भ्रातृचक्र तस्योद्दलनेन खण्डनेन यद्गलत्स्रवदसृक्त तदेव चन्दन तेन। मुख्येत्यनेन तस्यापि वध सूचित। तथा च त्वदादिसर्वभ्रातृवध इति भाव। स्त्यानेन पिण्डीभूतेन। आनखाग्रा-न्नखाग्रपर्यन्तमक्त इत्यन्वय ॥ ३५ ॥ उद्वृत्तो दुर्वृत्त ॥ **कुर्वन्त्विति**। आप्ता बान्धवादय। वह्निसात्कार्त्स्न्येन वह्निदेयान्। 'साति कार्त्स्न्ये' इति देयार्थे सातिप्रत्यय। भारान्सघान्। उन्मिश्र युक्तम्। मार्गन्ता प्रार्थयन्ताम्। जना इति शेष। रणशिरसि गहने व्याप्ते। असौ सूर्यो मम रिपुभि सहास्त गत।

---

१ 'भ्रमितगुरुगदावज्रसचूर्णितोरो' इति पाठ २ 'तन्मूर्खभ्रातृचक्रोद्दमन—' ३ 'आनखाग्रात्' ४ 'स्त्यानेनार्द्रेण वाक्ष्णो स्वयमनुभविता भूषण भीमसेन', 'स्त्यानेनानेन सिक्त स्वयमनुभविता भूषण भीमसेन' इति पाठौ ५ 'अय' ६ 'उद्वृत्तारातिचक्र' ७ 'विक्रमाक्रान्त—' ८ 'प्रतापतापितदिङ्मण्डल स्थापि-तस्वजन श्रीमानजातशत्रु', 'प्रतापतापितदिङ्मण्डल श्रीमानजातशत्रु' ९ 'कुर्व-न्त्वत्राहताना' १० 'नृणा' ११ 'अस्रैर्मिश्र'

मार्गन्ता ज्ञातिदेहान्हतनरगहने खण्डितान्गृध्रकङ्क-
रस्त भास्वान्प्रयात सह रिपुभिरय सहियन्ता बलानि ॥३६॥

उभौ—यदाज्ञापयत्यार्य । (इति निष्क्रान्तौ ।)

(नेपथ्ये ।) अरे रे गाण्डीवाकर्षणबाहुशालिन्, अर्जुन अर्जुन, केदानी गम्यते ।

कर्णक्रोधेन युष्मद्विजयि धनुरिद त्यक्तमेतान्यहानि
प्रौढ विक्रान्तमासीद्वन इव भवता शूरशून्ये रणेऽस्मिन् ।
स्पर्श स्मृत्वोत्तमाङ्गे पितुरनवजितन्यस्तहेतेरुपेत-
कल्पाग्नि पाण्डवाना द्रुपदसुतचमूध्वसरो द्रौणिरस्मि ॥ ३७॥

धृतराष्ट्रः—(आकर्ण्य सहर्षम् ।) वत्स दुर्योधन, द्रोणवधपरिभवोद्दीपितक्रोधपावक पितुरपि समधिकबल शिक्षावानमरोपमश्चाय-मश्वत्थामा प्राप्त । तत्प्रत्युपगमनेन तावदय सभाव्यता वीर ।

गान्धारी—जाद, पच्चग्गच्छ एद महाभाअम् । (क)

(क) जात, प्रत्युद्गच्छैन महाभागम् ।

यथा शत्रवोऽस्त गतास्तथा रविरपीति भाव । अत्र यद्यपि शत्रुपक्षेऽस्तगमन विनाश- सूर्यपक्षेऽदृश्यत्व तथापि शब्दसाम्यात्प्रयोग । यद्वा । उभयत्राप्यस्तगमनमदृश्यत्वमात्र विवक्षितम् । तच्चैकत्र मरणेनान्यत्रान्यगमनेनेत्यन्यदेतत् । सहियन्तामुपसहियन्ताम् ॥ ३६ ॥ सभाव्यता सहर्षक्रियताम् ॥ **गान्धारी-वाक्ये** । जात, प्रत्युद्गच्छैन महाभागम् ॥ **कर्णेति** । अहानीत्यत्राल्यन्तसयोगे द्वितीया । तेनाहानि व्याप्येत्यर्थ । अत्र रणे भवता विक्रान्त पराक्रम आसीत् । विक्रान्तमिति भावे क्त । कीदृशे । वन इव शूरशून्ये । अहमुपेतोऽस्मि । कीदृश । द्रौणिर्द्रोणस्यापत्यम् । 'अत इञ्' इति इञ् प्रत्यय । किं कृत्वा । पितुरुत्तमाङ्गे स्पर्श स्मृत्वा । अह कीदृश । अनवजितो न केनापि जित । हेतिरस्त्रम् । कल्प प्रलय । घस्मरो नाशक ॥ ३७ ॥ इत आगम्यतामिहोपविशतु ॥

१ 'मृग्यन्ता' २ 'असौ' ३ 'सज्जय ता' ४ 'आ' ५ 'क्वेदमधुना गम्यते' इति पाठ ६ 'विजयधनु' ७ 'भवत', 'भगता' ८ 'अनवहितन्यस्तहेते', 'अनवहितत्यक्तहेते' ९ 'परिभवोद्दीप्तक्रोधपावक' १० 'अमरोपम' इति क्वचिन्नास्ति ११ 'अय महात्माश्वत्थामा प्राप्त । तत्प्रत्युपगमनेन तावदय सभाव्यता महावीर', 'अय महात्मा प्रत्युपगमनेनापि सभाव्यताम्' इति पाठौ

दुर्योधनः—तात, अम्ब, किमनेनाङ्गराजवधाशसिना वृथायौवनशस्त्रबलभरेण[1] ।

धृतराष्ट्रः—वत्स, न खल्वस्मिन्काले पराक्रमवतामेवविधानां[2] वाङ्मात्रेणापि विरागमुत्पादयितुमर्हसि[3] ।

(प्रविश्य ।)

अश्वत्थामा—विजयता कौरवाधिपतिः[5] ।

दुर्योधनः—(उत्थाय ।) गुरुपुत्र, इत आस्यताम्[4] । (इत्युपवेशयति ।)

अश्वत्थामा—राजन्दुर्योधन,

कर्णेन कर्णसुभग बहु यत्तदुक्त्वा[6]
यत्सङ्गरेषु विहित विदित त्वया तत् ।
द्रौणिस्त्वधिज्यधनुरापतितोऽभ्यमित्र-
मेषोऽधुना त्यज नृप प्रतिकारचिन्ताम्[7] ॥ ३८ ॥

दुर्योधनः—(साभ्यसूयम् ।) आचार्यपुत्र,

अवसानेऽङ्गराजस्य योद्धव्य भवता किल ।
ममाप्यन्त प्रतीक्षस्व क कर्ण क सुयोधन ॥ ३९ ॥

अश्वत्थामा—(स्वगतम् ।) कथमद्यापि स एव कर्णपक्षपातः[8] । अस्मासु च परिभवः[9] । (प्रकाशम् ।) राजन्कौरवेश्वर, एव भवतु । (इति निष्क्रान्त ।)

कर्णेनेति । एष द्रौणिरभ्यमित्रमरातिं लक्ष्यीकृत्याधुनापतित आगत । अतो हे नृप, प्रतीकारचिन्ता त्यज । मयैव सर्वत्र प्रतीकार कर्तव्य इति भावः । कीदृशोऽहम् । अधिगता ज्या यत्रेदृश धनुर्यस्य स । अत्र 'धनुषश्च' इति विकल्पेनानङ् ॥ ३८ ॥ **अवसान इति** । किल निश्चये । क कर्ण इति । तथा

---

१ 'वृथायौवनबलशस्त्रभरेण', 'अस्त्रशिक्षाबललाभभारेण', 'वृथायोधेन समालोकितेन' २ 'वचनमात्रेणैव', 'वचनमात्रेणैव', 'वचनमात्रेण' ३ 'विरागतामुत्पादयितुमर्हसि', 'विरागयितुमर्हसि' ४ 'आगम्यताम्' ५ 'अश्व०—(सास्रम् ।) राजन्कौरवाधिपते' इति पाठ ६ 'कर्णसुखद बहु यत्तदुक्त' ७ 'अप्रतिकारदु खम्', 'प्रतिकारदु खम्' ८ (सास्रम् ।)' ९ 'अश्व०—कथमद्यापि स एव कर्णपक्षपात । अस्मासु च परिभव । राजन्कौरवेश्वर, एव भवतु', 'अश्व०—अवितथमद्यापि स एव कर्णपक्षपात । अस्मासु परिभव । राजन्, इद भवतु' इति पाठौ

धृतराष्ट्रः[1]—वत्स, क एष ते व्यामोहो यदसिन्नपि काले एवविधस्य महाभागस्याश्वत्थाम्नो वाक्पारुष्येणापरागमुत्पादयसि ।

दुर्योधनः—किमस्मा[2]प्रियमनृत च मयोक्तम् । कि वा [3]नेद क्रोधस्थानम् । पश्य ।

अकलितमहिमान क्षत्रियैरात्तचापै
समरशिरसि युष्मद्भौग्यदोषाद्विपन्नम् ।
परिवदति समक्ष मित्रमङ्गाधिराज
मम खलु कथयास्मिन्को विशेषोऽर्जुने वा ॥ ४० ॥

धृतराष्ट्रः—[6]वत्स, तवापि कोऽत्र दोष । अवसानमिदा[7]नी भरतकुलस्य । सजय, किमिदानी करोमि मन्दभाग्य । (विचिन्त्य ।) भवत्वेव तावत् । सर्जय, मद्वचनाद्ब्रूहि भारद्वाजमश्वत्थामानम् ।

स्मरति न भवान्पीत स्तन्य विभ[8]ज्य सहामुना
मम च मृ[9]दित क्षौम बा[10]ल्ये त्वदङ्गविवर्तनै ।
अनुजनिधनस्फीताच्छोकादतिप्रणयाच्च [11]यै-
द्वचनविकृतिष्वस्य क्रोधो मुधा क्रियते त्वया [12]॥ ४१ ॥

च कर्णसुयोधनयोर्न विशेष इति भाव ॥ ३९ ॥ **अकलितेति** । विपन्न विनष्टम् । मम समक्षम् । कर्णम् । अस्मिन्नश्वत्थामन्यर्जुने वा परिभवे सति को विशेष । अपि तु न कोऽपि । हे तात, त विशेषम् । खलु निश्चयेन । कथय । तयो कृत्या न भेद इति भाव ॥ ४० ॥ **स्मरतीति** । स्तन्य स्तनदुग्धम् । अमुना सुयोधनेन । त्वदङ्गविवर्तनैस्त्वच्छरीरपरिवर्तनै । मम क्षौम पट्टवस्त्र यन्मृदित तन्न स्मरतीत्यन्वय । यदस्य सुयोधनस्य कनिष्ठवदीप्साच्छोकादति-

---

१ 'धृत०—वत्स, क एष ते व्यामोह । अस्मिन्काले एवविधस्य महाभागस्याश्वत्थाम्नो वाक्पारुष्येणापरागमुत्पादयसि', 'धृत०—वत्स, क एष ते व्यामोह । अस्मिन्काले एवविधस्याश्वत्थाम्नो वाक्पारुष्येणापरागमुत्पादयसि', 'धृत०—(पुत्र प्रति ।) वत्स, क एष भवतो व्यामोहो यदस्मिन्काले ऽश्वत्थाम्नो विरागमुत्पादयसि' इति नानाविध पाठ २ 'अप्रिय मयोक्तम्', 'अप्रियमनृत मयोक्तम्' ३ 'नेद कोपस्य स्थानम्', 'नाय क्रोधस्थानम्' ४ 'भाग्यदोषै' ५ 'परिभवति' ६ 'अथवा वत्स' ७ 'इद' ८ 'वत्स, सजय' ९ चिराय' १० 'मलिन' ११ 'जात १२ 'यद्विकृतवचने मास्मिन्क्रोधश्चिर क्रियता त्वया', 'तद्विकृतवचने मास्मिन्क्रोधश्चिर क्रियतां त्वया', 'यद्वचनविकृतिस्तस्य क्रोधो मुधा क्रियते त्वया'

संजयः—यदाज्ञापयति तात । (इत्युत्तिष्ठति ।)

धृतराष्ट्रः—अपि चेदमन्यत्त्वया वक्तव्यम् ।

यन्मोचितस्तव पिता वितथेन शल्य
यत्तादृश परिभव स तथाविधोऽभूत् ।[1]
एतद्विचिन्त्य बलमात्मनि पौरुष च
दुर्योधनोक्तमपहाय[2] विधास्यसीति ॥ ४२ ॥

संजयः—यदाज्ञापयति[3] तात । (इति निष्क्रान्त ।)

दुर्योधनः—सूत, साङ्ग्रामिक मे रथमुपकल्पय ।

सूतः—यदाज्ञापयत्यायुष्मान् । (इति निष्क्रान्त ।)

धृतराष्ट्रः—गान्धारि, इतो वय मद्राधिपते शल्यस्य शिबिरमेव गच्छाव. । वत्स, त्वमप्येव कुरु ।

(इति परिक्रम्य निष्क्रान्ता सर्वे ।)

इति पञ्चमोऽङ्कः ।

प्रश्रयाच्च तद्वचनविकृतिषु सतीषु त्वया विफल क्रोध क्रियते । न कर्तुमर्हतीत्यर्थ ॥ ४१ ॥ **यदिति** । तादृश प्रसिद्ध । तथाविधस्तत्प्रकारक । एतद्विचिन्त्यात्मनि बल च सामर्थ्य पौरुष विधास्यतीति वक्तव्यमित्यन्वय । किं कृत्वा । दुर्योधनोक्त त्यक्त्वा । केचित्तु विधास्यतीत्यत्र प्रतीकारमिति शेष इत्याहु ॥ ४२ ॥

असूत य रत्नधरो गुणीशो नानागुणाढ्या दमयन्तिकापि ।
जगद्धर तस्य कृतौ प्रयातो ग्रन्थे मनोहारिणि पञ्चमोऽङ्क ॥

इति पञ्चऽमोऽङ्क. ।

---

१ 'तथाविधे' २ 'अपनीय' ३ 'यथाज्ञापयति तात'.

षष्ठोऽङ्कः ।

(ततः प्रविश्यासनस्थो युधिष्ठिरो द्रौपदी चेटी पुरुषश्च ।)

युधिष्ठिरः—(विचिन्त्य निःश्वस्य च ।)

तीर्णे भीष्ममहोदधौ कथमपि द्रोणानले निर्वृते
कर्णाशीविषभोगिनि प्रशमिते शल्ये च याते दिवम् ।
भीमेन प्रियसाहसेन रभसात्स्वल्पावशेषे जये
सर्वे जीवितसंशये वयममी वाचा समारोपिताः ॥ १ ॥

द्रौपदी—(सबाष्पम् ।) महाराअ, पञ्चालिए त्ति किं ण भणिदम् । (क)

युधिष्ठिरः—कृष्णे, ननु मया । (पुरुषमवलोक्य ।) बुधक,

पुरुषः—देव, आज्ञापय ।

(क) महाराज, पाञ्चाल्येति किं न भणितम् ।

तीर्ण इति । तीर्णेऽतिक्रान्ते । निर्वृत उपशान्ते । आशी सर्पदंष्ट्रा तत्र विषं यस्य तादृशो यो भोगी सर्पस्तस्मिन् । 'आशीराश्यहिदंष्ट्रायाम्' इति शब्दभेदः । 'भोगः सुखे फण्यादिभृतावहेश्च फणकाययोः' इति विश्वः (अमरः) । यद्यप्यत्रैकपदेनैवापरं गतार्थं तथापि विषोत्बणविषधरज्ञापनार्थं तदुक्तम् । यद्वा । आश्या विषं यत्र भोगे शरीरे सोऽस्यास्तीत्याशीविषभोगी विषधर इति व्युत्पत्तिः । न चात्रापि गतार्थता । विशिष्टनाम्नो विवक्षाया अपर्यनुयोज्यत्वादिति दिक् । दिवं स्वर्गम् । स्वल्पावशेषेऽपि जये सति भीमेनामी सर्वे वयं वाचा प्रतिज्ञारूपया जीवितसंशयं समारोपिता इत्यन्वयः ॥ १ ॥ **द्रौपदीवाक्ये** । ण वदामि न पाञ्चाल्या वर्तितव्यम् । मया न वर्तितव्यमिति शेषः ॥ अपर्युषिता

---

१ 'केषुचित्पुस्तकेषु पुरुषशब्दस्थाने कञ्चुकिशब्दो वर्तते २ युधिष्ठिरः—(सचिन्तं निश्वस्य ।) कष्टं भोः कष्टम् । तीर्णे भीष्ममहार्णवे', 'युधिष्ठिरः—तीर्णे भीष्ममहोदधौ', 'युधिष्ठिरः—(विचिन्त्य निःश्वस्य च ।) तीर्णे भीष्ममहार्णवे' इति पाठान्तराणि ३ 'शल्येऽपि याते दिवम्' इति दशरूपके पाठः ४ 'अल्पावशेषे', 'अल्पावशिष्टे' ५ 'वाचा समारोपिता' इत्यसादनन्तरं केचित् '(पुरुषमवलोक्य ।) भद्र बुधक, 'उच्यतां सहदेवो यथा' इति पठन्ति ६ 'महाराअ' इति क्वचिन्नास्ति ७ 'भणासि' ८ 'देव' इति क्वचिन्नास्ति

युधिष्ठिरः—उच्यता सहदेव —'क्रुद्धस्य वृकोदरस्यापर्युषिता[1] प्रतिज्ञामुपलभ्य प्रणष्टस्य मानिन कौरवराजस्य[2] पदवीमन्वेष्टुमतिनिपुणमतयस्तेषु तेषु स्थानेषु[3] परमार्थाभिज्ञाश्चरा[4] सुसचिवाश्च[5] भक्तिमन्त पटुपटहरवव्यक्तघोषणा[6] सुयोधनसचारवेदिन[7] प्रतिश्रुतधनपूजाप्रत्युपक्रियाश्चरन्तु समन्तात्[8]समन्तपञ्चकम् । अपि च ।

पङ्के[9] वा सैकते[10] वा सुनिभृतपदवीवेदिनो यान्तु दाशा[11]
कक्षेषु क्षुण्णवीरुन्निचयपरिचया बल्लवा[12] सचरन्तु ।
नागव्याघ्राटवीषु श्वपचपुरविदो[13] ये च रन्ध्रेष्वभिज्ञा
ये सिद्धव्यञ्जना वा प्रतिमुनिनिलय तेषु चाराश्चरन्तु ॥२॥'

नान्यदिनगामिनीम् । प्रणष्टस्य गुप्तस्य । पटुपटहघोषणा निपुण पटह वादयन्त । प्रसिद्धार्थमिदम् । प्रतिश्रुताङ्गीकृता महत्तधनादीना प्रत्युपक्रिया यैस्ते तथा । समन्तपञ्चक देशभेद । **पङ्क इति** । पङ्के कर्दमे । सैकत वालुकामयम् । सुनिभृतपदवी गुप्तपद्धति । 'कैवर्ते दाशधीवरौ' इत्यमर । कक्ष कच्छाली । वीरुन्निचयो लतासघस्तस्य परिचयो ज्ञान येषा ते । बल्लवा गोपा । नागव्याघ्रप्रधाना अटव्यो वनानि । तासु श्वपचपुरविदश्चाण्डालपुरवेदिन सचरन्तु । नागो हस्ती । 'निषादश्वपचावन्तेवासिचाण्डालपुक्कसा' इत्यमर । रन्ध्रेषु परच्छिद्रेषु । सिद्धव्यञ्जना सिद्धपुरुषचिह्नवन्त । चरा एव चारा । प्रज्ञादित्वात्स्वार्थेऽण् । तथा च यत्र

---

१ 'दारुणा प्रतिज्ञामुपलभ्य', 'अपर्युषितदारुणा प्रतिज्ञामुपलभ्य', 'अपर्युषिता प्रतिज्ञा दारुणामुपश्रुत्य' इति पाठान्तराणि २ 'कौरवनाथस्य' ३ 'ईक्षितु' ४ 'स्थानान्तरेषु' ५ 'परमार्थाभिज्ञाश्चरा मन्त्रिणश्च', 'यथार्थाभिज्ञाश्चरा सुसचिवाश्च', 'यथार्थाभिज्ञश्च सुसचिवाश्च', 'यथार्थाभिज्ञा सुसचिवाश्च', 'यथार्थाभिज्ञाश्चारा सचरन्तु । सुसचिवाश्च' इति पाठान्तराणि ६ 'पटुपटहघोषणा' इति जगद्धरसमादृत पाठ ७ 'सुयोधनपदसचारवेदिन' इति बहुपुस्तकाना पाठ ८ 'समन्तात्' इति क्वचिन्नास्ति ९ 'पङ्के वा सैकते वाप्सु च परपदवीवेदिन' इति क्वचित्पाठ १० 'दासा' ११ 'कुञ्जेष्वाक्रान्तवीरुन्निचयपरिचया', 'कुञ्जेष्वाक्रान्तवीरुन्निकरपरिचया', 'कुञ्जेषु क्षुण्णवीरुन्निचयपरिचया' १२ 'नागव्याघ्राटवीषु स्वपरपदविदो ब्रह्मदेशे च सस्था', 'व्याधा व्याघ्राटवीषु स्वपदपरविदो ये च रन्ध्रेष्वभिज्ञा' इति पाठौ १३ 'ये सिद्धव्यञ्जना वा प्रतिमुनिनिलय ते च चाराश्चरन्तु' इति पाठ

पुरुषः—[1]यथाज्ञापयति देव ।

युधिष्ठिरः—तिष्ठ । एव च वक्तव्य· सहदेव ।

[2]ज्ञेया रह शङ्कितमालपन्त
सुप्ता [3]रुगार्ता मदिराविधेया ।
त्रासो मृगाणा वयसा विरावो
नृपाङ्कपादप्रतिमाश्च [4]यत्र ॥ ३ ॥

[5]पुरुषः—यदाज्ञापयति देव । (इति निष्क्रम्य पुन प्रविश्य सहर्षम् ।) देव पाञ्चालक प्राप्त ।

युधिष्ठिरः—त्वरित प्रवेशय ।

पुरुषः—(निष्क्रम्य पाञ्चालकेन सह प्रविश्य ।) **एष देव** । उपसर्पतु पाञ्चालक ।

पाञ्चालकः—जयतु जयतु देव । प्रियमावेदयामि महाराजाय देव्यै च ।

युधिष्ठिरः—[6]पाञ्चालक, [7]कच्चिदासादिता तस्य दुरात्मन कौरवाधमस्य पदवी ।

ये निपुणास्त्र ते गच्छन्तिति भाव ॥ २ ॥ **ज्ञेया इति** । रह एकान्ते । शङ्कित शङ्कास्पदमालपन्तो जना ज्ञेया । एव सुप्तादिष्वपि ज्ञेया इत्यनेनान्वय । मदिराविधेया मत्ता । नृपाङ्को राजचिह्न मत्स्यादि यत्र पादप्रतिमाया ताश्च यत्र तानि ज्ञेयानीत्यन्वय । 'वय पक्षिणि बाल्ये च' इति विश्व । प्रतिमा प्रतिकृति ॥ ३ ॥

---

१ 'यदाज्ञापयति देव' २ 'युधिष्ठिर —तिष्ठ । इदमपर वक्तव्य सहदेव', 'युधिष्ठिर —एव वक्तव्य सहदेव' इति पाठौ ३ 'रुगाताश्च वने विचेया' इति बहव ४ 'शत्रो' ५ 'कञ्चुकी—यथाज्ञापयति देव । (इति निष्क्रम्य पुन प्रविश्य सहर्षम् ।) देव, पाञ्चालक प्राप्त । युधि०—त्वरित प्रवेशय । कञ्चुकी—(निष्क्रम्य पाञ्चालकेन सह प्रविश्य ।) एष देव । उपसर्पतु । पाञ्चा० जयतु जयतु देव । प्रियमावेदयामि महाराजाय देव्यै च ।', 'पुरुष —यथाज्ञापयसि । (इति निष्क्रान्त ।) पाञ्चा०—(प्रविश्य ।) प्रियमावेदयामि महाराजाय देव्यै च' इति पाठौ ६ 'भद्र पाञ्चालक' ७ 'कच्चिदासादिता तस्य दुरात्मन कौरवापसदस्य पदवी', 'कच्चिदासादिता तस्य कौरवाधमस्य पदवी', 'कचिदासादिता तस्य दुरात्मन पदवी' इति पाठान्तराणि

पाञ्चालकः—[1]न केवल पदवी । स [2]एव दुरात्मा [3]देवीकेश-पाशस्पर्शपातकप्रधानहेतुरुपलब्ध ।

युधिष्ठिरः—साधु । भद्र, प्रियमावेदितम् । अथ दर्शनगोचर गत ।

पाञ्चालकः—देव, समरगोचर पृच्छ ।

द्रौपदी—(सभयम् ।) कह समरगोअरो वट्टइ मे णाहो । (क)

युधिष्ठिरः—(साशङ्कम् ।) सत्य समरगोचरो मे वत्स ।

पाञ्चालकः—सत्यम् । किमन्यथा वक्ष्यते महाराजाय ।

युधिष्ठिरः—

त्रस्त विनापि विषयादुरुविक्रमस्य
चेतो विवेकपरिमन्थरता प्रयानि ।

(क) कथ समरगोचरो वर्तते मे नाथ ।

प्रधानहेतुर्मुख्यनिमित्तम् ॥ अथ प्रश्ने ॥ **द्रौपदीवाक्ये** । कथ समरगोचरो वर्तते मे नाथ ॥ **त्रस्तमिति** । प्रियस्य चेतो विवेकमान्द्यमुपैति । कीदृशम् । विषयात्रासहेतोर्विनापि त्रस्तमिति वस्तुस्थिति । प्रकृते ता योजयति—जानामीति । परिशङ्कित सावधानम् । विषयादिति विनायोगे पञ्चमी । 'भ्रातुर्विनापि विजयादुरुविक्रमस्य' इति पाठे मम चेतो विवेकपरिमन्थरतामुपैत्युरु

---

१ 'देव, न केवल पदवी' इति बहव २ 'अपि' ३ 'देवीकेशाम्बराकर्षणमहापातकप्रधानहेतु', 'देवीकेशस्पर्शमहापातकप्रधानहेतु' इति पाठौ ४ 'युधिष्ठिर —(सहर्षं पाञ्चालक परिष्वज्य ।) साधु भद्र, साधु । भवता प्रियमावेदितम् । अपि दर्शनगोचर गत', 'युधिष्ठिर —साधु भद्र, साधु । भवता प्रियमावेदितम् । अपि दर्शनगोचर गत', 'युधिष्ठिर —(सहर्षं परिष्वज्य पारितोषिक भूषण प्रयच्छति ।) साधु भद्र, साधु । भवता प्रियमावेदितम् । अपि दर्शनगोचर गत', 'युधिष्ठिर —(सहर्षं पाञ्चालक परिष्वज्य ।) साधु भद्र, प्रियमावेदितम् । अथ दर्शनगोचर गत', 'युधिष्ठिर —साधु भद्र, प्रियमावेदित मे । दर्शनगोचर गत' इति नानाविध पाठ ५ 'द्रौपदी—(साशङ्कम् ।) कह समरगोअरे वट्टइ मे णाहो' इति पाठ ६ 'युधिष्ठिर —(साशङ्कम् ।) भ्रातुर्विनापि विजयादुरुविक्रमस्य' इति पाठ

जानामि चोद्धतगदस्य[1] वृकोदरस्य
सारं रणेषु भुजयो[2] परिशङ्कितं[3] वा ॥ ४ ॥

(द्रौपदीमवलोक्य ।) अयि सुक्षत्रिये,

गुरूणा बन्धूना क्षितिपतिसहस्रस्य च पुर
पुराभूदस्माकं नृपसदसि योऽयं परिभव ।
प्रिये प्रायस्तस्य द्वितयमपि पारं गमयति[5]
क्षयं प्राणाना नः[6] कुरुपतिपशोर्वार्द्ध निधनम्[7] ॥ ५ ॥

अथवा[8] कृत सदेहेन[9] ।

नून तेनाद्य वीरेण प्रतिज्ञाभङ्गभीरुणा ।
बध्यते केशपाशस्ते स चास्यां[10] कर्षणक्षम ॥ ६ ॥

पाञ्चालक[11], कथय कथय कथमुपलब्ध स दुरात्मा कस्मिन्नुद्देशे किं वाधुना प्रवृत्तमिति ।

द्रौपदी—भद्र[12], कहेहि कहेहि । (क)

(क) भद्र, कथय कथय ।

विक्रमस्य भ्रातुर्विजयाद्विनापि । शत्रुणा यद्यपि मम भ्राता न जितस्तथापि स्नेहान्मम चित्तमान्द्यमित्यर्थ ॥ ४ ॥ **गुरूणामिति** । हे प्रिये, तस्य परिभवस्य द्वितयमेव कर्म पार गमयति । अपिरेवार्थे । तदेवाह—क्षय इति । नोऽस्माक प्राणविनाश कुरुपतिपशो प्राणविनाशो वा । तदुभयमित्यर्थ ॥ ५ ॥ **नूनमिति** । बध्यत इति बन्धयितव्यो नाश्यते च । 'बन्ध बन्धने' । 'वध हिंसायाम्' इत्येतयो रूपम् ॥ ६ ॥ **द्रौपदीवाक्ये** । भद्र, कथय ॥

---

१ 'उद्धतगदस्य' २ 'विजये' ३ 'परिशङ्कितश्च' ४ 'द्रौपदीमवलोक्य मुखादस्या बाष्पमपनयति ।)', '(द्रौपदीमवलोक्य मुखादस्या बाष्प नयति ।)' इति पाठौ ५ 'प्रेय' ६ 'गमयितु', 'गमयतु' ७ 'वा' ८ 'तस्य निधनम्', 'वापि समरे' ९ 'अथवानास्पद एव सदेह' इति पाठ १० 'आकर्षणे क्षम', 'आकर्षणे प्रभु', 'आकर्षणप्रभु' ११ 'पाञ्चालक, कथय कथय कथमुपलब्ध स दुरात्मा कस्मिन्नुद्देशे, किमधुना प्रवृत्तमिति', 'पाञ्चालक, कथमुपलब्ध कस्मिन्नुद्देशे किमधुना प्रवृत्तं कथय' इति पाठौ १२ 'भद्र' इति क्वचिन्नास्ति.

पाश्वालकः—शृणोतु देवो देवी च । अस्तीह देवेन हते [1]मद्राधिपतौ शल्ये [2]गान्धारराजकुलशलभे सहदेवशस्त्रानल प्रविष्टे सेनापतिनिधननिरा[3]क्रन्दविरलयोधोज्झितासु समरभूमिषु रि[4]पुबलपराजयोद्धतवल्गितविचित्रपराक्रमासादितविमुखारातिचक्रासु धृष्टद्युम्नाधिष्ठितासु च युष्मत्सेनासु प्रनष्टेषु कृपकृतवर्माश्वत्थाम्सु तथा दारुणामपर्युषिता प्रतिज्ञामुपलभ्य कु[5]मारवृकोदरस्य न ज्ञायते क्वापि प्रलीन स दुरात्मा कौरवाधम ।

युधिष्ठिरः—ततस्तत ।

द्रौप[6]दी—अयि, परदो कहेहि । (क)

पाश्वालकः—अवधत्ता देवो देवी च । ततश्च भगवता वासुदेवेनाधिष्ठितमेकरथमारूढौ कु[7]मारभीमार्जुनौ समन्तात्समन्तपञ्चक पर्यटितुमारब्धौ तमनासादितवन्तौ च । अनन्तर [8]तैर्मनुशोचति मादृशे भृत्यवर्गे दीर्घमुष्ण च निश्व[9]सति कुमारे बीभत्सौ जलधरसमयनिशाम[10]ना-

---

(क) अयि, परत कथय ।

निराक्रन्दोऽतिरुदन् । वल्गित गतिविशेष । आसादित आक्रान्त । तथा दारुणा प्रतिज्ञापूरणाभावे निजवधरूपाम् ॥ **द्रौपदीवाक्ये** । अयि, इत परत कथय ॥ पर्यटितु भ्रमितुम् । 'खद्योतो ज्योतिरिङ्गण' इत्यमर । पि-

---

१ 'मद्राधिपे', 'मद्रपतौ' २ 'गान्धारराजशलभकुले सहदेवानल प्रविष्टे', सहदेवशस्त्रानलमनुप्रविष्टे गान्धारराजशलभे', 'गान्धारराजकुलशलभे सहदेवानल प्रविष्टे' इति पाठान्तराणि ३ 'निरानन्द–', 'नराक्रन्द–' ४ 'रिपुपराजयोद्धतवेल्लितविचित्र–', 'रिपुपराजयोद्धतचलितविचित्र–' ५ 'दारुणा प्रतिज्ञामुपलभ्य', 'दारुणामपर्युषिता च प्रतिज्ञामुपलभ्य' इति पाठौ ६ 'वृकोदरस्य' ७ 'द्रौपदी—'अग्गदो कहेहि' इति बहुपुस्तकाना पाठ ८ 'वासुदेवेनाधिष्ठितावेकरथारूढौ कुमारभीमार्जुनौ समन्तात्समन्तपञ्चक पर्यटितुमारब्धौ न चासादितवन्तौ तम्', 'वासुदेवेनाधिष्ठितमेकरथमारूढौ कुमारभीमार्जुनौ वय च समन्तात्समन्तपञ्चक पर्यटितुमारब्धास्तमनार्थमनासादितवन्तश्च' इति पाठौ ९ 'अनन्तर च'. १० 'निश्वसति कुमारबीभत्सौ', 'निश्वसति बन्धुवर्गे'

रितखद्योतप्रकरपिङ्गलै कटाक्षैरादीपयति गदा वृकोदरे यत्किंचनकारितामधिक्षिपति विधेर्भगवति नारायणे कश्चित्सविदित कुमारस्य मारुतेरुज्झितमासभार प्रत्यग्रविशसितमृगलोहितचरणनिवसनस्त्वरमाणोऽन्तिकमुपेत्य पुरुष श्वासग्रस्तार्धश्रुतवर्णानुमेयपदया वाचा कथितवान्—'असिन्महतोऽस्य सरसस्तीरे द्वे पदपद्धती समवतीर्णप्रतिबिम्बे। तयोरेका स्थलमुत्तीर्णा न द्वितीया। परत्र कुमार प्रमाणम्' इति। तत ससम्भ्रम प्रस्थिता सर्वे वय तमेव पुरस्कृत्य गत्वा च सरस्तीर परिज्ञायमानसुयोधनपदलाञ्छना पदवीमासाद्य भगवता वासुदेवेनोक्तम्—भो वीर वृकोदर, जानाति किल सुयोधन सलिलस्तम्भनी विद्याम्। तन्नून तेन त्वद्भयात्सरसीमेनामधिशयितेन भवितव्यम्।' एतच्च वचन-

---

ङ्गला कपिशा। आदीपयत्युद्द्योतयति सति। यत्किंचित्कारिता यत्र तत्रानुसधानादिक प्रतिषेधयति। सविदित ख्यात पुरुष। कुमारमारुतेरन्तिकमुपेत्य वाचा कथितवानित्यन्वय। लोहित रक्तम्। श्वासग्रस्तोऽर्धश्रुतो यो वर्णोऽक्षर तेनानुमेय पद यस्यास्तया। समवतीर्ण उद्दिष्ट प्रतिबिम्बोऽनुकृतिर्ययोस्ते तथा। प्रमाणमग्रिमतर्के कुमार एव कर्तेत्यर्थ। सरसीमिति 'अधिशीङ्स्थासा कर्म' इत्याधारे कर्म।

---

१ 'तडित्प्रकरपिङ्गलै' २ 'नाथे वृकोदरे यत्किंचनकारिता च विक्षिपति भगवति नारायणे' इति पाठ ३ 'मृगालोहितचरणनिवसन', 'मृगलोहितलोहितचरणनिवसन' ४ 'असदन्तिक' ५ 'परुषश्वासग्रस्तार्धश्रुतवर्णानुमेयपदया वाचा कथितवान्', 'श्वासग्रस्तार्धश्रुतवर्णानुमेयसमुदाचार कथितवान्' इति पाठौ ६ 'देव कुमार, असिन्महतोऽस्य सरसस्तीरे द्वे पदपद्धती जलमवतीर्णे। तयोरेका स्थलमुत्तीर्णा न द्वितीया लक्षिता', 'देव कुमार, असिन्महतोऽस्य सरस्तीरे द्वे पद्धती समवतीर्णपदप्रतिबिम्बे। तयोरेका जलोत्तीर्णा न द्वितीया', 'तिष्ठतो महतोऽस्य सरसस्तीरे द्वे पद्धती समवतीर्णप्रतिबिम्बे तयोरेका जलोत्तीर्णा न द्वितीया' इति पाठान्तराणि ७ 'तमेव पुरुष पुरस्कृत्य सरसस्तीरम्। परिज्ञाय सुयोधनपदलाञ्छिता पदवीं कथित भगवता वासुदेवेन। वृकोदर, जानाति किल सुयोधन सलिलस्तम्भनीं विद्याम्। नून तेन त्वद्भयात्', 'तमेव पुरस्कृत्य गत्वा च सरस्तीर परिज्ञाय सुयोधनपदलाञ्छिता पदवीमासाद्य भगवता वासुदेवेनोक्तम्। भो वृकोदर, जानाति किल सुयोधन सलिलस्तम्भिनीं विद्याम्। नून तेन त्वद्भयात्' इति पाठौ

मुपश्रुत्य रामानुजस्य सकलदिङ्मिकुञ्जपूरितातिरिक्तमुद्भ्रान्तसलिल-चरशकुन्तकुल त्रासोद्धतनक्रग्राहमालोड्य सर सलिल भैरवं च गर्जित्वा कुमारवृकोदरेणाभिहितम्—अरे रे वृथाप्रख्यापितालीक-पौरुषाभिमानिन्, पाञ्चालराजतनयाकेशाम्बराकर्षणमहापातकिन्,

जन्मेन्दोरमले कुले व्यपदिशस्यद्यापि धत्से गदा
मा दु शासनकोष्णशोणितसुराक्षीव रिपु भाषसे ।
दर्पान्धो मधुकैटभद्विषि हरावप्युद्धत चेष्टसे
मैत्रासान्नृपशो विहाय समर पङ्केऽधुना लीयसे ॥ ७ ॥

अपि च । भो मानान्ध,

पाञ्चाल्या मन्युवह्निं स्फुटमुपशमितप्राय एव प्रसह्य
व्यासक्तै. केशपाशैर्हतपतिषु मया कौरवान्त पुरेषु ।

रामानुज कृष्ण । शकुन्त पक्षी । नक्रो जलजन्तुभेद । ग्राहो 'गोह' इति प्रसिद्ध **जन्मेति** । क्षीब मत्तम् । नृपशो जनाधम । इह क्षतिनामावमर्शसधि । यदाह—'अधिक्षेपोक्ति क्षतिर्मता' इति ॥ ७ ॥ **पाञ्चाल्या इति** । कौरवान्त-पुरेषु मया हतपतिषु सत्सु तदीयकेशपाशैर्व्यासक्तै सबद्धैर्द्रौपद्या मन्युवह्निरुपशमित

---

१ 'रामानुजस्य सकलनिकुञ्जपूरिताशातिरिक्तमुद्भ्रान्तसलिलचरशतसकुल त्रासोद्वृत्तनक्रग्राहमालोड्य सर सलिल भैरव च गर्जित्वा', 'बलानुजस्य सकलदिक्प्रपूरितातिरिक्तमुद्भ्रान्तसकलसलिलचारिचक्र त्रासोद्धतनक्रमालोडितसर-सलिल भैरव च गर्जित्वा', 'बलानुजस्य सकलदिक्प्रपूरितातिरिक्तमुद्भ्रान्तसकलसलिलचारिचक्र त्रासोद्धतनक्रमालोडित सर सलिल भैरवं च गर्जित्वा', 'बलानुजस्य सकलदिङ्मिकुञ्जपूरितातिरिक्तमुद्भ्रान्तसकलसलिलचरशकुन्तकुल त्रासोद्भ्रान्तमत्स्यग्राहमालोडित सर सलिलमतिभैरव गर्जित्वा' इति पाठान्तराणि २ 'अरे रे' इत्यसादारभ्य 'महापातकिन्' इत्यन्त क्वचिन्नास्ति ३ 'पाञ्चालराजतनयाकेशाम्बराकर्षणमहापातकिन्, धार्तराष्ट्रापसद', 'पाञ्चालराजतनयाकेशाम्बराकर्षण, महापातकिन्, धार्तराष्ट्रापसद', 'द्रुपदसुताकेशाम्बराकर्षणमहापातकिन्' इति पाठान्तराणि ४ 'विमले' इति बहव ५ 'मधुक्षीव रिपु मन्यसे' इति पाठ ६ 'त्रासान्मे' इति दर्पणकृत पाठ ७. 'मानान्ध, कौरवाधम' इति बहुपुस्तकाना पाठ ८ 'क्रोधवह्नि.'. ९ 'एष प्रसह्य' १० 'व्यामुक्तै', 'प्रोन्मुक्तै'

भ्रातुर्दुःशासनस्य स्रवदसृग्गुरसः पीयमान निरीक्ष्य
क्रोधार्त्किं भीमसेने विहितमसमये यत्त्वयास्तोऽभिमानः ॥८॥

द्रौपदी—णाह, अवणीदो मे मण्णु जइ पुणो वि सुलहं दंसणं भविस्सदि । (क)

युधिष्ठिरः—कृष्णे, नामङ्गलानि व्याहर्तुमर्हस्यस्मिन्काले । भद्र, ततस्तत ।

पाञ्चालकः—[2]ततश्चैव भाषमाणेन वृकोदरेणावतीर्य क्रोधोद्धत गदापरिघपाणिना सहसैवोल्लङ्घिततीरमुत्सन्ननलिनीवनमपविद्धमूर्च्छितग्राहमुद्भ्रान्तमत्स्यशकुन्तमतिभैरवारवभ्रमितवारिसञ्चयमायतमपि तत्सरः समन्तादालोडितम् ।

युधिष्ठिरः—[3]भद्र, तथापि किं नोत्थित ।

पाञ्चालकः—[4]देवें,

(क) नाथ, अपनीतो मे मन्युर्यदि पुनरपि सुलभ दर्शन भविष्यति ।

प्राय एवेत्यन्वय । दुःशासनवक्षस स्रवद्रक्त मया पीयमानमालोक्य त्वया मयि भीमसेने किं विहित यदकाल एव मानोऽस्तस्त्वया इदानीं स कर्तुमर्हतीति भाव ॥ ८ ॥ **द्रौपदीवाक्ये** । अपनीतो नाथेन मम मन्युर्यदि पुनरपि सुलभदर्शन स भविष्यति ॥ परिघोऽर्गलेऽपि । 'परिघ परिघातन' इत्यमर । वृकोदरेण सँर आलोडितमित्यन्वय । उल्लङ्घितमतिक्रान्तम् । अपविद्ध परित्यक्त । आयत दी-

---

१ 'असिन्काले' इति क्वचिन्नास्ति २ 'देव, ततश्चैव भाषमाणेन वृकोदरेणावतीर्य क्रोधोद्धत भ्रमितभीषणगदापरिघपाणिना सहसैवोल्लङ्घिततीरमुत्सन्नफुल्लनलिनीवनमाविद्धमूर्च्छितग्राहमुद्भ्रान्तमत्स्यशकुन्तमतिभैरवारववेगभ्रमितवारिसञ्चयमायतमपि तत्सरं समन्तादालोडितम् ।', 'देव, ततश्चैव भाषमाणेन वृकोदरेण वीर्यक्रोधोद्धतभ्रमितभीषणगदापाणिना सहसैवोल्लङ्घिततीरमुत्सन्ननलिनमाविद्धमूर्च्छितग्राहमुद्भ्रान्तसमस्त शकुन्तमतिभैरव वेगभ्रमितवारिसञ्चयमायतमपि सर समन्तादवलोडितम् ।', 'ततश्चैव भाषमाणेन वृकोदरेण वीर्यक्रोधोद्धतभीमगदापाणिना सहसोल्लासिततीरमुत्सन्ननलिनमाविद्धमूर्च्छितग्राहमुद्भ्रान्तसमस्तशकुन्तमतिभैरव वेगभ्रमितवारिसञ्चयमायतमपि सर समन्तादवलोडितम् ।' इति पाठान्तराणि ३ 'युधि०—भद्र, तथापि नोत्थित.', 'युधि०—तथापि नोत्थित' इति पाठौ ४ 'देव, कथ नोत्थित' इति बहव..

त्यक्त्वोत्थित. सरभस [1]सलिल सलील-
मुद्भूतकोपदहनोग्रविषस्फुलिङ्ग· ।
[2]आयस्तभीमभुजमन्दरवेल्लनाभि
[3]क्षीरोदधे सुमथनादिव कालकूट ॥ ९ ॥

युधिष्ठिरः—साधु [4]सुक्षत्रिय, साधु ।

द्रौपदी—पडिवण्णो [5]समरो ण वा । (क)

पाश्वालकः—उत्थाय च [6]तस्मात्सलिलाशयात्करयुगलोत्तम्भित-तोरणीकृतभीमगद. कथयति स्म—'[7]अरे रे मारुते, कि भयेन प्रलीन दुर्योधन मन्यते भवान् । मूढ, [8]अनिहतपाण्डुपुत्र प्रकाश लज्जमानो विश्रमितुमध्यवसितवानसि पातालम् ।' [9][10]एव चोक्ते वासुदेवकिरीटिभ्या द्वावप्यन्त· सलिल निषिद्धसमरारम्भौ [11][12]स्थलमुत्तारितौ । आसी-

(क) प्रतिपन्न समरो न वा ।

र्धम् ॥ **त्यक्त्वेति** । सलील सहेलम् । कालकूटो विषम् । दुर्योधनकालकूटयो साम्यमाह—उद्भूतेति । उद्भूतो य कोपाग्नि स एवोग्रविषस्य स्फुलिङ्गो यत्र स तथा । आयस्त क्षिप्त । वेल्लना चालनम् ॥ ९ ॥ **द्रौपदी वाक्ये** । प्रतिपन्न समरो न वा । अत्र प्रतिपन्नो लभ ॥ उत्तम्भितो त्तोलितात एव तोरणसदृशी कृता गदा येन स तथा । कलेवर

१ 'सलिल सलीलमुद्भान्तकोपदहनोग्रविषस्फुलिङ्ग'; 'सरस. समूलमुद्भूतकोपदहनो विषविस्फुलिङ्गः'; 'सरस समूलमुद्भान्तकोपदहनोग्रविषस्फुलिङ्ग' २ 'आयत्त–' ३ 'क्षीराम्बुधे सुमथितादिव', 'क्षीरोदधिप्रमथनादिव' ४ 'महाक्षत्रिय' ५ 'समरे', 'स समरो' ६ 'असात्' ७ 'घोरगद' ८ 'मारुते, किं भवतो भयेन प्रलीन दुर्योधन समर्थयसे', 'मारुते, किं भवतो भयेन प्रलीन दुर्योधन कथयसि' इति पाठौ ९ 'अनभिहतपाण्डुपुत्र' १० 'विश्रामार्थमध्यवसितवानसि पातालम् ।', 'विश्रान्तिमध्यवसितवानहमसि । अतोऽलमलम् ।' इति पाठौ ११ 'एव चोक्तवति', 'एव चोक्त' १२ 'निषिद्धसमरसमारम्भौ स्थलमुत्तारितौ भीमसुयोधनौ', 'निषिद्धसमरसमारम्भौ तीरमुत्तारितौ भीमसुयोधनौ', 'निषिद्धसमरसमारम्भौ भीमसुयोधनौ' इति पाठान्तराणि

नश्च कौरवराज क्षितितले गदां निक्षिप्य विशीर्णरथसहस्र निहतकुरुसहस्रगजवाजिनरसहस्रकलेवरसमर्दसपतद्गृध्रकङ्कजम्बुकमस्मद्वीरमुक्तसिंहनादमपमित्रबान्धवमकौरव रणस्थानमवलोक्यायतमुष्णं च निश्वसितवान्। ततश्च वृकोदरेणाभिहितम्—अयि भो कौरवराज, कृत बन्धुनाशदर्शनमन्युना। मैव विषाद कृथा पर्याप्ता पाण्डवा समरायाहमसहाय इति।

पञ्चाना मन्यसेऽस्माक य सुयोध सुयोधन।
दर्शितस्यात्तशस्त्रस्य तेन तेऽस्तु रणोत्सव ॥ १० ॥

इत्थं श्रुत्वासूयान्विता दृष्टिं कुमारयोर्निक्षिप्योक्तवान्धार्तराष्ट्र।

कर्णदु शासनवधात्तुल्यावेव युवा मम।
अप्रियोऽपि प्रियो योद्धु त्वमेव प्रियसाहस ॥ ११ ॥

शरीरम्। जम्बूक शृगाल। पर्याप्ता आगता। **पञ्चानामिति**। अस्माक मध्ये। दर्शितस्य कृतसन्नाहस्य। तेन सह तव रणोत्सवोस्त्विति सबन्ध। तेनेति सहार्थे तृतीया ॥ १० ॥ कुमारयोर्भीमार्जुनयो। **कर्णेति**। हे भीम, त्वमेव योद्धु प्रिय। कीदृश। अमित्र साहसी च ॥ ११ ॥

---

१ 'विशीर्णरथसहस्र' इति क्वचिन्नास्ति २ 'निहतकुरुशतगजवाजिनरशतकलेवरसमर्दसपतितगृध्रकङ्कजम्बुकमुत्सन्नसुयोधनबलमस्मद्वीरमुक्तसिंहनादसवलितस्मरतूर्यमबान्धवममित्रबान्धव कौरवसङ्ग्रामस्थानमवलोक्यायतमुष्ण च नि श्वसितवान्','निहतकुरुशतगजवाजिनरकलेवरसपतद्गृध्रकङ्कजम्बुकमुत्सन्नयोधमस्मद्वीरविमुक्तसिंहनादसवलितस्मरतूर्यमबान्धवममित्रमकौरव रणस्थानमालोक्य दीघमुष्ण च नि श्वसितवान्' इति पाठौ ३ 'कृकोदरेणोपगम्याभिहितम्' ४ 'भो भो कौरवराज', 'भो कौरवराज' ५ 'कृत बन्धुजननाशजेन मन्युना', 'कृत ब धुजनमन्युना', 'अल बन्धुजनमन्युना', 'कृत बन्धुजननाशमन्युना', 'कृत बन्धुनाशदर्शनजातमन्युना' ६. 'विपाद मा कृथा' ७ 'पाण्डवा सोऽहमसहाय इति। कि च' इति बहुपुस्तकाना पाठ ८ 'वर्मितस्य' ९ 'मते' १० 'इत्थ च श्रुत्वा किचिदश्रुपातान्विता दृष्टिं कुमारयोर्निक्षिप्योक्तवान्।' इति बहुपुस्तकाना पाठ, 'इत्थ श्रुत्वासूयात्मिका निक्षिप्य कुमार योर्दृष्टिमुक्तवान्धार्तराष्ट्र।' इति दशरूपके पाठ ११ 'त्वमेक'

इत्युत्थाय च परस्परक्रोधाधिक्षेपपरुषवाक्कलहप्रस्तावितघोरसङ्ग्रामौ विचित्रविभ्रमभ्रमितगदापरिभासुरभुजदण्डौ मण्डलैर्विचरितुमारब्धौ भीमदुर्योधनौ । अह च देवेन चक्रपाणिना देवसकाशमनुप्रेषित । आह च देवो देवकीनन्दन । अपर्युषितप्रतिज्ञे च मारुतौ प्रणष्टे कौरवराजे महानासीन्नो विषाद । सम्प्रति पुनर्भीमसेनेनासादिते सुयोधने निष्कण्टकीभूत भुवनतल परिकलयतु भवान् । अभ्युदयोचिताश्चानवरत प्रवर्त्यन्ता समारम्भा । कृत सदेहेन ।

पूर्यन्ता सलिलेन रत्नकलशा राज्याभिषेकाय ते
कृष्णात्यन्तचिरोज्झिते च कबरीबन्धे करोतु क्षणम् ।
रामे शातकुठारभासुरकरे क्षत्रद्रुमोच्छेदिनि
क्रोधान्धे च वृकोदरे परिपतत्याजौ कुत सशय ॥ १२ ॥

द्रौपदी—(सबाष्पम् ।) ज देवो त्तिहुअणणाहो भणादि त कह अण्णहा भविस्सदि । (क)

(क) यद्देवस्त्रिभुवननाथो भणति तत्कथमन्यथा भविष्यति ।

विभ्रमो विलास । मण्डल करणविशेष । प्रणष्टेऽदृष्टे । समारम्भा मङ्गलादिक्रिया । **पूर्यन्तामिति** । कबरी केशवेश । 'क्षणो मुहूर्तोत्सवयो' इति शाश्वत । कबरीबन्ध इति निमित्तसप्तमी । रामे परशुरामे । शात निश्चितम् । परिपतति गच्छति सति ॥ १२ ॥ **द्रौपदीवाक्ये** । यद्देवस्त्रिभुवननाथो भणति तत्कथमन्यथा भविष्यति ॥ 'आज्ञा निदेश आदेश' इत्य-

---

१ 'च' इति क्वचिन्नास्ति २ 'परस्परक्रोधाक्षेपपरुषवाक्कलहप्रसारितघोरसङ्ग्रामौ', 'परस्पराक्षेपप्रवर्तितघोरसङ्ग्रामौ' ३ चित्रगदापरिभासुरभुजभरौ मण्डलैर्विहर्तुमारब्धौ भीमदुर्योधनौ', 'चिरभ्रमितगदापरिघभासुरभुजपञ्जरौ मण्डलैश्चरितुमारब्धौ भीमदुर्योधनौ' इति पाठौ ४ 'अह च चक्रपाणिना', 'अत्रान्तरेऽह च देवेन चक्रपाणिना' ५ 'पुनर्भीमसेनेन समासादिते सुयोधने निष्कण्टकीकृत भुवनतल परिकलयतु भवान्', 'पुनरस्मिन्दुरात्मनि सुयोधने भीमसेनेनासादिते निष्कण्टकीभूत भुवनतल परिकलयतु भवान्' इति पाठौ ६ 'च प्रवर्त्यन्तामनवरतमङ्गलसमारम्भा', 'चानवरत प्रवर्त्यन्ता मङ्गलसमारम्भा' इति पाठौ ७ 'राज्येऽभिषेकाय' ८ घोर कुठारभासुरकरे क्षत्रद्रुमच्छेदिनि' इति बहव पठन्ति ९ 'आणवेदि'

पाञ्चालकः—नं केवलमियमाशी । असुरनिषूदनस्यादेशोऽपि ।

युधिष्ठिरः—को हि नाम भगवता सदिष्ट विकल्पयति । क कोऽत्र भो ।

(प्रविश्य)

कञ्चुकी—आज्ञापयतु देव ।

युधिष्ठिरः—देवस्य देवकीनन्दनस्य बहुमानाद्वत्सस्य मे विजय-मङ्गलाय प्रवर्त्यन्ता तदुचिता समारम्भा ।

कञ्चुकी—यथाज्ञापयति देव । (सोत्साह परिक्रम्य ।) भो सविधातृणा पुरःसरा, यथाप्रधानमन्तर्वेश्मिका दौवारिकाश्च, एष खलु भुजबलपरिक्षेपोत्तीर्णकौरवपरिभवसागरस्य निर्व्यूढदुर्वहप्रतिज्ञा-भारस्य सुयोधनानुजशतोन्मूलनप्रभञ्जनस्य दुर्दं शासनोर स्थलविदलन-नरसिंहस्य दुर्योधनोरुस्तम्भभङ्गविनिश्चितविजयस्य बलिन प्राभञ्जने-र्वृकोदरस्य स्नेहपक्षपातिना मनसा मङ्गलानि कर्तुमाज्ञापयति देवो

मर ॥ सविधाता पुरोहितादि । यथाप्रधान प्रधानपुरुषानुक्रमेण । अन्तर्वेश्मिका अन्त पुरचारिण । दौवारिका द्वारनियुक्ता । निर्व्यूढ कृत । प्रभञ्जनो वायु । प्रभञ्जनस्य भञ्जयितु । प्राभञ्जनेर्वायुपुत्रस्य भीमस्य । अधिकम् । मङ्गलकर्मेति

---

१ 'किमन्यथा सभावितेन । मधुसूदनस्यादेश एवायम्' इति क्वचित्पाठ २ 'भग-वता' ३ 'देवस्य देवकीनन्दनस्य बहुमानाद्वत्सस्य विजयमङ्गलाशसया प्रवर्त्यन्ता त-दुचिता समारम्भा', 'देवस्य देवकीनन्दनस्य बहुमानाद्वत्सस्य मे विजयमङ्गलशसया प्रवर्त्यन्ता तदुचिता समारम्भा', 'देवस्य देवकीनन्दनस्यादेशाद्वत्सस्य मे मङ्गल-विजयाय प्रवर्त्यन्तामनवरत तदुचिता समारम्भा', 'कञ्चुकिन्, देवस्य देवकीनन्दनस्य बहुमानाद्वत्सस्य भीमसेनस्य विजयमङ्गलाय प्रवर्तन्ता तत्रोपचिता समारम्भा' इति पाठान्तराणि ४ 'यथाज्ञापयति देव' इति क्वचिन्नास्ति ५ 'अन्तर्वांसिका', 'अन्त र्वेश्मनि', ६ 'एव खलु' ७ 'कौरवार्णवस्य' ८ 'दुर्धर—' ९ 'सुयोधनानुज-शतोद्दूतनिर्व्यूढभङ्गस्य' १० 'कुमारदु शासनोर स्थलनरसिंहस्य', 'बलिन प्राभञ्जने-र्दु शासनोर स्थलविदलननरसिंहस्य' इति पाठौ ११ 'दुर्योधनोरुस्तम्भभङ्गविनिश्चित-विजयस्य' इति पाठ क्वचिन्नास्ति, क्वचित् 'दुर्योधनोरुस्तम्भभञ्जनाय कृतनिश्चितविज-यस्य सहोदरपक्षपातिना चेतसा मङ्गलानि कर्तुमाज्ञापयति देवो युधिष्ठिर' इति पाठ १२ 'सहोदरस्य' इति क्वचिन्नास्ति

[illegible]र । (आकाशे ।) किं ब्रूथ—'[1]सर्वतोऽधिकतरमपि प्रवृत्त [2]किं [illegible]कयसि' इति । साधु पुत्रका, साधु । [3]अनुकूलहितकारिता प्रका[illegible]यति मनोगता [4]स्वामिभक्तिम् ।

युधिष्ठिरः—आर्य जयधर ।

कञ्चुकी—आज्ञापयतु देव ।

युधिष्ठिरः—[5]गच्छ प्रियख्यापक पाञ्चालक [6]पारितोषिकेण परितोषय ।

कञ्चुकी—[7]यदाज्ञापयति देव. । (इति पाञ्चालकेन सह निष्क्रान्त ।)

[illegible]ती—महाराअ, किंणिमित्त उण णाहभीमसेणेण सो [illegible]
[illegible]ए[illegible] भणिदो—'[8]पञ्चाण वि अह्माण [9]मज्झे जेण दे रोअदि [10]तेण दे सगामो होदु' त्ति । [11]जइ [12]महीसुदाण एकदरेण सह सगामो तेण पत्थिदो भवे तदो अच्चाहिद भवे । (क)

(क) महाराज, किंनिमित्त पुनर्नाथभीमसेनेन स दुराचारो भणित — 'पञ्चानामप्यस्माक मध्ये येन ते रोचते तेन सह ते सङ्ग्रामो भवतु' इति यदि माद्रीसुतयोरेकतरेण सह सङ्ग्रामस्तेन प्रार्थितो भवेत्ततोऽत्याहि[illegible]

शेष ॥ पारितोषिकेण परितोषहेतुना धनेन ॥ **द्रौपदीवाक्ये** । महाराज, अथ किंनिमित्त पुनर्नाथभीमसेनेन स दुराचार एव भणित —'पञ्चानामप्यस्माक मध्ये येन ते रोचते तेन सह ते सङ्गरो भवतु' इति । यदि पुनर्माद्रीसुतयोर्मध्य एकतरेण सह सङ्गरस्तेन प्राथितो भवेत्तदात्याहित भवेत् । अत्र माद्रीसुतौ नकुलसहदेवौ ॥

---

१ 'सवमधिकमपि प्रवृत्तमालोकयतु ।' इति क्वचित्पाठ. २ 'किं वा' ३ 'अनुकूलहितकारिता प्रकाशयति मनोगता स्वामिभक्तिम्' इति वा पाठ ४ 'स्वामिभक्तिम्' इत्यसादनन्तर क्वचित् '(राजानमुपगम्य ।) देव, प्रथमत एव सर्वमनुष्ठितम् ।' इत्यधिक पाठो दृश्यते ५ 'युधि०—आर्य जयधर । कञ्चुकी—आज्ञापयतु देव ।' इति क्वचिन्नास्ति ६ 'युधि०—प्रियख्यापक पाञ्चालक पाञ्चाल्या मम च पारितोषिकेण प्राच्छादय' इति पाठ ७ 'यदाज्ञापयसि (इति निष्क्रान्त ।)' इति पाठ ८ 'द्रौपदी—किं उण णाहेण' इति पाठ ९ 'एव्व भणिदो' इति जगद्धरसमत पाठ १० 'मज्झे' इति क्वचिन्नास्ति ११ 'तेण सह सगामो होदु त्ति', 'तेण सह समरो होदु त्ति' १२ 'जइ एदाण महीसुदाण एकदरेणावि सह सगामो तेण पत्थिदो भवे', 'जइ उण महीसुदाण मज्झे एकदरेण सह सगामो तेण पत्थिदो भवे', 'कह णाम एदाण महीसुदाण एकदरेण पत्थिदो तेण सगामो भवे' इति पाठान्तराणि.

युधिष्ठिरः—कृष्णे, एवं मन्यते जरासधघाती । सकल-सुहृद्बन्धुवीरानुजराजन्यासु कृपकृतवर्माश्वत्थामशेषास्वेकादशस्वक्षौहिणीष्वबान्धव शरीरमात्रविभवः कदाचिदुत्सृष्टनिजाभिमानो धार्तराष्ट्र परित्यजेदायुध तपोवन वा व्रजेत्सन्धि वा पितृमुखेन याचेत । एव सति सुदूरमतिक्रान्त प्रतिज्ञाभारो भवेत्सकलरिपुजयस्येति । समर प्रतिपत्तु पञ्चानामपि पाण्डवानामेकस्यापि नैव क्षम सुयोधन· । शङ्के चाह गदायुद्ध वृकोदरस्यैवानेन । अयि सुक्षत्रिये, पश्य ।

क्रोधोद्भूर्णगदस्य नास्ति सदृश सत्य रणे मारुतेः
कौरव्ये कृतहस्तता पुनरियं देवे यथा सीरिणि ।
स्वस्त्यस्तूद्धतधार्तराष्ट्रनलिनीनागाय वत्साय मे
शङ्के तस्य सुयोधनेन समर नैवेतरेषामहम् ॥ १३ ॥

(नेपथ्ये ।) Ramakrishna Bulu

तृषितोऽस्मि भोस्तृषितोऽस्मि । सभावयतु कश्चित्सलिलच्छायासप्रदानेन माम् ।

युधिष्ठिरः—(आकर्ण्य ।) क· कोत्र भोः ।

(प्रविश्य)

कञ्चुकी—आज्ञापयतु देव· ।

युधिष्ठिरः—ज्ञायता किमेतत् ।

कञ्चुकी—यदाज्ञापयति देव । (इति निष्क्रम्य पुन प्रविश्य ।) देव, क्षुन्मानतिथिरुपस्थित ।

क्रोधेति । उद्भूर्ण उद्यमित । 'उद्भूर्णोद्यते' इत्यमर । कृतहस्तताऽभ्यास । 'कृतहस्त सुप्रयोगविधिषु कृतपुङ्खवत्' इत्यमर । सीरिणि बलभद्रे । तस्य

---

१ 'मन्ये तस्य जरासधघातिनोऽभिप्राय' इति पाठ २ 'हतसकलबन्धुवीरानुजराजन्यासु' ३ 'परित्यज्य' ४ 'अयि' इति क्वचिन्नास्ति ५ 'क्रोधाद्भूर्णगदस्य', 'क्रोधोद्भूर्णगदस्य' ६ 'देवस्य या सीरिण' इति पाठ ७ 'उद्भूत—' ८ 'भोस्तृषितोऽस्मि भोस्तृषितोऽस्मि', 'भोस्तृषितोऽस्मि ।' इति पाठौ ९ 'प्रविश्यैक सत्वर' १० 'क्षुधा म्लानोऽतिथिरुपस्थित' इति पाठ

युधिष्ठिरः—शीघ्रं प्रवेशय ।

कञ्चुकी—यदाज्ञापयति देव । (इति निष्क्रान्त ।)

(तत प्रविशति मुनिवेषधारी चार्वाको नाम राक्षस ।)

राक्षसः—(आत्मगतम् ।) एषोऽस्मि चार्वाको नाम राक्षस सुयोधनस्य मित्रं पाण्डवान्वञ्चयितुं भ्रमामि । (प्रकाशम् ।) तृषितोऽस्मि । सभावयतु मां कश्चिज्जलच्छायाप्रदानेन । (इति राज्ञः समीपमुपसर्पति ।)

(सर्वे उत्तिष्ठन्ति ।)

युधिष्ठिरः—मुने, अभिवादये ।

राक्षसः—अकालोऽयं समुदाचारस्य । जलप्रदानेन सभावयतु माम् ।

युधिष्ठिरः—मुने, इदमासनम् । उपविश्यताम् ।

राक्षसः—(उपविश्य ।) ननु भवतापि क्रियतामासनपरिग्रहः ।

युधिष्ठिरः—(उपविश्य ।) क कोऽत्र भोः, सलिलमुपनय ।

(प्रविश्य गृहीतभृङ्गार)

कञ्चुकी—(उपसृत्य ।) महाराज, शिशिरसुरभिसलिलसपूर्णोऽयं भृङ्गार पानभाजनं चेदम् ।

भीमस्य ॥ १३ ॥ 'भृङ्गार कनकाळुका' इत्यमरः ॥ 'उदन्या तु पिपासा तृट्'

---

१ 'मुनिवेष' २ '(आत्मगतम् ।)' इत्यसादारभ्य '(प्रकाशम् ।)' इत्यन्तं क्वचिन्नास्ति ३ 'एषोऽस्मि सुयोधनस्य मित्रं', 'एषोऽस्मि सुयोधनस्य परं मित्रं,' 'एषोऽस्मि भोः, सुयोधनस्य मित्रं' इति पाठान्तराणि ४ 'तृषितोऽस्मि तृषितोऽस्मि' इति क्वचित्पाठः ५ '(इति राज्ञः समीपमुपगच्छति ।) युधि०—(सहसोत्थाय ।) मुने, अभिवादये' इति क्वचित्पाठः ६ 'मां भवान्' ७ 'युधि०—मुने, उपविश्यतामासने,' 'युधि०—जयधर जयधर, सलिलं सलिलमुपनय । इदमासनम् । मुने, 'उपविश्यताम्' इति पाठौ ८ '(उपविश्य ।)' इत्यत्र '(तथा कृत्वा)' इति क्वचित्पाठः ९ 'आसनपरिग्रहः' इत्यसादनन्तरं '(सर्वे उपविशन्ति ।)' इति केचित्पठन्ति १० 'युधि०—क कोऽत्र भोः ।' इति पाठः ११ 'कञ्चुकी—(निष्क्रम्य पुनः प्रविश्य ।) शिशिरजलसपूर्णोऽयं भृङ्गारो भाजनं चेदम् ।' इति क्वचित्पाठः

युधिष्ठिरः—मुने, निर्वर्त्यतामुदन्याप्रतीकारः ।

राक्षसः—(पादौ प्रक्षाल्योपस्पृशन्विचिन्त्य ।) [1]भो., क्षत्रियस्त्वमिति मन्ये ।

युधिष्ठिरः—[3]सम्यग्वेदी भवान् ।

राक्षसः—[4]सुलभश्च स्वजनविनाश सङ्ग्रामेषु प्रतिदिनमतो नादेय भवद्भ्यो जलादिकम् । भवतु । [5]छायय्यैवानया सरस्वतीशिशिरतरङ्ग-स्पृशा [6]मरुता चानेन विगतक्लमो भविष्यामि ।

द्रौपदी—बुद्धिमदिए, वीएहि महेसिं [7]इमिणा तालविन्तेण । (क)

(चेटी तथा करोति ।)

राक्षसः—[8]भवति, अनुचितोऽयमस्मासु समुदाचार ।

युधिष्ठिरः—[9]मुने, कथय कथमेव भवान्परिश्रान्त ।

राक्षसः—[10]मुनिजनसुलभेन कौतूहलेन तत्रभवता महाक्षत्रि-याणा द्वन्द्वयुद्धमवलोकयितु [11]पर्यटामि समन्तपञ्चकम् । अद्य तु [12]बल-वत्तया शरदातपस्यापर्याप्तमेवावलोक्य गदायुद्धमर्जुनसुयोधनयोराग-तोऽस्मि ।

(क) बुद्धिमतिके, वीजय महर्षिमनेन तालवृन्तेन ।

इत्यमरः ॥ सरस्वती नदीभेदः ॥ **द्रौपदीवाक्ये**। हञ्जे बुद्धिमतिके, वीज-यैनं महर्षिमेतेन तालवृन्तकेन । 'व्यजनं तालवृन्तकम्' इत्यमरः ॥ **चेटीवाक्ये**।

---

१ 'विचिन्त्य' इति क्वचिन्नास्ति २. 'भो भो.' इति पाठः ३ 'सम्यग्वेत्ति भवान्' । क्षत्रिय एवासि ।' इति बहव ४ 'प्रतिदिनसुलभस्वजनविनाशेषु सङ्ग्रामेषु युष्मत्तो नादेय सलिलादिकम्', 'यद्येव प्रतिदिनसुलभस्वजनविनाशनेषु सङ्ग्रामेषु युष्मत्तो नादेय सलिलादिकम्', 'सुलभस्वजनविनाशेभ्य प्रतिदिनमनादेय भवद्भ्य सलिलम्' इति पाठान्तराणि ५ 'छाययैवानयाह सरस्वतीभूमिभागस्पृशा' इति पाठः ६ 'मरुतानेन' ७ 'इमिणा' इति क्वचिन्नास्ति ८ 'अहह, भवति, अनु-चितोऽयमस्मासु समुदाचारः', 'भवतु । 'अनुचितोऽस्मासु समुदाचारोऽयम्'-इति पाठौ ९. 'मुने' कथय कथ पुनरेव', 'मुने, कथ पुनरेव', 'मुने सर्वं तावत्तिष्ठतु । कथ पुनरेव' इति पाठान्तराणि. १०. 'भो बहुजनसुलभेन कौतूहलेन' इति पाठ ११ 'सदा पर्यटामि' इति पाठ १२ 'अत्यन्तबलवत्तया शरदातपस्यापर्याप्तमेवा-लोक्य' इति केचित्.

(सर्वे[1] विषाद नाटयन्ति ।)

कञ्चुकी—मुने[2], न खल्वेवम् । भीमसुयोधनयोरिति कथय ।

राक्षसः—आ[3], अविदितवृत्तान्त एव कथ मामाक्षिपसि ।

युधिष्ठिरः—महर्षे[4], कथय कथय ।

राक्षसः—क्षणमात्र[5] विश्रम्य सर्वं कथयामि[6] भवतो न पुनरस्य वृद्धस्य ।

युधिष्ठिरः—कथय[7] किमर्जुनसुयोधनयोरिति ।

राक्षसः—पूर्वमेव[8] कथित मया प्रवृत्त गदायुद्धमर्जुनसुयोधनयोरिति ।

युधिष्ठिरः—न भीमसुयोधनयोरिति ।

राक्षसः—वृत्त[9] तत् ।

(युधिष्ठिरो द्रौपदी च मोहमुपगतौ ।)

कञ्चुकी—(सलिलेना[10]सिच्य ।) समाश्वसितु देवो देवी च ।

चेटी—समस्ससदु समस्ससदु देवी । (क)

(क) समाश्वसितु समाश्वसितु देवी ।

यद्भट्टिनी समाज्ञापयति ॥ बलवत्तर इति स्वार्थिकस्तरप् ॥ भवत कृते इति शेष ॥ **चेटीवाक्ये** । समाश्वसितु देवी ॥ **द्रौपदीवाक्ये** । भगवन्, कथय

---

१ '(सर्वे विषाद नाटयन्ति ।)' इति क्वचिन्नास्ति २ 'मुने, न खल्विदम्' इति पाठ ३ 'कथमविदितवृत्तान्त एवमाक्षिपसि' इति पाठ ४. 'महर्षे, कथय' इति पाठ . ५ 'मुहूर्त तिष्ठ । विश्रम्य सर्वं कथयिष्यामि भवते' इति क्वचित्पाठ. ६. 'कथयामि भवते ।', 'कथयामि भवते न पुनरस्य ।', 'कथयामि भवते न पुनरस्य वृद्धापसदस्य पुरत ।' इति पाठान्तराणि ७ 'भगवन्' एतावदेव कथय किं पुनरर्जुनसुयोधनयोरिति' इति पाठ ८ 'ननु पूवमेव कथित मया प्रवृत्त गदायुद्धमिति' । युधि०—'न भीमसुयोधनयोरिति ।' 'ननु कथितमेव मया गदायुद्ध वर्तत इति । युधि० —(साक्षम् ।) ननु भीमसुयोधनयो ।' इति पाठौ ९ 'वृत्त तदेव । राजा—हा वत्स भीमसेन, क्वासि । प्रयच्छ मे प्रतिवचनम् । द्रौपदी—णाह भीमसेण, कहिं सि । देहि मे पडिवअणम् ।(इति मोहमुपागतौ।) कञ्चुकी—महाराज, समाश्वसिहि समाश्वसिहि । प्रकृतिमापद्यताम् । चेटी—(देवीं प्रति ।) समस्ससदु समस्ससदु देवी । राजा—(सज्ञा लब्ध्वा ।) भगवन्, किं कथयसि' इति वा पाठ १० '(सलिलमासिच्य ।)'

(उभौ सज्ञां लभेते ।)

युधिष्ठिरः—किं कथयसि मुने, वृत्तं भीमसुयोधनयोर्गदायुद्धमिति ।

द्रौपदी—भअव, कहेहि कहेहि किं वुत्तं त्ति । (क)

राक्षसः—कञ्चुकिन्, कौ पुनरेतौ ।

कञ्चुकी—एष देवो युधिष्ठिर । इयमपि पाञ्चालतनया ।

राक्षसः—आ, दारुणमुपक्रान्तं मया ।

द्रौपदी—हा णाह भीमसेण । (इति मोहमुपगता ।) (ख)

कञ्चुकी—किं नाम कथितम् ।

चेटी—समस्ससदु समस्ससदु देवी । (ग)

युधिष्ठिरः—(साक्षम् ।) ब्रह्मन्,

पदे सदिग्ध एवासि-दु खमास्ते युधिष्ठिर ।
वत्सस्य निश्चिते तत्त्वे प्राणत्यागोदयं सुखी ॥ १४ ॥

राक्षसः—(सानन्दमात्मगतम् ।) अयमेव मे यत्न । (प्रकाशम् ।) यदि त्ववश्य कथनीय तदा सक्षेपत कथयामि । न युक्त बन्धुव्यसन विस्तरेणावेदयितुम् ।

(क) भगवन्, कथय कथय किं वृत्तमिति ।

(ख) हा नाथ भीमसेन ।

(ग) समाश्वसितु समाश्वसितु देवी ।

कि वर्तत इति ॥ हा नाथ भीमसेन ॥ **पद इति** । सदिग्ध एव पदे भवदुक्ते युधिष्ठिरो दु ख यथास्यादेवमास्ते तिष्ठति ॥ १४ ॥ **सर्वथेति** । किमपीत्यनेना-

---

१ 'उपलभेते' २. 'भअव, कहेहि किं वुत्त त्ति' इति पाठ ३ 'ब्रह्मन्, पत्र देवो युधिष्ठिर' इति बहव ४ 'एषा', 'इय', 'इय च' ५ 'पाञ्चालरा [illegible]या' ६ 'मया नृशमेन' इति बहव पठन्ति ७ 'भीम' ८ 'कञ्चुकी—किं नाम कथितम्' इति पाठ पुस्तकान्तरे नास्ति ९ 'युधि०—ब्रह्मन्', 'युधि०—(साक्षम् ।) ब्रह्मन्, 'कथय 'कथय' इति पाठौ १० 'अह सुखी' इति बहव ११ 'अय मे यत्न । (प्रकाशम् ।) यद्येवमवश्यकथनीय सक्षेपेण कथयामि', 'ममाप्ययमेव यत्न । (प्रकाशम् ।) यदि वावश्यमेव कथनीय तदा सक्षेपत कथयामि' इति पाठौ १२ 'अतिविस्तरेण'

युधिष्ठिरः—(अश्रूणि [1]मुञ्चन् ।)

सर्वथा कथय ब्रह्मन्सक्षेपाद्विस्तरेण वा ।
वत्सस्य किमपि श्रोतुमेषं [2]दत्त क्षणो मया ॥ १५ ॥

राक्षसः—श्रूयताम् ।

तस्मिन्कौरवभीमयोर्गुरु[3]गदाघोरध्वनौ सयुगे

द्रौपदी—(सहसोत्थाय ।) तदो तदो । **(क)**

राक्षसः—[4](स्वगतम् ।) कथ पुनरनयोर्लब्धसज्ञतामपनयामि । (प्रकाशम् ।)

सीरी सत्वरमागतश्चिरमभूत्तस्याग्रत सङ्गर ।
आलम्ब्य प्रियशिष्यता तु हलिना [5]सज्ञा रहस्याहिता
यामासाद्य कुरूत्तम प्रतिकृतिं दु शासनारौ गत ॥ १६ ॥

युधिष्ठिरः—हा वत्स, वृकोदर । (इति मोहमुपगत ।)

द्रौपदी—हा णाह भीमसेण, हा मह परिभवपडीआरपरिच्चत्तजीविअ, जडासुरबअहिडिम्बकिम्मीरकीचअजरासघणिसूदण, सोअन्धिआहरणचाडुआर, देहि[6] मे पडिवअणम् । (इति मोहमुपगता ।) **(ख)**

(क) ततस्तत ।

(ख) हा नाथ भीमसेन, हा मम परिभवप्रतीकारपरित्यक्तजीवित, जटासुरबकहिडिम्बकिर्मीरकीचकजरासधनिषूदन, सौगन्धिकाहरणचाटुकार, देहि मे प्रतिवचनम् ।

मङ्गल्य निवारयति ॥ १५ ॥ **तस्मिन्निति** । घोर भयानकम् । प्रिय शिष्यो यस्येति प्रियशिष्य । तस्य भाव प्रियशिष्यता । प्रतिकृतिं प्रतीकारम् । अर्थाद्दु शासनवधस्य । दु शासनारौ भीमे । तथा च भीमस्तेन हत इति भाव ॥ १६ ॥ **द्रौपदीवाक्ये** । हा नाथ, मदीयपरिभवप्रतीकारपरित्यक्तजीवित, हा जटासुरबकहिडिम्बनिषूदन, हा सौगन्धिकाहरणात्मचाटुकार, क्वासि । मे देहि प्रतिव-

---

१ 'विमुञ्चन्' २ 'एतद्दत्त मनो मया' इति पाठ ३ 'गुरुगदाभीमध्वनौ' इति पाठ ४ 'द्रौपदी—(लब्धसज्ञा ।) अयि, तदो किम्' इति केचित्पठन्ति ५ 'व्यालम्ब्य प्रियशिष्यता मुसलिना' इति क्वचित्पाठ ६ 'सज्ञा रह सा कृता', 'शक्ती रहस्याहिता' ७ 'देहि मे पडिवअणम्' इति क्वचिन्नास्ति.

कञ्चुकी—(सास्रम् ।) हा कुमार भीमसेन, धार्तराष्ट्रकुलकमलिनी-प्रालेयवर्ष,[1](ससम्भ्रमम् ।) समाश्वसितु महाराज । भद्रे, समाश्वासय स्वामिनीम् । [2]महर्षे, त्वमपि तावदाश्वासय राजानम् ।

राक्षसः—(स्वगतम् ।) आश्वासयामि प्राणान्[3]परित्याजयितुम् । (प्रकाशम् ।) [4]भो भीमाग्रज, क्षणमेक चीयता समाश्वास. । कथाशेषोऽस्ति ।

युधिष्ठिरः[5]—(समाश्वस्य ।) महर्षे, किमस्ति कथाशेष ।

द्रौपदी—(प्रतिबुद्ध्य ।) भअव, कहेहि कीदिसो कहासेसो त्ति। (क)

कञ्चुकी—कथय कथय ।

राक्षसः—[6]ततश्च हते तस्मिन्सुक्षत्रिये वीरसुलभा गतिमुपगते [7]समग्रसगलित भ्रातृवधशोकज बाष्प प्रमृज्य प्रत्यग्रक्षतजच्छटा-चर्चिता तामेव गदा भ्रातृहस्तादाकृष्य निवार्यमाणोऽपि सधित्सुना

(क) भगवन्, कथय कीदृश कथाशेष इति ।

चनम् । अत्र जटासुरो दैत्यभेद । बको दैत्यभेद । सौगन्धिक कमलम्। गङ्गाया सुवर्णकमलाहरणाद्यद्रौपद्या आराधान तत्र चाटुकार प्रेम यस्य तादृश ॥ **द्रौपदीवाक्ये** । भगवन्, कथय कीदृश कथाशेष ॥ गतिं मरणरूपाम्। सधि-

---

१ '(ससम्भ्रमम्।) महाराज समाश्वसिहि समाश्वसिहि। भद्रे ममाश्वासयात्रभवतीम्।', 'महाराज समाश्वसिहि समाश्वसिहि । भद्रे समाश्वासयात्रभवतीम् ।' इति पाठौ २ 'महर्षे' त्वमप्याश्वासय महाराजम्' इति बहव ३ 'त्याजयितुम्' ४ अयि भो भीमाग्रज, क्षणमेकमाधीयतामाश्वास । कथाशेषोऽप्यस्ति ।' इति बहुपुस्तकाना पाठ ५. युधि०(समाश्वस्य ।) महर्षे, किमस्ति कथाशेष । राक्षस —'ततश्च हते', 'युधि० —(समाश्वस्य ।) भगवन्, कथय किं कथाशेषोऽप्यस्त्येव । द्रौपदी—(प्रतिबुद्ध्य ।) किं कहासेसो । कञ्चुकी—कथय कथय । चेटी—कहेहि कहेहि । राक्षस.—'ततश्च हते' इति पाठौ ६ 'ततश्च हते तस्मिन्सुक्षत्रिये वीरसुलभा गतिं' इति वा पाठ ७ 'समग्रसगलितमेव भ्रातृवधशोकज बाष्प प्रमृज्य भ्रातृवधशोकादपहाय गाण्डीव प्रत्यग्रक्षतजच्छटाचर्चिता तामेव गदा', 'समग्रसगलितभ्रातृवधशोकज बाष्पमुत्सृज्य भ्रातृवधशोकादपहाय गाण्डीव प्रत्यग्रक्षतजच्छटाचर्चिता तामेव गदा' इति पाठौ ८ 'भ्रातृहस्ताबलादाकृष्य निवार्यमाण सधित्सुना' इति बहव. पठन्ति

[1]वासुदेवेन, आगच्छागच्छेति सोपहास भ्रमितगदाझङ्कारमूर्छितगम्भीर[2]वचनध्वनिनाह्वयमान कौरवराजेन तृतीयोऽनुजस्ते किरीटी योद्धुमारब्ध । [3]अकृतिनस्तस्य गदाघातान्निधनमुत्प्रेक्षमाणेन कामपालेनार्जुनपक्षपाती देवकीसूनुर्[4]रतिप्रयत्नात्स्वरथमारोप्य द्वारका नीत ।

युधिष्ठिरः—साधु भो अर्जुन, [5]तेदैव प्रतिपन्ना वृकोदरपदवी गाण्डीव परित्यजता । अह पुन केनोपायेन [6]प्राणपरित्यागाद्धृदयमुत्साहयिष्ये ।

द्रौपदी—हाँ णाह भीमसेण, ण जुत्त दाणि दे कणीअस भादर असिक्खिद गदाये दारुणस्स सत्तुणो अहिमुह गच्छन्त उवेक्खिदुम् । (मोहमुपगता ।) **(क)**

राक्षसः—ततश्चाह—

युधिष्ठिरः—भवतु मुने, किमत पर श्रुतेन । हा तात भीमसेन,

(क) हा नाथ भीमसेन, न युक्तमिदानी ते कनीयासं भ्रातरमशिक्षित गदाया दारुणस्य शत्रोरभिमुख गच्छन्तमुपेक्षितुम् ।

त्सुना सधिं कर्तुमिच्छुना । रामो बलभद्र ॥ **द्रौपदीवाक्ये** । हे नाथ भीमसेन, युक्तमिदानी ते कनीयास भ्रातर धनुर्धर गदाशिक्षाविमुख दारुणस्य शत्रोरभिमुख गच्छन्त निवारयितुम् । अत्र कनीयास कनिष्ठम् ॥ 'कान्तारो

---

१ 'भगवता वासुदेवेन' २ 'गम्भीरवादध्वनिनाह्वयमान कौरवराजेन सह' इति पाठ ३ 'तथाऽकृतिनस्तस्य गदाघातान्निधन', 'तथा कृतिनस्तस्य गदाघातान्निधन', 'अकृतिनस्तस्य गदाया युद्ध' इति पाठान्तराणि ४ 'प्रयत्नात्' ५ 'एतावत्प्रतिपन्ना वृकोदरानुगमनपदवी' ६ 'प्राणापगमनमहोत्सवमुत्सहिष्ये' इति बहव पठन्ति ७ 'हा णाह, भादुवच्छल, ण जुत्त भादर असिक्खिद गदाए सत्तुणो मुह गच्छन्त उवेक्खिदुम्' इति बहुभि समाहृत पाठ ८ 'हा तात भीमसेन, मम कान्तारव्यसनबान्धव, जतुगृहविपत्समुद्रतरणयानपात्र, हा किमीरहिडिम्बासुरजरासधविजयैकमल्ल, हा कीचकसुयोधनानुजद्रुमोन्मूलनप्रभञ्जन, हा द्यूतपण, मम शरीरस्थितिपरिखेदशङ्कासूदन, हा मदाज्ञासपादक, हा कौरववनदावानल', 'हा तात भीमसेन, जतुगृहसमुद्रतरणयानपात्र ('जतुगृहसमुद्रतरणयानपोत्र' इत्यपि पाठ) हा किमीरहिडिम्बासुरजरासधजयमल्ल, हा कीचकसुयोधनानुजकमलिनीकुञ्जर, हा द्यूतप्रणयिन्, मम शरीरस्थितिपरिखेदशङ्कासूदन, हा मदाज्ञासपादक, हा कौरववनदावानल' इति पाठौ

कान्तारव्यसनबान्धव, हा मच्छरीरस्थितिविच्छेदकातर, [1]जतुगृहविपत्समुद्रतरणयानपात्र, हा किर्मीरहिडिम्बासुरजरासंधविजयमल्ल, हा [2]कीचकसुयोधनानुजकमलिनीकुञ्जर,

निर्लज्जस्य दुरोदरव्यसनिनो वत्स त्वया [3]सीदता
भक्त्या मे समदद्विपायुतबलेनाङ्गीकृता दासता ।
किं नामापकृतं मया तदधिकं [4]त्वय्यद्य यद्गम्यते
त्यक्त्वा नाथ सबान्धवं सपदि मां प्रीतिं क्व ते साऽधुना ॥ १७ ॥

द्रौपदी—(सज्ञामुपलभ्योत्थाय च ।) महाराज, किं एदं वट्टइ । (क)

युधिष्ठिरः—कृष्णे किमन्यत् ।

स कीचकनिषूदनो बकहिडिम्बकिर्मीरहा
मदान्धमगधाधिपद्विरदसंधिभेदाशनिं ।
गदापरिघशोभिना भुजयुगेन तेनान्वितं
प्रियस्तव ममानुजोऽर्जुनगुरुर्गतोऽस्त किल ॥ १८ ॥

(क) महाराज, किमेतद्वर्तते ।

वर्त्म दुर्गमम् इत्यमर । शरीरस्थितिर्जीवनम् । यानपात्रं 'वोहित्थ' इति ख्यातम् । 'यानपात्रं तु पोतः' इत्यमर । किर्मीरो दैत्यभेदः । **निर्लज्जस्येति** । 'पणे द्यूते दुरोदरम्' इत्यमर । हे वत्स, त्वया मम तदा दासताङ्गीकृतासीत् । किं नामेति । नाम प्रकाशय किं तदित्यर्थः । अतोऽधिकं त्वयि मयाद्य किमपकृतं तत्प्रकाशयेत्यर्थः ॥ १७ ॥ **द्रौपदीवाक्ये** । हे महाराज, किं नामैतद्वर्तते ॥ **स इति** । मगधाधिपो जरासंधः । गदापरिघः पाणौ यत्र तादृशेन । पाणिः करः । भुजयुगेनेति लक्षणे तृतीया । किल प्रसिद्धौ ॥ १८ ॥ **द्रौपदीवाक्ये** ।

---

१ 'हा जतुगृहसंतरणपोतपते, हा बकहिडिम्बकिर्मीरजटासुरजरासंधजयमल्ल' इति पाठः. २ 'कीचकसुयोधनानुजशतकमलिनीकुञ्जर', 'कीचकसुयोधनानुजकुलकमलिनीकुञ्जर', 'कीचकसुयोधनानुजकमलवनप्रालेय' इति पाठान्तरणि ३ 'सीदता' ४ 'त्वय्यद्य निर्वत्सलं त्यक्त्वाऽनाथमबान्धवं सपदि मां येनासि दूरं गतः' इति बहुपुस्तकानां पाठः ५ '(सज्ञामुपलभ्योत्थाय च ।)' इत्यत्र '(उत्थाय ।)' इति बहवः पठन्ति ६ 'किमन्यत्' इति क्वचिन्नास्ति ७ 'भङ्गाशनिं' ८ 'गदापरिघपाणिना' इति जगद्धरसमतः पाठः

द्रौपदी—णाह भीमसेण, तुए किल मे केसा सजमिदव्वा। ण जुत्त वीरस्स खत्तिअस्स पडिण्णाद सिढिलेदुम्। ता पडिवालेहि म जाव उवसप्पामि। (पुनर्मोहमुपगता।) (क)

युधिष्ठिरः—(आकाशे।) अम्ब पृथे, श्रुतोऽय तव पुत्रस्य समुदाचार। मामेकमनाथ विलपन्तमुत्सृज्य क्वापि गत। तात जरासधशत्रो, कि नाम वैपरीत्यमेतावता कालेनाल्पायुषि त्वयि समालोकित जनेन। अथवा मयैव बहूपलब्धम्।

दत्त्वा मे करदीकृताखिलनृपा यन्मेदिनीं लज्जसे
द्यूते यच्च पणीकृतोऽपि हि मया न क्रुध्यसि प्रीयसे।
स्थित्यर्थं मम मत्स्यराजभवने प्राप्तोऽसि यत्सूदता
वत्सैतानि विनश्वरस्य सहसा दृष्टानि चिह्नानि ते॥ १९॥

मुने, किं कथयसि। ('तस्मिन्कौरवभीमयो' (६।१६) इत्यादि पठति।)

(क) नाथ भीमसेन, त्वया किल मे केशा सयमितव्या। न युक्त वीरस्य क्षत्रियस्य प्रतिज्ञात शिथिलयितुम्। तत्प्रतिपालय मा यावदुपसर्पामि।

हा नाथ भीमसेन, त्वया किल मम केशा सयमितव्या। न युक्तमिदानी भवतो वीरस्य क्षत्रियस्य प्रतिज्ञात शिथिलयितुम्। तत्प्रतिपालय मा क्षणमात्र यावत्त्वामनुगच्छामि॥ पृथे पृथानामधेयि। तात मान्य। जरासधशत्रो भीम। बहुस्वल्पायु सूचकम्। तदेवाह—**दत्त्वेति**। करदो राजभागदाता। प्रीयसे प्रीतो भवसि। स्थित्यर्थ वासार्थम्। मत्स्यराजो विराट। 'सूदस्तु सूपवत्सूपकारेऽपि व्यञ्जनेऽपि च' इति विश्व। हे वत्स, एतानि चिह्नानि ते विनाशशीलस्य दृष्टानि। तथा च मम भाग्यदोषाद्गुणा एव ते दोषा वृत्ता इति भाव॥ १९॥ 'कामपालो

---

१ 'द्रोपदी—(आकाशे दत्तदृष्टि।) णाह भीमसेण, तुए किल मे केसा सजमिदव्वा', 'द्रौपदी—(आकाशे दत्तदृष्टि।) णाह, सअ किल मे केसा सजमिदव्वा', 'द्रौपदी—णाह, सअ किल मे केसा सजमिदव्वा', 'द्रौपदी—णाह, मे केसा सजमिदव्वा' इति पाठान्तराणि २ '(इति पुनर्मोहमुपगता।)', '(मोहमुपगता।)' ३ 'युधि०—(आकाशे दत्तदृष्टि।) अम्ब पृथे, ननु श्रुतोऽय तव पुत्रस्य समुदाचार। मामेकमनाथमकरुणो विलपन्तमुत्सृज्य क्वापि गत' इति वा पाठ ४ 'त्वयि' इति क्वचिन्नास्ति ५ 'वत्सैतानि विनश्वरस्य सहसा स्पष्टानि चिह्नानि ते', 'तान्येतानि विनश्वरस्य सहसा दृष्टानि चिह्नानि ते' इति पाठौ ६ 'इति पठति'

राक्षसः—एवमेतत् ।

युधिष्ठिरः—धिगस्मद्भागधेयानि । भगवन्कामपाल, कृष्णाग्रज, सुभद्राभ्रात[1]

ज्ञातिप्रीतिर्मनसि न कृता क्षत्रियाणा न धर्मो
रूढ सख्य तदपि गणित नानुजस्यार्जुनेन[2] ।
तुल्य काम भवतु भवत शिष्ययो स्नेहबन्ध[3]
कोऽय पन्था यदसि विमुखो[4] मन्दभाग्ये मयीत्थम् ॥२०॥

(द्रौपदीमुपगम्य ।) अयि पाञ्चालि, उत्तिष्ठ[5] । समानदु खावेवावा भवाव । मूर्च्छया किं मामेवमतिसधत्से[6] ।

द्रौपदी—(लब्धसज्ञा ।) बन्धेदु[7] णाहो दुज्जोहणरुधिलाद्देण हत्थेण दुस्सासणविमुक्क[8] मे केसहत्थम् । हञ्जे बुद्धिमदिए, तव पच्चक्ख एव्व णाहेण पडिण्णादम् । (कञ्चुकिनमुपेत्य ।) अज्जं, किं सदिट्ठ दाव[9] मे देवेण[10]

(क) बध्नातु नाथो दुर्योधनरुधिरार्द्रेण हस्तेन दु शासनविमुक्त मे केश हस्तम् । हञ्जे बुद्धिमतिके, तव प्रत्यक्षमेव नाथेन प्रतिज्ञातम् । आर्य, किं सदिष्ट

हलायुध' इत्यमर । **ज्ञातीति** । सुभद्राभ्रातृत्वेन विशेषणात्सुभद्राद्वारा ज्ञाति-प्रीतिर्दैशिता । धर्मो मनसि न कृत । स च वीरयो समदृष्टिता । रूढमुपचितम् । **शिष्ययोर्भीमसुयोधनयों** ॥ २० ॥ अतिसधत्से अनन्वित करोषि ॥ **द्रौपदी-वाक्ये** । बध्नातु नाथो दुर्योधनरुधिरार्द्रेण हस्तेन दु शासनविमुक्त मम केश-हस्तम् । हञ्जे बुद्धिमतिके, तवापि प्रत्यक्षमेव प्रतिज्ञात नाथेन । आर्य, किं सदिष्ट

---

[1] 'युधि०—अथवा धिगस्मद्भागधेयानि । भगवन्कामपाल, कृष्णाग्रज, सुभद्रा-भ्रात', 'युधि०—धिङ्मम भागधेयानि । (आकाशमवलोकयन् ।) भगवन्सुभद्राभ्रात, कामपाल', 'युधि०—धिङ्मम भाग्यानि । (आकाशमवलोकयन् ।) भगवन्कामपाल, कृष्णाग्रज', 'युधि०—विगलन्ति भागधेयानि । भगवन्कामपाल, कृष्णाग्रज' इति पाठान्तराणि । [2] 'नानुजस्यानुजे मे' इति बहव पठन्ति [3] 'प्रेमबन्ध' [4] 'विमुखो मन्दभाग्ये मयि त्वम्', 'विगुणो मन्दभाग्ये मयीत्थम्' [5] 'उत्तिष्ठोत्तिष्ठ'. [6] 'अभिसधत्से' [7] 'बन्धेदु बन्धेदु' [8] 'दुस्सासणमोद्दद'. [9] 'अज्ज, किं' इति क्वचिन्नास्ति [10] 'मे देवकीणन्दणेण केसरअणा आरम्भीअदु त्ति', 'मे देवेण देवकीणन्दणेण पुणो वि केसरअणा आरम्भीअदु त्ति'.

देवकीणन्दणेण पुणो वि केसबन्धण आरम्भीअदु त्ति । ता उवणेहि मे [1]पुप्फदामाइ । विरएहि दाव कबरीम् । करेहि भअवदो [2]णाराअणस्स वअणम् । [3]णं क्खु सो अलीअ सदिसदि । अहवा कि मए [4]सतंत्ताए भणिदम् । [5]अंचिरगद अज्जउत्त अणुगमिस्सम् । (युधिष्ठिरमुपगम्य ।) महाराअ, [6]आदीवअ चिदाम् । तुम वि खत्तधम्म अणुबन्धन्तो एव्व णाहस्स जीविदहरस्स अहिमुहो होहि । [7]अहवा ज दे रोअदि । (क)

युधिष्ठिरः—युक्तमाह [8]पाञ्चाली । कञ्चुकिन्, कियतामिय तपस्विनी चिंतासविभागेन [9]सह्यवेदना । ममापि सज्ज धनुरुपनय । [10]अलमथवा धनुषा ।

तस्यैव देहरुधिरोक्षितपाटलाङ्गी-
[11]मादाय [12]सम्प्रति गदामपविध्य चापम् ।

तावन्मे देवेन देवकीनन्दनेन पुनरपि केशबन्धनमारभ्यतामिति । तदुपनय मे पुष्पदामानि । विरचय तावत्कबरीम् । कुरु भगवतो नारायणस्य वचनम् । न खलु सोऽलीक सदिशति । अथवा कि मया सतप्तया भणितम् । अचिरगतमार्यपुत्रमनुगमिष्यामि । महाराज, आदीपथ चिताम् । त्वमपि क्षत्रधर्ममनुबध्नन्नेव नाथस्य जीवितहरस्याभिमुखो भव । अथवा यत्ते रोचते ।

तेन देवकीनन्दनेन पुनरपि केशबन्धनमारभ्यतामिति । तदुपनय मे पुष्पदामानि तावत् । विरचय मे कबरीम् । कुरु भगवतो नारायणस्य वचनम् । न खलु सोऽलीक सदिशति । अथवा किं मया सतप्तया भणितम् । अचिरगतमार्यपुत्रमनुगमिष्ये । महाराज, आदीप्यता चिता । त्वमपि क्षत्रियधर्मानुबध्नन्नेव तस्य नाथजीवितहरस्य शत्रोरभिमुखो भव । अथवा यत्ते रोचते ॥ **तस्येति ।**

---

१ 'फुल्लदामाइ', 'पुल्लपुप्फदामाइ' २ 'पुरिसोत्तमस्स' ३ 'णहि अलीअ मन्तेदि सो' इति पाठ ४ 'अदिसतत्ताए' ५ 'अदूरगद' 'अदूर गद' ६ 'उपेत्य' ७ 'आदीवअ मे चिदाम् । तुम वि खत्तधम्म अणुवट्टन्तो एव्व' इति बहुपुस्तकाना पाठ ८ 'अहवा ज दे रोअदि' इति क्वचिन्नास्ति ९ 'याज्ञसेनी' १० 'चितासविधानेन हृतवेदना' इत्यपि पाठ ११ 'उपानय' १२ 'पीवराङ्गीम्' १३. 'सयति' १४ 'अपहाय चापम्', 'अपविद्धचाप '.

भ्रातृप्रियेण कृतमद्य यदर्जुनेन
श्रेयो ममापि हि तदेव कृतं जयेन ॥ २१ ॥

राक्षसः[1]—राजन्, रिपुजयविमुख ते यदि चेतस्तदा यत्र तत्र वा प्राणत्याग कुरु । वृथा तत्र गमनम् ।

कञ्चुकी[2]—धिङ्मुने, राक्षससदृश हृदय भवत ।

राक्षसः[3]—(सभय स्वगतम् ।) किं ज्ञातोऽहमनेन । (प्रकाशम्) भो[4] कञ्चुकिन्, तयोर्गदया[5] खलु युद्ध प्रवृत्तमर्जुनदुर्योधनयो[6] । जानामि च तयोर्गदाया[7] भुजसारम् । दुःखितस्य पुनरस्य[8] राजर्षेरपरमनिष्टश्रवण परिहरन्नेव ब्रवीमि ।

युधिष्ठिरः—(बाष्पं विसृजन् ।) साधु महर्षे, साधु । सुस्निग्धमभिहितम्[9] ।

कञ्चुकी—महाराज, किं[10] नाम शोकान्धतया देवेन[11] देवकल्पेनापि प्राकृतेनेव त्यज्यते क्षात्रधर्म[12] ।

युधिष्ठिरः—आर्य जयधर,

तस्यैव भीमस्य । उक्षित सिक्तम् । पाटल रक्तम् । अपविध्य त्यक्त्वा ॥ २१ ॥ भुजसारमित्यन्त कञ्चुकिने कथनम् ॥ सुस्निग्ध हितम् ॥ देवकल्पेन देवतुल्येन ॥

---

१ 'जयेन किं मे' इति क्वचित्पाठ २ 'राक्षस —(सविषादमात्मगतम् ।) कथ गच्छति । भवत्वेव तावत् । (प्रकाशम ।) राजन्, रिपुजयविमुख यदि ते चेतस्तदा वरमत्रैव प्राणत्याग । किं तत्र गमनेन' इति पुस्तकान्तरे पाठ ३ 'कञ्चुकी—सकोपम् ।) ब्रह्मन्, अल कथितेन । निश्चित नृशस राक्षसमत्रभवतो हृदयम्', 'कञ्चुकी —(सरोषम् । धिङ्मुनिजनासदृश राक्षसस्य सदृश भवता व्याहृतम्' इति पाठौ ४ 'राक्षस —(सभय स्वगतम् ।) हा धिक्कष्टम् । किं ज्ञातोऽहमनेन', 'राक्षस —(स्वगतम् ।) किं ज्ञातोऽहमनेन' इति पाठौ ५ 'भो कञ्चुकिन्, एतद्ब्रवीमि' इति बहव ६ 'तयोर्गदायां खलु युद्ध प्रवृत्तमर्जुनदुर्योधनयो ', 'तयोगदायुद्ध वृत्तमेवार्जुनसुयोधनयो ' ७ 'गदाया ', 'गदायुद्धे' ८ 'पुनरस्य' इति क्वचिन्नास्ति ०, 'उत्सृज्य', 'विमुञ्चन्' १० 'स्निग्ध', 'सुश्लिष्ट' ११ 'किं नाम' इति क्वचिन्नास्ति १२ 'देवकल्पेनापि देवेन त्वया' इत्यपि पाठ १३ 'क्षत्रधर्म '

[1]शक्ष्यामि तौ परिघपीवरबाहुदण्डौ
वित्तेशशक्रपुरदर्शितवीर्यसारौ ।
भीमार्जुनौ क्षितितले [3]प्रविचेष्टमानौ
द्रष्टुं तयोश्च निधनेन रिपुं कृतार्थम् ॥ २२ ॥

अयि पाञ्चालराजतनये, मदुर्नयप्राप्तशोच्यदशे, यथा सदीप्यते पावकस्तथा सहितावेव बन्धुजनं सभावयाव ।

द्रौपदी—[4]अज्ज, करेहि दारुसचअम् । पज्जलीअदु चिदा । तुवरदि मे हिअअ णाध पेक्खिदुम् । (सर्वतोऽवलोक्य ।) कह ण को वि णाधेण विणा महाराअस्स वअणं करेदि । हा णाह भीमसेण, त एव्व एदं राअउलं तुए विरहिदं पडिअणो वि सपदं परिहरदि । (क)

राक्षसः—सदृशमिदं भरतकुलवधूना यत्पत्युरनुमरणम् ।

(क) आर्य, कुरु दारुसचयम् । प्रज्वाल्यता चिता । त्वरते मे हृदयं नाथ प्रेक्षितुम् । कथं न कोऽपि नाथेन विना महाराजस्य वचनं करोति । हा नाथ भीमसेन, तदेवेदं राजकुलं त्वया विरहितं परिजनोऽपि साम्प्रतं परिह्रियते ।

शक्ष्यामीति । वित्तेशः कुबेरः । भीमार्जुनौ रिपुं च द्रष्टुं शक्ष्यामि । किं तु न शक्ष्यामि ॥ २२ ॥ **द्रौपदीवाक्ये** । महाराज, आनाय्यता तावद्दारुसचयः । सम्प्रज्वाल्यता चिता । त्वरते मम हृदयं नाथ प्रेक्षितुम् । कथं न कोऽपि नाथेन विना महाराजस्य वचनं करोति । हा नाथ भीमसेन, तदेवेदं राजकुलमिदानीं त्वया विरहितं परिजनोऽपि महाराज परिभवति ॥ समिन्धयामि

---

१ 'शक्ष्यामि नो', 'शक्नोमि तौ' २ 'वित्तेशशक्रवरुणाधिकवीर्यवन्तौ', 'वित्तेशशक्रवरुणाधिकवज्रसारौ' ३ 'परिवर्तमानौ' ४ 'अज्ज, करेहि दारुसचअम् । पज्जलीअदु चिदा । तुवरदि मे हिअअ णाध पेक्खिदुम् । (सवतोऽवलोक्य ।) कह ण को वि महाराअस्स वअणं करेदि । हा णाह, अज्ज तुए विणा महाराओ परिअणेण वि परिहवीअदि', 'अज्ज, करेहि दारुसचअम् । कह ण को वि महाराअस्स वअणं करेदि । हा णाह, अज्ज एसो तुए विणा महाराओ परिअणेण वि परिहवीअदि' इति पाठौ ५ 'भरतकुलवधूना पत्यनुमरणम्', 'भरतकुलवधूना पत्यनुसरणम्'

युधिष्ठिरः—महर्षे, न कश्चिच्छृणोति तावदावयोर्वचनम् । तदिन्धनप्रदानेन प्रसाद क्रियताम् ।

राक्षसः—मुनिजनविरुद्धमिदम् । (स्वगतम् ।) पूर्णो मे मनोरथ । यावदनुपलक्षित समिन्धयामि वह्निम् । (प्रकाशम् ।) राजन्, न शक्नुमो वयमिहैव स्थातुम् । (इति निष्क्रान्त ।)

युधिष्ठिरः—कृष्णे, न कश्चिदस्मद्वचन करोति । भवतु । स्वयमेवाह दारुसचय कृत्वा चितामादीपयामि ।

द्रौपदी—तुवरदु तुवरदु महाराओ । (क)

(नेपथ्ये कलकल ।)

द्रौपदी—(सभयमाकर्ण्य ।) महाराअ, कस्स वि एसो बलदप्पिदस्स विसमो सङ्खणिग्घोसो सुणीअदि । अवर वि अप्पिअ सुणिदु अत्थि णिब्बन्धो तदो विलम्बीअदु । (ख)

युधिष्ठिरः—न खलु विलम्ब्यते । उत्तिष्ठ ।

(इति सर्वे परिक्रामन्ति ।)

युधिष्ठिरः—अयि पाञ्चालि, अम्बाया सपत्नीजनस्य च किंचित्सदिश्य निर्वर्तय परिजनम् ।

(क) त्वरस्व त्वरस्व महाराज ।

(ख) महाराज, कस्याप्येष बलदर्पितस्य विषम शङ्खनिर्घोष श्रूयते । अपरमप्यप्रिय श्रोतुमस्ति निर्बन्धस्ततो विलम्ब्यताम् ।

दीपयामि ॥ **द्रौपदीवाक्ये** । त्वरता त्वरता महाराज । महाराज, कस्याप्येष बलदर्पितस्य विषम शङ्खनिर्घोष श्रूयते । तदपर किमपि श्रोतव्य तदा

---

१ 'महर्षे' इति क्वचिन्नास्ति २ 'कश्चिदिदानीं शृणोति' ३ 'इन्धनप्रदानेन प्रसाद कर्तुमर्हसि' इति पाठ ४ 'पूर्णा मे मनोरथा' इति बहव ५ 'समीपे ऽहमिन्धनमादीपयामि' इत्यपि पाठ ६ 'वयमिहैव स्थातुम्' 'वयमवस्थातुमिति' ७ 'कृष्णे, न कश्चिदिदानीमेतत्करिष्यति । भवतु । स्वयमेव शुष्कदारुसचय कृत्वा चितानलेनात्मानमात्मना दीपयामि' इति केचित्पठन्ति ८ 'तेजोबलदप्पिदस्स विसमो सङ्खणिग्घोसो', 'तेजोबलदप्पिदस्स णिग्घोसो', 'तेजोबहलदप्पिदस्त णिग्घोसो' ९ 'विलम्बीअदि'. १० 'तत्रभवत्या अम्बाया' ११ 'निवार्यतां परिजन' इति पाठ .

द्रौपदी—[1]महाराअ, अम्बाए एव्व सदिसिस्सम्—'जो सो [2]बअहिडिम्बकिम्मीरजडासुरजरासधविजअमल्लो वि दे मज्झमपुत्तो मम हदासाए पक्खवादेण परलोअ गदो' त्ति । (क)

युधिष्ठिरः—भद्रे बुद्धिमतिके, उच्यतामस्मद्वचनादम्बा ।

येनासि तत्र जतुवेश्मनि दीप्यमाने
[3]निर्वाहिता सह सुतैर्भुजयोर्बलेन ।
तस्य प्रियस्य बलिनस्तनयस्य पाप-
[4]मा[5]ख्यामि तेऽम्ब कथयेत्कथमीदृगन्य ॥ २३ ॥

आर्य जयधर, [6]त्वया सहदेवसकाश गन्तव्यम् । वक्तव्यश्च [7]तत्र-भवान्द्रेय कनीयान्सकलकुरुकुलकमलाकरदावानलो युधिष्ठिर पर

(क) महाराज, अम्बायै एव सदेक्ष्यामि—'य स बकहिडिम्बकिर्मीरजटासुरजरासधविजयमल्लोऽपि ते मध्यमपुत्रो मम हताशाया पक्षपातेन परलोक गत ' इति ।

विलम्ब्यताम् । अत्र निर्घोष शब्द ॥ **द्रौपदीवाक्ये** । महाराज, अम्बायै एतत्सदेष्टव्यम्—'योऽसौ बकहिडिम्बकिर्मीरजटासुरजरासधविजयमल्लो मध्यमपुत्रस्ते स मम हताशाया पक्षपातेन परलोक गत ' इति ॥ **येनेति** । निर्वाहिता रक्षिता । ते आख्यामि तुभ्य कथयामि । अन्यो मत्त इति शेष । मदन्य क ईदृश दु ख कथयेत् । कि तु न कोऽपीत्यर्थ ॥ २३ ॥ प्रियश्चासावनुजश्चेति विग्रह । 'बहुच्यनियम ' इति प्रियस्यैव पूर्वनिपात. । अर्थात्सहदेवम् । अग्रति

१ 'एव्व महाराअ, अम्बाए सदिसिस्सम्' इति वा पाठ २ 'बअहिडिम्बकिम्मीरजरासधजअमल्लो' इति पाठ ३ 'निर्वासिता' ४ 'कोऽन्यस्तवाम्ब कथयेत्कथमीदृशस्य' इति बहुसमत पाठ 'आख्यामि तेऽम्ब कदन कथमीदृशस्य', 'आख्यामि तेऽम्ब नृपशु कथमीदृगन्यत्' इत्यपि पाठौ ५ 'त्वमपि सहदेवसकाश गच्छ', 'त्वमपि सहदेवमकाश गत्वा', 'त्वयापि सहदेवसकाश गत्वा' ६ 'तत्रभवान्पाण्डुकुलबृहस्पतिमाद्रेय कनीयानस्माक स कुरुकुलकमलाकरदावानल ', 'तत्रभवान्पाण्डुकुलबृहस्पतिमाद्रेय कनीयानस्माक स कुरुकुलकाननदावानल ', 'तत्रभवान्पाण्डुकुलबृहस्पतिर्वैमात्रेय कनीयानस्माक सकलकुरुकुलकमलाकरदावानल ', 'तत्रभवान्पाण्डुकुलबृहस्पतिर्वैमात्रेय सकलकुरुकुलकमलाकरवाडवानल ' इति पाठान्तराणि.

मभिप्रस्थित[1] प्रियानुजमप्रतिकूल सततमाशसनीयमसमूढ[2] व्यसने-ऽभ्युदये च भवन्तमविरलमालिङ्ग्य[3] शिरसि चाघ्रायेद[4] प्रार्थयते—

मम हि वयसा दूरेणाल्प श्रुतेन समो भवा-
न्सहजकृपया बुद्ध्या ज्येष्ठो मनीषितया गुरु[5] ।
शिरसि मुकुलौ पाणी कृत्वा भवन्तमतोऽर्थये
मयि विरलता नेय स्नेह[6] पितुर्भव वारिद ॥ २४ ॥

अपि च । बालिशचरितस्य[7] नित्याभिमानिनोऽस्मत्सदृशहृदयसार-स्यापि नकुलस्य ममाज्ञया वचने स्थातव्यम् । नानुगन्तव्यास्मत्पदवी । त्वया हि वत्स,

विस्मृत्यास्मान्श्रुतिविशदया[8] प्रज्ञया सानुजाश्च
पिण्डान्पाण्डोरुदकपृषतानश्रुगर्भान्प्रदातुम् ।
दायादानामपि तु भवने यादवाना कुले वा
कान्तारे वा कृतवसतिना रक्षणीय शरीरम् ॥ २५ ॥

गच्छ जयधर, अस्मच्छरीरस्पृष्टिकया शापितेन[9] भवताऽकालहीन-मिदमवश्यमावेदनीयम् ।

कूलमायत्तम् । आशसनीय प्रत्याशार्हम् । विपत्तावमूढमसुग्वम् । आघ्राय परिचुम्ब्य । **ममेति** । दूरेणाधिकेन । श्रुतेनाध्ययनेन । सहजा स्वाभाविकी कृपा दया यस्या तया । 'धीरो मनीषी ज्ञ प्राज्ञ' इत्यमर । मुकुलौ पाणी कृत्वा ऽञ्जलिं बद्ध्वा । अतोऽर्थय इद याचे । मयि स्नेहो विरलता कृशत्व नेय । अतो जलप्रद पितरि भवेत्यन्वय ॥ २४ ॥ बालिशो मूर्ख । **विस्मृत्येति** । सानु-जानस्मान्प्रज्ञया विस्मृत्य पाण्डोरुदकपृषतान्प्रदातु त्वया शरीर रक्षणीयमित्य-न्वय । 'पृषन्ति बिन्दुपृषता पुमास' इत्यमर । श्रुतिरध्ययनम् । वसतिर्वास ॥ २५ ॥ शापितेन मदङ्गशपथवता । अकालहीनमसमयेऽयोग्यम् ॥ **द्रौपदी**

---

१ 'प्रियमनुजमनुकूल' इति पाठ २ 'आशसनीयमसमूढ' इत्यत्र 'आसन्न' इति क्वचित्पाठ ३ 'धृतिमन्त भवन्त' इति बहुसमत पाठ ४ 'अचिर' ५ 'दूरेण त्व' ६ 'कृतसहजया बुद्ध्या', 'सहजकृतया बुद्ध्या' ७ 'बालिशचरितस्य विद्याभि-मानिनो मद्धृदयसारस्य', 'बाल्ये सवर्धितस्य नित्यमभिमानिनोऽस्मत्सदृशहृदयसारस्य', 'बाल्ये सवर्धितस्य नित्यमभिमानिनोऽस्मसदृशहृदयसारस्य' इति पाठान्तराणि ८ 'श्रुतविशदया स्वाग्रजौ चात्मबुद्ध्या क्षीणे पाण्डावुदकपृषतानश्रुगर्भा प्रदातुम्' इति पाठ ९ 'शापितोऽसि । त्वयाऽकालहीनमिदमवश्यमावेदनीयम्' इति पाठ

द्रौपदी—हला बुद्धिमदिए, भणाहि मह वअणेण पिअसहीं सुभद्दाम्—'[1]अज्ज वच्छाए उत्तराए अवण्णसत्ताए चउत्थो मासो वट्टदि । सव्वधा णाविउले त णिक्खिवेसि । कदा वि इदो परलोअगदस्स [2]ससुरउलस्स अह्माण वि सलिलबिन्दुदो भविस्सदि' त्ति । (क)

युधिष्ठिरः—([3]साक्षम् ।) भो कष्टम् ।

[4]शाखारोधस्थगितवसुधामण्डले मण्डिताशे
पीनस्कन्धे सुसदृशमहामूलपर्यन्तबन्धे ।
दग्धे दैवात्सुमहति तरौ तस्य सूक्ष्माङ्कुरेऽस्मि-
न्नाशाबन्ध कमपि कुरुते छाययार्थी जनोऽयम् ॥ २१

[5]साधु । इदानीमध्यवसित करणीयम् । ([6]कञ्चुकिनमवलोक्य ।) [7]आर्य जयधर, स्वशरीरेण शापितोऽसि तथापि न गम्यते ।

(क) हला बुद्धिमतिके, भण मम वचनेन प्रियसखीं सुभद्राम्—'अद्य वत्साया उत्तराया आपन्नसत्वायाश्चतुर्थो मासो वर्तते । सर्वथा नाभीकुले ता निक्षिपसि । कदापीत परलोकगतस्य श्वशुरकुलस्यास्माकमपि सलिल-बिन्दुदो भविष्यति' इति ।

वाक्ये । हञ्जे बुद्धिमतिके, भणिष्यसि मम वचनेन सुभद्रा प्रियसखीम्—'अद्य वत्साया उत्तराया आपन्नसत्वायाश्चतुर्थो मासो वर्तते । तदेना शीघ्रमात्मनो नाभी कुल सत्य प्रवेक्ष्यसि । कदाप्येतेनापि परलोकगतस्यास्माक श्वशुरकुलस्योदक-बिन्दुर्भविष्यति' । अत्रापन्नसत्वा गर्भवती । नाभीकुल पितृकुलम् । **शाखेति** । रोधोऽवरोध । आधिक्यमिति यावत् । स्कन्धस्तरुप्रकाण्ड । पर्यन्तबन्ध परिवारबन्धनम् । ईदृशि तरौ दग्धे सति तस्याङ्कुर आशाबन्धमय जन कुरुत इत्यन्वय । 'आशाबन्ध समाश्वासे तथा मर्कटजालके' इति विश्व ।

---

१ 'वच्छाए उत्तराए चउत्थो मासो पडिवण्णस्स गब्भस्स । तुम एव्व कुलप-डिट्ठाअव सावहाण रक्ख त्ति । कदा वि इदो लोअगदस्स ससुरउलस्स अह्माण अ सलिलबिन्दुदो भविस्सदि त्ति' इति पुस्तकान्तरे पाठ २ 'गुरुउलस्स' ३ (सा स्रम् ।)' इति क्वचिन्नास्ति ४ 'शाखारोह—' ५ 'पर्यङ्कबन्धे' ६ 'द्रौपदि, साध-येदानीमध्यवसितम् ।' इति बहुसमत पाठ, क्वचिदय पाठो नास्ति ७ 'आर्य जयधर, असच्छरीरेण शापितोऽसि', 'जयधर, असच्छरीरेण शापितोऽसि', 'आर्य, स्वशरीरेण शापितोसि' इति पाठान्तराणि

कञ्चुकी—(साक्रन्दम् ।) हा देव पाण्डो, तव सुतानामजातशत्रु-भीमार्जुननकुलसहदेवानामय दारुण परिणाम । हा देवि कुन्ति भोजराजभवनपताके,

भ्रातुस्ते तनयेन शौरिगुरुणा श्यालेन गाण्डीविन-
स्तस्यैवाखिलधार्तराष्ट्रनलिनीव्यालोलने दन्तिन ।
आचार्येण वृकोदरस्य हलिनोन्मत्तेन मत्तेन वा
दग्ध त्वत्सुतकानन ननु मही यस्याश्रयाच्छीतला ॥२७॥

(इति रुदन्निष्क्रान्त ।)

युधिष्ठिरः—जयधर जयधर,

(प्रविश्य)

कञ्चुकी—आज्ञापयतु देव ।

युधिष्ठिरः—वक्तव्यमिति ब्रवीमि । न पुनरेतावन्ति भागधेयानि नः । यदि कदाचिद्विजयी स्याद्वत्सोऽर्जुनस्तद्वक्तव्योऽस्मद्वचनाद्भवता ।

छायया अर्थी छायार्थक ॥ २६ ॥ **भ्रातुरिति** । ते भ्रातुर्वसुदेवस्य । शौरिगुरुणा कृष्णज्येष्ठेन । व्यालोलना व्याघट्टना । तस्य भीमस्य । आचार्येण गुरुणा । हलिना बलेनाथ च हलवाहकेन । उन्मत्तेनातिक्षीबेनाथ चोन्मादिना ॥ २७ ॥

---

१ 'दशापरिणाम' २ 'भोजकुलपताके' ३ 'नलिनव्यालोलने दन्तिन', 'नलिनीव्यालोडनादन्तिन' इति पाठौ ४ 'दग्ध त्वत्सुतकानन तव पुरी यच्छायया शीतला', 'दग्ध त्वत्सुतकानन तव मही यच्छायया शीतला', 'दग्ध तत्सुतकानन तव मही यस्याश्रयाच्छीतला', 'दग्ध तत्सुतकानन समभवद्यस्याश्रय शीतल' इति पाठान्तराणि ५ 'जयधर जयधर' इत्यत्र 'आर्य जयधर' अथवा 'जयधर' इति पाठ ६ 'वक्तुमिच्छामि । न पुनरेतावन्ति भागधेयानि युष्माकम् ।' इति बहुषु पुस्तकेषु पाठ ७ 'यदि कदाचिद्विजयी स्याद्वत्सोऽर्जुनस्तदासौ वक्तव्योऽस्मद्वचनाद्भवता', 'यदा कदाचिद्विजयी स्याद्वत्सो मेऽर्जुनस्तद्वक्तव्योऽस्मद्वचनाद्भवता', 'कदाचिद्विजयी स्याद्वत्सोऽर्जुनस्तदासौ वक्तव्यो भवता' इति पाठान्तराणि

हली हेतु सत्य भवति मम वत्सस्य निधने
तथाप्येष भ्राता सहजसुहृदस्ते मधुरिपोः ।
[3]अत क्रोध कार्यो न खलु [4]यदि च प्राणिषि ततो
वन गच्छेर्मा गा[5] पुनरकरुणा क्षात्रपदवीम् ॥ २८ ॥

कञ्चुकी—[6]यदाज्ञापयति देव. । (इति निष्क्रान्त ।)

युधिष्ठिरः—(अग्निं दृष्ट्वा सहर्षम् ।) [7]कृष्णे, ननूद्धतशिखाहस्ताहू-तासद्विधव्यसनिजन समिद्धो भगवान्हुताशनस्तत्रेन्धनीकरोम्यात्मानम् ।

द्रौपदी—[8]पसीददु पसीददु महाराओ इमिणा अपच्छिमेण पणएण । [9]अहं दाव अग्गदो पविसामि । (क)

[10]युधिष्ठिरः—सहितावेवाभ्युदयमुपभोक्ष्यावहे ।

चेटी—[11]हा भअवन्तो लोअवाला, परित्ताअह परित्ताअह । एसो

(क) प्रसीदतु प्रसीदतु महाराजोऽनेनापश्चिमेन प्रणयेन । अहं तावदग्रत प्रविशामि ।

(ख) हा भगवन्तो लोकपाला, परित्रायध्व परित्रायध्वम् । एष खलु

हलीति । हेतु कारणम् । प्राणिषि जीवसि । गच्छेर्गमिष्यसि । क्षात्रपदवी क्षत्रियपथम् । पुनर्मा गा न गमिष्यसि । 'मा गा' इति माङ्योगे आशसाया लुङ् 'न माङ्योगे' इत्यटो निषेध ॥ २८ ॥ **द्रौपदीवाक्ये** । प्रसीदतु प्रसीदतु महाराजोऽपश्चिमेनानेन प्रणयेन । अहं तावदग्रत प्रविशामि । अत्रापश्चिमेन प्रथमेन सत्येन वा । 'प्रणय प्रेम्णि याच्ञायाम्' इति धरणि ॥ **चेटीवाक्ये** ।

---

१ 'इह' २ 'मयि च प्रेम भवता' इत्यपि पाठ ३ 'यथा' ४ '(अग्निं दृष्ट्वा सहर्षम् ।)' इत्यत्र '(सहर्षम् ।)' इति पुस्तकान्तरे पाठ ५ 'कृष्णे, ननूद्धत–' इत्यत्र 'कृष्णे, नन्वयमुद्धत–', 'ननूद्धत–' इति वा पाठ ६ 'शिखाहूतासद्वि-धव्यसनिजन समिद्धो भगवान्हव्यभुग्' इति क्वचित्पाठ ७ 'यदा तदा चेन्धनी-करोम्यात्मान', 'तत्रेन्धनमात्मान करिष्ये' इति पाठौ ८ 'पसीददु पसीददु महाराओ मम इमिणा', 'पसीददु महाराओ मम इमिणा' ९ 'अहं एव्व दाव अग्गदो प्पविसामि', 'अहं एव्व अग्गदो गमिस्सम्' १० 'युधि०—यद्येव सहितावेवाभ्युदयमुपभोक्ष्यावहे', 'युधि०—यद्येव सहितावेवाभ्युदयमपि भोक्ष्यावहे' इति पाठौ ११ 'हा भवन्तो लोअवाला, परित्ताअह । सोमवसराएसी अअ क्खु राआ राअसूअसतप्पिदहुदवहो' इति वा पाठ

क्खु सोमवसराएसी राअसूअसतप्पिदहव्ववाहो खण्डवसतप्पिद-हुदवहस्स किरीडिणो जेट्ठो भादा सुग्गहीदणामहेओ महाराअजुहि-ट्ठिरो। एसा वि पाञ्चालराअतणआ देवी वेदिमज्झसभवा जण्ण-सेणी। दुवे वि णिक्करुणजलणस्स प्पवेसेण इन्धणीहोन्ति। ता परित्ताअह अज्जा, परित्ताअह। कध ण को वि परित्ताअदि। (तयोरग्रत पतित्वा।) किं ववसिद देवीए देवेण अ। (ख)

युधिष्ठिरः—अयि बुद्धिमतिके, यद्वर्त्सलेन प्रियानुजेन विना सदृश तत्। उत्तिष्ठोत्तिष्ठ भद्रे, उदकमुपानय।

सोमवशराजर्षी राजसूयसतर्पितहव्यवाह खाण्डवसतर्पितहुतवहस्य किरी-टिनो ज्येष्ठो भ्राता सुगृहीतनामधेयो महाराजयुधिष्ठिर। एषापि पाञ्चाल-राजतनया देवी वेदिमध्यसभवा याज्ञसेनी। द्वावपि निष्करुणज्वलनस्य प्रवेशेनेन्धनीभवत.। तत्परित्रायध्वमार्या, परित्रायध्वम्। कथ न कोऽपि परित्रायते। किं व्यवसित देव्या देवेन च।

भगवन्तो लोकपाला., परित्रायध्व परित्रायध्वम्। एष खलु सोमवशराजर्षी राज-सूयसतर्पितहव्यवाह खाण्डववनादीपनजननस्य किरीटिनो ज्येष्ठभ्राता सुगृहीत-नामधेयो महाराजयुधिष्ठिर। एषापि पाञ्चालराजतनया देवी वेदिमध्यसभवा याज्ञसेनी। द्वावप्येतौ निष्करुणज्वलनस्य प्रवेशेनेन्धनीभवत। तत्परित्रायध्व-मार्या, परित्रायध्वम्। कथ न कोऽपि परित्रायते। किं व्यवसित देवेन देव्या च॥

---

१ 'एसा देवी पाञ्चालराअकुलदेवदा' इति पाठ २ 'जण्णवेदिमज्झसभवा' ३ दुवे वि सरीरेण णिक्करुणस्स कालाणलस्स इन्धणीहोन्ति। परित्ताअह परित्ताअह। (तयोरग्रत पतित्वा।) किं ववसिद देवीए देवेण अ' इत्यपर पाठ ४ 'नाथेन', ५ 'सदृशम्। तदुत्तिष्ठोत्तिष्ठ। सलिलमुपानय', 'सदृश तत्। उत्तिष्ठोत्तिष्ठ। सलिलमुपानय', 'सदृश तत्। भद्रे, उत्तिष्ठोत्तिष्ठ। सलिलमुपनय' इति पाठान्तराणि. ६ 'उपानय' इत्यसादनन्तर 'चेटी—ज देवो आणवेदि। (इति निष्क्रम्य पुन. प्रविश्य च।) जेदु जेदु महाराओ। युधि०—पाञ्चालि, त्वमपि तावत्स्वपक्षपातिनो ('तावत्त्वत्पक्षपातिन.' इत्यपि पाठ) वृकोदरस्य प्रियस्यार्जुनस्योदकक्रियां कुरु। द्रौपदी—महाराओ एव्व करेदु। अह उण जलण पविसिस्सम्। युधि०—अनति-क्रमणीय लोकवृत्तम्। भद्रे, उदकमुपानय।' इत्यधिक पाठो बहुषु पुस्तकेषु वर्तते.

(चेटी तथा करोति ।)

युधिष्ठिरः—([1]पादौ प्रक्षाल्योपस्पृश्य च ।) [2]एष तावत्सलिलाञ्जलि-र्गाङ्गेयाय भीष्माय गुरवे [3]प्रपितामहाय शान्तनवे । अयमपि पिता-महाय विचित्रवीर्याय । (साश्रम् ।) [4]तातस्याधुनावसर । [5]अय ताव-त्स्वर्गस्थिताय सुगृहीतनाम्ने पित्रे पाण्डवे ।

अद्यप्रभृति [6]वारीदमस्मत्तो दुर्लभ पुन ।
तात [7]माद्र्यम्बया सार्ध [8]मया दत्त निपीयताम् ॥ २९ ॥

[9]एतज्जल जलजनीर्ल[10]विलोचनस्य
भीम[11]प्रियस्य मम चाप्यविभक्तमस्तु ।
[12]एक क्षण विरम वत्स पिपासितोऽपि
पातु त्वया सह जवादयं[13]मागतोऽस्मि ॥ ३० ॥

अथवा सुक्षत्रियाणा गतिमुपगत [14]वत्समहमुपगतोऽप्यकृती द्रष्टुम् । [15]वत्स भीमसेन,

---

उपस्पृश्याचम्य । गाङ्गेयाय भीष्माय । शान्तनवे शान्तनुनाम्ने । **अद्येति** । हे तात, मया दत्तमेतज्जल माद्र्यम्बया सह निपीयताम् ॥ २९ ॥ **एतदिति** । जलजस्य लीला विलासो यत्र तत् । भीमप्रियस्य प्रीतिविषयभीमस्य । अविभक्त साधारणम् । हे वत्स भीम । विरम विरक्तो भव । त्वया सह पातु वेगादयमहमागतोऽस्मीत्यन्वय ॥ ३० ॥ गतिं स्वर्गम् ।

---

१ 'मुख' २ 'प्रपितामहाय शान्तनवे पितामहाय विचित्रवीर्याय', 'प्रपितामहाय शान्तनवे पितामहाय विचित्रवीर्याय', 'अयमपि प्रपितामहाय शान्तनवे पितामहाय विचित्रवीर्याय' इति पाठान्तराणि ३ 'तात, तवाधुनावसर', 'तातस्येदानीमवसर' ४ 'अयमपि तत्रभवते स्वर्गस्थाय गुरवे सुगृहीतनाम्ने पित्रे पाण्डवे' इति बहुसमत पाठ ५ 'वा दत्त' ६ 'माद्र्याम्बया', 'त्वयाम्बया' ७ 'एतद्दत्त निपीयताम्' इति बहुपुस्तकाना पाठ ८ 'नीलविलोचनाय', 'नीलविलोचनस्य' ९ 'भीमस्य तस्य मम चाप्यविभक्तमस्तु', 'भीमाय भीस्तव ममाप्यविभक्तमस्तु' इति पाठौ १० 'एक क्षण तु विषद्दस्व पिपासितोऽपि' इति वा पाठ ११ 'अह' १२ 'वत्समहं मृतो-ऽप्यकृती द्रष्टुम्', 'वत्स किमहमुपागतोऽपि प्राप्स्यामि द्रष्टु भीमसेनम्', 'वत्समहमु-पगतोऽपि न पाप प्राप्नोमि द्रष्टु भीमम्' इति पाठान्तराणि १३ 'तात भीम'

मया पीत[1] पीत[2] तदनु भवताम्बास्तनयुग
मैदुच्छिष्टैर्वृत्ति[3] जनयसि रसैर्वत्सलतया ।
वितानेष्वप्येव तव[4] मम च सोमे[5] विधिरभू-
न्निवापाम्भ पूर्वं पिबसि कथमेव[6] त्वमधुना ॥ ३१ ॥

कृष्णे[7], त्वमपि देहि सलिलाञ्जलिम् ।

द्रौपदी—हञ्जे बुद्धिमदिए[8], उवणेहि मे सलिलम् । (क)

(चेटी तथा करोति ।)

द्रौपदी—(उपसृत्य जलाञ्जलिं पूरयित्वा ।) महाराअ[9], कस्स[10] सलिलं देम्हि । (ख)

तस्सै[11] देहि जल कृष्णे सहसा गच्छते दिवम् ।
अम्बापि येन गान्धारी[12]रुदितेन सखीकृता ॥ ३२ ॥

(क) हञ्जे बुद्धिमतिके, उपनय मे सलिलम् ।

(ख) महाराज, कस्य सलिलं ददामि ।

मयेति । तदनु तत्पश्चात् । रसैर्दुग्धै । वृत्तिं वर्तनम् । वितान यज्ञ । 'क्रतु-विस्तारयोरस्त्री वितानम्' इत्यमर । साम्यो विधि सम प्रकार । साम्य इति चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् । 'साम्ये विधि' इति पाठे साम्ये तुल्यत्वे विधिरित्यर्थ । 'सोमे विधि' इति पाठे सोमलताद्रवपानेऽय प्रकार इत्यर्थ । निवाप पितृदेयम् ॥ ३१ ॥ **द्रौपदीवाक्ये** । हञ्जे बुद्धिमतिके, उपनय मे सलिलम् ॥ महाराज, कस्य सलिल ददामि । **तस्मा इति** । सहसा शीघ्र जल देहीत्यन्वय । येन गान्धारीरुदितेनाम्बापि सखीकृता रोदनवती कृतेत्यर्थ ॥३२॥

---

१ 'पूर्व' २ 'अम्बस्तनयुग' ३ 'मयोच्छिष्टै' ४ 'वितानेष्वेव वा' ५ 'तव च मम' ६ 'साम्यो विधि', 'साम्ये विधि', 'सोऽय विधि' ७ 'मम वत्स'. ८ 'कृष्णे, देहि जलाञ्जलिं तत्रभवते भीमाय' इति वा पाठ ९ 'देहि मे उदअम्' इति बहव पठन्ति १० 'महाराज, कस्स सलिल देह्मि' इत्यत्र 'कस्स जल देह्मि' इति पुस्तकान्तरे पाठ ११ 'तस्मै देहि जल पूर्व सहसा गच्छते दिवम्', 'तस्मै देवि जल देहि सहसा यो गतो दिवम्' इति पाठौ १२ 'गान्धार्या रुदितेन सखीकृता', 'गान्धार्या रुदितेन समीकृता', 'गान्धार्या रुदितेषु सखीकृता'.

द्रौपदी—णाह[1] भीमसेण, परिअणोवणीद उदअं सग्गगदस्स दे पादोदअ भोदु । (क)

युधिष्ठिरः—फाल्गुनाग्रज,[2]

असमाप्तप्रतिज्ञेऽपि याते[3] त्वयि महाभुजे ।
मुक्तकेश्यैव दत्तस्ते[4] प्रियया सलिलाञ्जलि ॥ ३३ ॥

द्रौपदी—उट्ठेहि महाराअ, दूर गच्छदि दे भादा । (ख)

युधिष्ठिरः—(दक्षिणाक्षिस्पन्दन सूचयित्वा ।) पाञ्चालि, निमित्तान मे कथयन्ति[5] सभावयिष्यसि वृकोदरमिति ।

द्रौपदी—महाराअ, सुणिमित्त भोदु । (ग)

(नेपथ्ये कलकल[6] ।)

(प्रविश्य सभ्रान्त ।)

कञ्चुकी—परित्रायता परित्रायता महाराज[7] । एष खलु दुरात्मा

(क) नाथ भीमसेन, परिजनोपनीतमुदक स्वर्गगतस्य ते पादोदक भवतु ।

(ख) उत्तिष्ठ महाराज, दूर गच्छति ते भ्राता ।

(ग) महाराज, सुनिमित्त भवतु ।

द्रौपदीवाक्ये । नाथ भीमसेन, परिजनोपनीतमुदक स्वर्गगतस्य ते पादोदक भवतु ॥ फाल्गुनोऽर्जुन । **असमाप्तेति** । मुक्तोऽबद्ध ॥ ३३ ॥ **द्रौपदीवाक्ये** । महाराज, उत्तिष्ठोत्तिष्ठ । दूर गच्छति मे भर्ता ॥ सभावयिष्यसि प्राप्स्यसि ॥ **द्रौपदीवाक्ये** । महाराज, सुनिमित्त भवतु ॥

---

१ 'णाह भीमसेण, परिअणोवणीद सग्गगदस्स दे पादोदअ भोदु एदम्', 'णाह, परिजणोवणीद सग्गगदस्स पादोदअ भविस्सदि एदम्' इति पाठौ २ 'तात फाल्गुनाग्रज' ३ 'अपि याते त्वयि ममानुजे', 'अपि जाते त्वयि ममानुजे', 'अस्त याते त्वयि महाभुजे', 'अस्त गते त्वयि महाभुजे' इति नानापुस्तकाना नानाविध पाठ ४ 'ते दत्त प्रियया सलिलाञ्जलि', 'दत्तस्ते प्रिययाद्य जलाञ्जलि' इति पाठौ ५ 'कथयन्त्यहत वृकोदरम् । द्रौपदी—सुणिमित्त भोदु ।', 'कथयन्ति स्वय सभावयामि वृकोदरमिति । भवतु शीघ्रतरमनुगच्छामि । द्रौपदी—सुणिमित्त भोदु ।', 'कथयन्ति सभावयसि वृकोदरमिति । भवतु शीघ्रं दहनमुपसर्पाव । द्रौपदी—आ, पज्जलिदो भअव हुदवहो ।' इति पाठान्तराणि ६ 'महान्कलकल', 'महाकलकल' ७. 'महाराज'.

कौरवापसद[1] क्षतजाभिषेकपाटलिताम्बरशरीरः[2] समुच्छ्रितदिग्धभीषण-गदाशक्तिरुद्यतकालदण्ड[3] इव कृतान्तोऽत्रभवती पाञ्चालराजतनया-मितस्तत परिमार्गमाण इत एवाभिवर्तते[4]।

युधिष्ठिरः—हा दैव, ते[5] निर्णयो जात। हा गाण्डीवधन्वन्,

(इति मुह्यति।)

द्रौपदी—हा अज्जउत्त, हा मम सअवरसअंगाहदुल्ललिद, पिअ भादुअ अणुगदोसि। ण उण महाराअ इमं दासजणं अ। (इति मोह-मुपगता।) (क)

युधिष्ठिरः—हा वत्स सव्यसाचिन्, हा त्रिलोचनाङ्गनिष्पेष-मल्ल, हा निवातकवचोद्धरणनिष्कण्टकीकृतामरलोक, हा बदर्याश्रम-मुनिद्वितीयतापस, हा द्रोणाचार्यप्रियशिष्य, हा अस्त्रशिक्षाबलपरि-

(क) हा आर्यपुत्र, हा मम स्वयवरस्वयंग्राहदुर्ललित, प्रिय भ्रातरमनु-गतोऽसि। न पुनर्महाराजमिमं दासजनं च।

क्षतज रक्तम्। अम्बर वास। दिग्धो व्याप्त। गदाशक्ति शक्तिरत्न-भेदस्तद्वद्देत्यर्थ॥ **द्रौपदीवाक्ये**। हा नाथ भीमसेन, हा मम स्वय वरस्वयंग्राहदुर्ललित, भ्रातृप्रिय, परलोकमनुगतोऽसि। न पुनर्महाराजमिमं च दासजनम्। अत्र स्वयवररूपस्वयंग्राह इत्यर्थ॥ सव्यसाचिन्नर्जुन। निष्पेषो युद्धम्। निवातेति। निवातकवचनामकदैत्यहननेन निःशत्रीकृतसुरलोक इत्यर्थ। बदर्याश्रमो बदरिकाश्रमः। द्वितीयतापस प्रथमस्तत्पतिर्द्वितीयोऽयमित्यर्थ।

१ 'कौरवाधम' २ 'क्षतजाभिषेकपाटलीकृताम्बर', क्षतजाभिषिक्तपाटलिता-म्बर' ३ 'रक्तभीषणगदापाणिरुद्यत्कालदण्ड', 'रक्तभीषणगदाशनिरुद्धतकालदण्ड' ४ 'अन्तक.' ५ 'अभिवर्तते' इत्यसादनन्तर 'तत्परित्रायता परित्रायता महाराज' इति क्वचिदधिक पाठ ६ 'तेन' ७. 'हा मम सअवरसअगहकुटुम्बिअ, धणजअ' 'मम सअवरससगाहकुटुम्बिअ, धणजअ', 'मम सअवरसअगहकुटुम्ब, धणजअ' इति नानाविध पाठ ८ 'भादुअ सभावेसि', 'भादुअ विओदर सभावेसि' इति पाठौ ९. 'इम दासजण अ' इति क्वचिन्नास्ति. १० युधि०—हा असदृशमल्ल, हा निवातकवचोद्धरणनिष्कण्टकीकृतामरलोक', 'युधि०—हा असदृशमल्ल, हा निवातकवचोद्धरण, हा निष्कण्टकीकृतामरलोक' इति पाठौ ११. 'हा बदर्याश्रम मुनिद्वितीयतापस, हा साहसिक, हा द्रोणाचार्यवत्सल, हा वत्सार्जुन' इति क्वचित्पाठ। क्वचित्पाठो दृश्यते तत्र 'हा अस्त्रशिक्षा—' इत्यसादारभ्य 'राजहंस' इत्यन्त नास्ति

तोषितगाङ्गेय, हा राधेयकुलकमलिनीप्रालेयवर्ष हा गन्धर्वनिर्वासित-दुर्योधन, हा पाण्डवकुलकमलिनीराजहंस,

ता वत्सलामनभिवाद्य विनीतमम्बा
गाढं च मामनुपगुह्य मयाप्यनुक्त ।
एता स्वयंवरवधूं दयितामदृष्ट्वा
दीर्घप्रवासमयि तात कथं गतोसि ॥ ३४ ॥

(मोहमुपगत ।)

कञ्चुकी—(चेटी प्रति ।) इदानीं भो कष्टम् । एष कौरवाधमो यथेष्टमिहैव प्रवर्तते । सर्वथायं प्रवेशकाल । चितासमीपमुपनयाम्यत्रभवतीं पाञ्चालराजतनयाम् । अहमप्येवमेवानुगच्छामि । भद्रे, त्वमपि देव्या भ्रातरं धृष्टद्युम्नं नकुलसहदेवौ वाऽवामुहि । एवमवस्थिते महाराजेऽस्तमितयोर्भीमार्जुनयो कुतोऽत्र परित्राणाशा ।

चेटी—परित्ताहअ परित्ताहअ अज्जा । (क)

(क) परित्रायध्व परित्रायध्वमार्या. ।

तामिति । तामम्बां विशिष्यानभिवाद्य गतोऽसीत्यन्वय । वत्सला वात्सल्यवतीम् । अनुपगुह्यानालिङ्ग्य । अनुक्तोऽस्मीकृत । दीर्घप्रवासं मरणम् । तातानुकम्प्य । 'तातोऽनुकम्प्ये जनके' इति विश्व ॥ ३४ ॥ **चेटीवाक्ये** । परित्रायध्व परित्रायध्वमार्या ॥ गृध्रादीना भूयिष्ठ प्रचुरो

१ 'सुयोधन' २ 'अनभिवन्द्य' ३ 'सदृशीमदृष्ट्वा', 'सदृशीमपृष्ट्वा' ४ 'अयि वत्स', 'अपि वत्स', ५. 'इति मोहमुपागता.', 'इति मोहमुपगत ' ६. 'कञ्चुकी—भो: कष्टम् । एष दुरात्मा सुयोधनो यथेष्टमित एवाभिवर्तते । सर्वथा सप्रत्ययमेव कालोचित प्रतीकार. । भद्रे बुद्धिमतिके, चितासमीपमुपनयात्रभवतीं पाञ्चालराजतनयाम् । (चेटी प्रति ।) भद्रे, त्वमपि देव्या भ्रातर धृष्टद्युम्न नकुलसहदेवौ वा ब्रूहि । अथवा एवमेव स्थिते महाराजेऽस्तमितयोर्भीमार्जुनयो क्व नु परित्राणम्', 'कञ्चुकी—भो कष्ट कष्टम् । इदानीमय दुरात्मा कौरवाधमो यथेष्टमित एवाभिवर्तते । सर्वथा सप्रत्ययमेव कालोचित प्रतीकार । चितासमीपमुपनयाम्यत्रभवतीं पाञ्चालराजतनयाम् । (चेटीमुद्दिश्य ।) त्वमपि भद्रे, देव्या भ्रातर धृष्टद्युम्न नकुलसहदेवौ च यथाचारमाक्रन्द । अथवा एवमवस्थे महाराजे अस्तमितयोर्भीमार्जुनयो कुतोऽत्र परित्राणाशा' इति पाठौ ७. इद चेटीवाक्य बहुषु पुस्तकेषु न दृश्यते

(नेपथ्ये कलकलानन्तरम् ।)

भो भो, समन्तपञ्चकसचारिण क्षतजासवमत्तयक्षराक्षसपिशाच-गृध्रजम्बुकवायसभूयिष्ठा विरलयोधपुरुषा', कृतमस्मद्दर्शनत्रासेन । कथयत भवन्त कस्मिन्नुद्देशे याज्ञसेनी सन्निहितेति । कथयाम्युपलक्षण तस्या ।

ऊरू करेण परिघट्टयत सलील
दुर्योधनस्य पुरतोऽपहृताम्बरा या ।
दुःशासनेन कचकर्षणभिन्नमौलिः
सा द्रौपदी कथयत क्व पुनः प्रदेशे ॥ ३५ ॥

कञ्चुकी—हा देवि यज्ञवेदिसभवे, परिभूयसे सप्रत्यनाथा कुरुकुलकलङ्केन ।

युधिष्ठिरः—(सहसोत्थाय ।) पाञ्चालि, न भेतव्य न भेतव्यम् ।

निलयो गृह येषु ते तथा । उपलक्षण परिवाचकम् । **ऊरू इति** । ऊरू निजोरुयुगं रोषेण परिघट्टयतस्ताडयत । इद तु रोषसूचकम् । 'कच केश शिरोरुह' इत्यमर । कर्षणमाकर्षणम् । भिन्नमौलिर्विदारितधम्मिल्ल । 'मौलि किरीटे धम्मिल्ले' इति विश्व । प्रदेशेऽस्तीति शेष । कथयत तमिति शेष ॥ ३५ ॥ अर्थसूचनरूपा धृतिर्ज्ञेयम् । 'अन्त पटीप्रविष्टैर्यत्कियतेऽर्थस्य सूचनम् । धृतिः कार्थप्रकाशनम् ॥' इति भरत । इह सादननामासमसधि । यदाह—'बीज-

---

१ 'क्षतजास्वादमत्तयक्षराक्षसपिशाचभूतवेतालकङ्कगृध्रजम्बुकोलूकवायसभूयिष्ठावशिष्टविरलाश्च योधा' इत्यपि पाठ २ 'सत्रासेन' ३ 'कथयत कस्मिन्नुद्देशे याज्ञसेनी सन्निहिता' इति बहव पठन्ति ४ 'कथयाम्युपलक्षण तस्या' इत्येष पाठ क्वचिन्नास्ति। 'किं कथयाम्युपलक्षण तस्या', 'कि कथयामि तस्या लक्षण', 'कथयाम्युपलक्षणानि तस्या' इत्यपि पाठान्तराणि नानापुस्तकेषु दृश्यन्ते ५ 'ऊरू' ६ 'सलज्जा', 'सरोषम्', ७ 'दु शासनस्य करकर्षणभिन्नमौलि' इति बहुसमत पाठ ८ 'हा देवि यज्ञवेदिसभवे' इत्यत्र 'देवि याज्ञसेनि' अथवा 'भो देवि याज्ञसेनि' इति पाठ क्वचिदुपलभ्यते ९ 'परिभूयसे सप्रत्यनाथेवानेन कुरुकुलकलङ्केन', 'परिभूयसे कुरुकुलकेतुना दुर्योधनहतकेन' इति पाठौ १०. '(सहसोत्थाय ।)' इत्यत्र 'सहसोत्थाय । सावष्टम्भम् ।)' इति पुस्तकान्तरे पाठ..

(ससम्भ्रमम् ।) कः कोऽत्र भो. । सैनिषङ्ग मे धनुरुपनय । दुरात्मन्दुर्योधनहतक, आगच्छागच्छ । अपनयामि ते गदाकौशलसभृंत भुजदर्प शिलीमुखासारेण । अन्यच्च रे कुरुकुलाङ्गार,

प्रियमनुजमपश्यस्त जरासधमल्ल
कुपितहरकिरातद्वेषिणं त च वत्सम् ।
त्वमिव कठिनचेता प्राणितु नासि शक्तो
न च पुनरपहर्तुं बाणवर्षैस्तवासून् ॥ ३६ ॥

(तत प्रविशति गदापाणि क्षतजसिक्तसर्वाङ्गो भीमसेन ।)

भीमसेनः—ननु भो समन्तपञ्चकसचारिण ,
रक्षो नाह न भूत रिपुरुधिरजलाह्लादिताङ्ग प्रकाम
निस्तीर्णोरुप्रतिज्ञाजलनिधिगहन क्रोधन क्षत्रियोऽस्मि ।
भो भो राजन्यवीरा समरशिखिशिखादग्धशेषा कृतं व-
स्त्रासेनानेन लीनैर्हतकरितुरगान्तर्हितैरास्यते यत् ॥ ३७ ॥
कथयन्तु भवन्त कस्मिन्नुद्देशे पाञ्चाली तिष्ठति ।

कार्योपगमन सादन समुदीरितम्' ॥ **प्रियमिति** । हर किरात इव हरकिरात । किरातरूपी हर इत्यर्थ । त वत्सम्र्जुनम् । प्राणितु जीवितुम् । त्वमिवेति व्यतिरेके दृष्टान्त । यथा त्व जीवितु शक्तस्तथा नाहमित्यर्थात् तवासून्बाणवर्षै पुनरपहर्तुं न शक्तोऽस्मि । कि तु शक्तोऽस्मि । न शिरश्चालने ॥ ३६ ॥ **रक्ष इति** । आह्लादित सिक्त । जलनिधिगहन इत्यत्र पूर्वनिपातविधेरनित्यत्वमेव समाधानम् । यद्भवद्विलीनै स्थीयते । त्रासफलमेतत् ॥ ३७ ॥ **द्रौपदीवाक्ये** ।

---

१ '(ससम्भ्रमम् ।)' इति बहुषु पुस्तकेषु नास्ति २ 'क कोऽत्र भो' इति क्वचिन्नास्ति ३ 'उपनीयता मे सज्ज धनु । दुरात्मन्दुर्योधनहतक, आगच्छ ।' इति वा पाठ ४ 'सभूत' इति बहुपुस्तकाना पाठ ५ 'जरासधशत्रु' ६ 'ननु पुनरपहर्तुं', 'न तु पुनरपहर्तुं' ७ 'बाणवर्षेण वाऽसून्' ८ 'क्षतजसिक्तसर्वाङ्गो रौद्रवेषो भीमसेन' इति क्वचित्पाठ ९ 'भीम०—(उद्धत परिक्रामन् ।) भो भो समन्तपञ्चकसचारिण सैनिका , कोऽयमावेग' इति बहुपुस्तकाना पाठ १० 'रक्षो नाह न भूत', 'नाह रक्षो न भूत' ११ 'प्लाविताङ्ग', 'आप्लाविताङ्ग'; 'अभ्युक्षिताङ्ग' १२ 'भुक्तशेषा' इति दर्पणधृत पाठ १३ 'किम्' इति बहव. पठन्ति. १४ 'कथयन्तु भवन्त कस्मिन्नुद्देशे पाञ्चाली तिष्ठति' इति पाठ क्वचिन्न वर्तते

द्रौपदी—(लब्धसंज्ञा ।) परित्ताअदु परित्ताअदु महाराओ । (क)

कञ्चुकी—देवि पाण्डुसुषे, उत्तिष्ठोत्तिष्ठ । सम्प्रति झटिति चिताप्रवेश एव श्रेयान् ।

द्रौपदी—(सहसोत्थाय ।) कह ण सभावेमि अज्जवि चिदासमीवम् । (ख)

युधिष्ठिरः—क. कोऽत्र भो । सनिषङ्ग धनुरुपनय । कथ न कश्चित्परिजन । भवतु । बाहुयुद्धेन सभावनविहस्तमेन गाढमालिङ्ग्य ज्वलनमभिपातयामि । (परिकरं बध्नाति ।)

कञ्चुकी—देवि पाण्डुसुषे, सयम्यन्तामिदानीं नयनपथावरोधिनो दु शासनावकृष्टा मूर्धजा । अस्तमिता सम्प्रति प्रतीकाराशा । द्रुत चितासमीप सभावय ।

युधिष्ठिरः—कृष्णे, न खल्वनिहते तस्मिन्दुरात्मनि दुर्योधने सहर्तव्या केशा ।

(क) परित्रायता परित्रायता महाराज. ।

(ख) कथ न सभावयाम्यद्यापि चितासमीपम् ।

परित्रायता परित्रायता महाराज ॥ निषङ्गस्तूणीर । सभावना व्यापार । विहस्त करशून्यं विह्वलं वा । 'परिकर पर्यङ्कपरिवारयो ' इत्यमर ॥ न खलु नैवेत्यर्थ ॥

---

१ 'इद द्रौपदीवाक्य केषुचित्पुस्तकेषु नास्ति २ 'सम्प्रति झटिति चिताप्रवेश एव श्रेयान्' इति क्वचिन्नास्ति ३ '(सहसोत्थाय ।)' इत्यत्र '(उत्थाय ।)' इति क्वचित्पाठ . ४. 'उपनीयता सनिषङ्ग धनु । (परिवृत्यावलोक्य च ।) कथ न कश्चिच्छृणोति परिजन' इति पुस्तकान्तरे पाठ ५. 'बाहुयुद्धेनैव दुरात्मान गाढमालिङ्ग्य' इति बहुसंमत पाठ. ६ '(इति परिकर बध्नाति)' ७ देवि पाण्डुसुषे' इति बहुषु पुस्तकेषु नास्ति ८. 'नयनोपरोधिन ' इति बहव पठन्ति ९ 'चितासमीपमेव द्रुतत्तर सभावय' इति बहुसंमत पाठ. १०. 'कृष्णे' इति क्वचिन्नास्ति. ११. 'तस्मिन्दुर्योधनशतके' इत्यपि पाठ

भीमसेनः—पाञ्चालि, न[1] खलु मयि जीवति सहर्तव्या दु शासन-विलुलिता वेणिरात्मपाणिना । तिष्ठतु तिष्ठतु । स्वयमेवाह संहरामि ।

(द्रौपदी[2] भयादपसर्पति ।)

भीमसेनः—तिष्ठ[3] तिष्ठ भीरु, क्वाधुना गम्यते[4] । (इति केशेषु ग्रहीतुमिच्छति ।)

युधिष्ठिरः—(वेगाद्भीममालिङ्ग्य ।) दुरात्मन्[5], भीमार्जुनशत्रो, सुयोधनहतक[6],

आशैशवादनुदिन जनितापराधो
मत्तो बलेन भुजयोर्हतराजपुत्र[7] ।
आसाद्य मेऽन्तरमिद भुजपञ्जरस्थ[8]
जीवन्प्रयासि न पदात्पदमद्य पाप[9] ॥ ३८ ॥

आशैशवादिति । भुजयोर्बलेन मत्त । हतो राजपुत्रो भीमादिर्येन स तथा । सकट मध्यम् । त्व जीवन्सन्पदात्पदमप्यवश्य न प्रयासि न प्रयास्यसि । 'वर्तमानसामीप्ये वर्तमानवद्वा' इति भविष्यति लट् । यद्वा तत्कालीनक्रियाया वर्तमानत्वाद्वर्तमाने लट् ॥ ३८ ॥ दुर्लक्षा दुर्ज्ञेया व्यक्तिश्चिह्न यस्य स तथा ॥

---

१ 'न खलु मयि जीवति सहर्तव्या दु शासनविरूपिता वेण्यात्मपाणिना ।', 'न खलु न खलु मयि जीवति सहर्तव्या दु शासनविरूपिता वेण्यात्मपाणिना ।', 'न खलु मयि जीवति सहर्तव्या दु शासनविलुलिता वेण्यात्मपाणिभ्याम् ।'; 'न खलु सयमितव्यात्मपाणिना दु शासनकृष्टा वेणी ।'; 'न खलु मयि जीवति सहर्तव्या दु शासनविलुलिता वेण्यात्मपाणिभ्याम् । तिष्ठ तिष्ठ । अहमेव सहरामि ।', 'न खलु मयि जीवति सहर्तव्या दुःशासनविलुलिता वेणिरात्मपाणिभ्याम् । तिष्ठ । स्वयमेवाह सहरामीति ।' इति नानाविधः पाठ २ '(द्रौपदी भयादपसर्पति ।)' इति कचि-न्नास्ति । क्वचिदेतत्स्थाने '(द्रौपदी भयात्परिक्रामति ।)' इत्येष पाठोऽस्ति ३. 'अये भीरु, केदानीं गम्यते' इति वा पाठ ४ '(बलाद्भीममालिङ्ग्य ।)'; '(भीममालिङ्ग्य ।)' ५ 'दुर्योधनहतक, केदानीं यास्यसि' इति पुस्तकान्तरे पाठ ६ 'क्षीवो मदेन' इति बहुसंमत पाठ ७ 'हतराजपुत्र' इत्यपि पाठ . ८ 'आसाद्य सकटमिद भुजपञ्ज-रस्थ जीवन्प्रयासि न पदात्पदमप्यवश्यम्' इति जगद्धरेण धृतः पाठ । 'आसाद्य चान्तरमिद भुजपञ्जरस्थ जीवन्प्रयासि न पदात्पदमम्बय मे' इत्यपि क्वचित्पाठः. ९ 'पापं'.

भीमसेनः—कथमार्य सुयोधनशङ्कया क्रोधान्निर्दय मामालिङ्गति। देव अजातशत्रो, भीमार्जुनगुरो, यथैवाज्ञापयसि न तथैवैतत्।

कञ्चुकी—(उपसृत्य। सहर्षम्।) महाराज, वर्धसे। अय खल्वायुष्मान्भीमसेन सुयोधनक्षतजारुणीकृतसकलशरीरो दुर्लक्षव्यक्ति। अलमधुना सदेहेन।

चेटी—देवि, णिवट्टीअदु णिवट्टीअदु। एसो क्खु पूरिदपडिण्णाभारो णाहो दे वेणीसहारं कादु तुम एंव्व अण्णेसेदि। (क)

द्रौपदी—हञ्जे, किं म अलीअवणेहि आसासेसि। (ख)

(क) देवि, निवर्त्यता निवर्त्यताम्। एष खलु पूरितप्रतिज्ञाभारो नाथस्ते वेणीसहार कर्तु त्वामेवान्विष्यति।

(ख) हञ्जे, किं मामलीकवचनैराश्वासयसि।

चेटीवाक्ये। देवि, निवर्त्यता निवर्त्यताम्। एष खलु परिपूरितप्रतिज्ञाभारो नाथस्ते वेणीसहरण कर्तु त्वामेवान्विष्यते॥ **द्रौपदीवाक्ये**। हञ्जे, कि माम-

---

१ 'भीमसेन —(सस्मितम्।) अये, कथ दुर्योधनशङ्कया क्रोधान्मा निर्दयमालिङ्गत्यार्य। देव अजातशत्रो, भीमार्जुनगुरो, यथैवाज्ञापयसि न तथैवैतत्।', 'भीमसेन —अये, कथमार्य सुयोधनशङ्कया निर्दय मामालिङ्गति। आर्य, प्रसीद प्रसीद।', 'भीमसेन —अये, कथमार्य सुयोधनशङ्कया निर्दय मामालिङ्गति।' इति पाठान्तराणि २ 'कञ्चुकी—(उपसृत्य। सहर्षम्।) महाराज, वर्धसे। अय खलु भीमसेन', 'कञ्चुकी—(उपसृत्य। सहर्षम्।) महाराज वर्धसे वर्धसे। अय खलु कुमारभीमसेन', 'कञ्चुकी—(निरूप्य। सहर्षम्।) कथ कुमारो भीमसेन। दिष्ट्या वर्धसे महाराज। अय खल्वायुष्मान्भीमसेन', 'कञ्चुकी—(उपगम्य। सहर्षम्।) महाराज वक्ष्यसे। अय खल्वायुष्मान्भीमसेन', 'कञ्चुकी—(निरूप्य। सहर्षम्।) भीमसेन एवायम्। देव, वर्धतेऽय खल्वायुष्मान्कुमारो भीमसेन' इति नानापुस्तकेषु नानाविध पाठ ३ 'सुयोधनक्षतजारुणितसकलशरीराम्बर', 'दुर्योधनक्षतजारुणीकृतसर्वशरीर' इति पाठौ ४ 'दुर्लक्ष्यव्यक्ति' ५ 'चेटी—(द्रौपदीमालिङ्ग्य।) समस्ससदु समस्ससदु देवी। भट्टिणि, अअ क्खु पूरिदपडिण्णाभारो णाहो दे', 'चेटी—(द्रौपदीमालिङ्ग्य।) भट्टिणि, एसो क्खु पूरिदपडिण्णाभरो णाहो देवीए', 'चेटी—(द्रौपदीमालिङ्ग्य।) देवि, पूरिदपडिण्णाभरो णाहो देवीए' इति पाठान्तराणि ६ 'एव्व' इति बहुषु पुस्तकेषु नास्ति ७ 'अलीअवअणेण आसासेसि' इति जगद्धरसमत पाठ ८ 'आसासेसि' इत्यसादनन्तर 'कञ्चुकी—महाराज, वक्ष्यसे। (इति पूर्वोक्तमेवाभिधत्ते।)' इति क्वचिदधिक पाठ

युधिष्ठिरः—[1]जयधर, किं कथयसि नायमनुजद्वेषी दुर्योधनहृतक ।
भीमसेनः—देव[2] अजातशत्रो, [3]कुतोऽद्यापि दुर्योधनहृतक ।
[4]मया हि तस्य दुरात्मन
भूमौ क्षिप्त[5] शरीर निहितमिदम[6]सृक्चन्दनाभ निजाङ्गे
लक्ष्मीरार्ये[7] निषण्णा चतुरुदधिपय.सीमया सार्धमु[8]र्व्या ।
भृत्या मित्राणि योधा. [9]कुरुकुलमखिल दग्धमेतद्रणाग्नौ
नामैक यद्ब्रवीषि क्षितिप तदधुना धार्तराष्ट्रस्य शे[10]षम् ॥३९॥

लीकवचनेन समाश्वासयसि ॥ **भूमाविति** । तस्येदमसृच्चयाङ्गे निहितम् । भूम्या सह श्रीस्त्वयि निषण्णा । भृत्या कुरूणामिति शेष । एवमितरत्रापि । यदेक शेषमवशिष्ट नाम दुर्योधनस्य ब्रवीषि । शेषशब्दोऽय कर्मण्यजन्तो वाच्य-

---

१ 'जयधर, अपि सत्य नाय मम वैरी सुयोधनहृतक' इति बहुसमत पाठ । 'जयधर, अपि सत्य नायमनुजवैरी सुयोधनहृतक', 'जयधर, कि कथयसि नायमनुजद्वेषी दुरात्मा दुर्योधनहृतक', 'कञ्चुकिन्, किं वदसि नायमर्जुनवैरी दुर्योधनहृतक', 'युधि०—(स्वैर मुक्त्वा । भीमसेनमनवलोकयन् ।) जयधर, कि कथयसि नायमनुजद्वेषी सुयोधनहृतक' इति पाठान्तराणि २ 'देव, अजातशत्रो, भीमार्जुनगुरो' इति बहव पठन्ति । क्वचित् 'आर्य, देव, अजातशत्रो, भीमार्जुनगुरो' इति पाठ ३ 'कुतोऽद्यापि सुयोधनहृतक', 'काद्यापि दुर्योधनहृतक', 'अद्यापि दुर्योधनहृतक' ४ 'मया निहतस्य दुरात्मनस्तस्य'; 'मया हि तस्य दुरात्मन. पाण्डुकुलपरिभाविन' इति पाठौ ५ 'क्षिप्त्वा' ६ 'असृक्चन्दन भीमगात्रे' इति बहुसमत पाठ, 'असृक्चन्दनाभ मयाङ्गे' इत्यपि क्वचित्पाठ ७ 'लक्ष्मीरार्ये निषिक्ता', 'राजन्, लक्ष्मीर्निषण्णा' ८ 'ऊर्व्या' ९ 'कुरुकुलमनुजा' १० 'शेषम्' इत्यसादनन्तरम् 'भीम०—(पादयोर्निपत्य ।) जयतु जयतु देव । युधि०—(सत्वर मुक्त्वा भीमसेनमवलोकयन्नसे परामृश्य ।) तात भीम, पृथानन्दन, पाण्डुकुलप्रदीप । भीम०—आज्ञापय । युधि०—वत्स, बाष्पजलान्तरित न पश्यामि ते वदनचन्द्रमनवरतम् । कथय कच्चिज्जीवति भवान्सम किरीटिना । भीम०—देव, निहतसकलरिपुपक्षे त्वयि जीवति भीमार्जुनौ जीवन्तौ । युधि०—(पुनर्गाढमालिङ्ग्य ।) तात भीम, रिपोरास्ता तावन्निधनम्' इति क्वचित्पाठो दृश्यते । क्वचित् 'युधि०—(सहर्ष भीममालिङ्गति ।) भीम०—जयति जयत्वार्य । युधि०—वृकोदर, पृथानन्दन, भीमसेन, पाण्डुकुलप्रदीप । भीम०—आज्ञापयत्वार्य । युधि०—बाष्पसलिलान्तरितत्वान्न पश्यामि ते वदनचन्द्रम् । कथय कच्चिज्जीवति भवान्किरीटिना । भीम०—महाराज, जीवाम्यह सम किरीटिना । युधि०—अयि फाल्गुनाग्रज, रिपोरास्ता तावन्निधनम्' इत्यपि पाठ उपलभ्यते

(युधिष्ठिर [1]स्वैर मुक्त्वा भीममवलोकयन्नश्रूणि प्रेमार्जयति ।)

भीमसेनः—(पादयो पतित्वा ।) जयत्वार्य ।

युधिष्ठिरः—वत्स, बाष्पजलान्तरितनयनत्वान्न पश्यामि ते मुखचन्द्रम् । [2]कथय कच्चिज्जीवति भवान्सम किरीटिना ।

भीमसेनः—निहतसकलरिपुपक्षे त्वयि नराधिपे, जीवति भीमोऽर्जुनश्च ।

युधिष्ठिरः—([3]पुनर्गाढमालिङ्ग्य ।) [4]तात भीम,

रिपोरास्ता तावन्निधनमिदमाख्याहि [5]शतश
[6]प्रियो भ्राता [7]सत्य त्वमसि मम [8]योऽसौ बकरिपुः ।

भीमसेनः—आर्य, सोऽहम् ।

युधिष्ठिरः—

जरासंधस्योरः सरसि [9]रुधिरासारसलिले
[10]तटाघातक्रीडाललितमकर [11]सयति भवान् ॥ ४० ॥

भीमसेनः[12]—आर्य, स एवाहम् । तन्मुञ्चतु मामार्य क्षणमेकम् ।

लिङ्ग इत्यवधेयम् ॥ ३९ ॥ **रिपोरिति** । रिपोर्निधन तावदास्ताम् । शत्रुनाश न पृच्छामीत्यर्थ । इदं शतश शतवारानाख्याहि कथय । सरसि जलधाविति व्यस्तरूपकम् । तटाघातो जलधितटहननम् । मकरो जलजन्तुभेद । 'क्रीडाललितमकरोत्' इति पाठे य क्रीडाललित क्रीडारूप विलास चकारेत्यर्थ ॥ ४० ॥

---

१ 'स्वैर मुक्त्वा' इति क्वचिन्नास्ति— २ 'मार्जयति' —३. 'तत्कथय', ४ 'सस्नेह पुनर्गाढमालिङ्ग्य' इति वा पाठ ५. 'तात भीम' इति पाठ क्वचिन्नास्ति ६. 'सहसा' ७ 'सत्य त्वमसि मम' इत्यत्र 'भीमो मम भवसि' इति पुस्तकान्तरे पाठ . ८ 'यो वै बकरिपु ' इति क्वचित्पाठ ९ 'रुधिरागाधसलिले', 'रुधिरसलावजलौघे' १०. 'क्रीडाललितमकरोत्' इति पाठ . ११. 'सप्रति भवान्', 'य स तु भवान्' —१२ 'भीम०—आर्य, मुञ्चतु मा क्षणमेक भवान्', 'भीम०—एवमेतत् । किं तु मुञ्चतु मामार्यः क्षणमेकम्', 'भीम०—एवमेतत् । मुञ्चतु मामार्यः', 'भीम०—मुञ्चतु मुञ्चतु मामार्य· क्षणमेकम्'; 'भीम०—मुञ्चतु मामार्य· क्षणमेकम्' इति पाठान्तराणि.

युधिष्ठिरः—किमपरमवशिष्टम् ।

भीमसेनः—सुमहदवशिष्टम् । सयमयामि तावदनेन सुयोधन-शोणितोक्षितेन पाणिना पाञ्चाल्या दु शासनावकृष्टं केशहस्तम् ।

युधिष्ठिरः—गच्छतु भवान् । अनुभवतु तपस्विनी वेणीसंहारम् ।

भीमसेनः—(द्रौपदीमुपसृत्य ।) देवि पाञ्चालराजतनये, दिष्ट्या वर्धसे रिपुकुलक्षयेण । अलमलमेवविध मामालोक्य त्रासेन ।

कृष्टा येनासि राज्ञा सदसि नृपशुना तेन दु शासनेन
स्यानान्येतानि तस्य स्पृश मम करयो पीतशेषाण्यसृञ्जि ।
कान्ते राज्ञ कुरूणामैतिसरसमिदं मद्गदाचूर्णितोरो
रङ्गेऽङ्गेऽसृङ्विषक्तं तव रिपुजनितस्यानलस्योपशान्त्यै ॥ ४१ ॥

कृष्टेति । तस्यैतान्यसृञ्जि मत्पीतशेषाणि मम करयो. स्पृश । हे कान्ते, सुयोधनरुधिरमिद प्रत्यङ्ग निषिक्त सबद्धमस्ति ॥ ४१ ॥ निर्वहणमिह श्लोके । यदुक्त तत्रैव—'पूर्वं प्रसारिताना तु बीजादीना समापनम् । निर्व्यूढत्वेन क्रियते

---

१ 'भीम०—आर्य, सुमहदवशिष्टम् । सयच्छामि तावदनेन दुर्योधनदु शासन-रुधिरोक्षितेन पाणिना', 'भीम०—आर्य, सुमहदवशिष्टम् । युधि०—वत्स, किम् । भीम०—सयच्छामि तावदनेन सुयोधनशोणिताङ्कितेन पाणिना', 'भीम०—सुमहद-वशिष्टम् । सयमयामि तावदनेन दु शासनशोणितोक्षितेन पाणिना' इति पाठान्तरम् २ 'सत्वरं गच्छतु भवान्' इति बहव पठन्ति ३ 'अनुभवतु तावत्तपस्विनी वेणीसहारमहोत्सवम्', 'अनुभवतु तपस्विनी वेणीसहारमहोत्सवम्'. ४ 'भीम० —भवति पाञ्चालराजतनये, दिष्ट्या वर्धसे रिपुकुलक्षयेण । द्रौपदी—(उपसृत्य ।) जेदु जेदु णाहो । (इति भयादपसर्पति ।) भीम०—राजपुत्रि, अलमेव मामालोक्य त्रासेन । पश्य', 'भीम०—देवि, दिष्ट्या वर्धसे रिपुकुलक्षयेण । द्रौपदी— (उपसृत्य ।) जेदु जेदु णाहो । (इत्यर्धोक्ते भयादपसर्पति ।) भीम०—अयि भीरु, अल-मवलोक्यासाध्वासेन । पश्य' इति पाठौ ५ 'येनाकृष्टासि राज्ञा'; 'कृष्टा येनासि तस्मिन्', 'कृष्टा केशेषु तस्मिन्' ६ 'येन' ७ 'अपि रुधिरमिद मद्गदा-चूर्णितोरोरङ्गेष्वङ्गेषु सक्त तव परिभवजस्यानलस्योपशान्त्यै', 'अयि रुधिरमिद मद्गदाचूर्णितोरोरङ्गे सद्यो निषक्त तव परिभवजस्यानलस्योपशान्त्यै' इति पाठौ

बुद्धिमतिके, क्व सा भानुमती योऽपहसति पाण्डवदारान्। भवति यज्ञवेदिसंभवे,

द्रौपदी—आणवेदु णाहो। (क)

भीमसेनः—स्मरति भवती यत्तन्मयोक्तम्। ('चञ्चद्भुज–'(१।२१) इत्यादि पठति।)

द्रौपदी—णाह, ण केवलं सुमरामि। अणुहवामि अ णाहस्स प्पसादेण। (ख)

भीमसेनः—(वेणीमवधूय।) भवति, सयम्यतामिदानीं धार्तराष्ट्र-कुलकालरात्रिर्दुःशासनविलुलितेयं वेणी।

द्रौपदी—णाह, विसुमरिदव्वं एदं वावारम्। णाहस्स प्पसादेण पुणो वि सिक्खिस्सम्। (ग)

(भीमसेनो वेणीं बध्नाति।)

(क) आज्ञापयतु नाथः।

(ख) नाथ, न केवलं स्मरामि। अनुभवामि च नाथस्य प्रसादेन।

(ग) नाथ, विस्मृतास्म्येतं व्यापारम्। नाथस्य प्रसादेन पुनरपि शिक्षिष्ये।

तन्निर्वर्णनमीरितम्' ॥ **द्रौपदीवाक्ये**। आज्ञापयतु नाथ ॥ नाथ, न केवलं स्मरामि नाथस्य प्रसादेन पुनरनुभवामि ॥ नाथ, विस्मृतोऽयं व्यापारो मया।

---

१ 'क्व सम्प्रति भानुमती योपहसति पाण्डवदारान्। भवति वेदिसभवे याज्ञसेनि', 'क्व सम्प्रति भानुमती नोपहसति पाण्डवदारान्। भवति वेदिसभवे याज्ञसेनि', 'क्वासौ भानुमती योपहसति पाण्डवदारान्। भवति यज्ञवेदिसभवे', 'क्व सा भानुमती। परिभवतु सम्प्रति पाण्डवदारान्। भवति यज्ञवेदिसभवे', 'क्व भानुमती योपहसति पाण्डवदारान्। भवति पाञ्चालराजतनये' इति पाठान्तराणि २ एतद्द्रौपदीवाक्यं केषुचित्प्राचीनग्रन्थेषु नास्ति ३ 'यन्मयोक्तम्', 'यन्मया प्रतिज्ञातम्' ४ 'इति पूर्वोक्तमेव पठति' इति बहुपुस्तकाना पाठ ५ 'णाह, सुमरामि अणुहवामि अ।' इति पुस्तकान्तरे पाठ ६ 'भीम०—भवति, संयम्यतामिदानीं', 'भीम०—देवि भवति, सयम्यतामिदानीं' ७ 'दुःशासनविलुलिता वेणी' ८ 'द्रौपदी—विसुमरिदं एदं वावारम्' इति साहित्यदर्पणे पाठ ९ 'पुणोवि सिक्खिस्सम्। (केशान्बध्नाति।)' इति दशरूपके पाठ १० 'चेटी वेणीं बध्नाति' इति बहव

(नेपथ्ये ।)

[1]महासमरानलदग्धशेषाय स्वस्ति भवतु [2]राजन्यकुलाय ।
क्रोधान्धैर्यस्य मोक्षात्क्षतनरपतिभि [3]पाण्डुपुत्रै कृतानि
प्रत्याश [4]मुक्तकेशान्यनुदिनमधुना पार्थिवान्त पुराणि ।
कृष्णाया केशपाश कुपितयमसखो धूमकेतु. कूरूणा
दिष्ट्या [5]बद्ध प्रजाना विरमतु निधन स्वस्ति [6]राज्ञा कुलेभ्य ॥४२॥

[7]युधिष्ठिरः—देवि, एष ते मूर्धजाना सहारोऽभिनन्दितो नभस्तलचारिणा सिद्धजनेन ।

(तत प्रविशत [8]कृष्णार्जुनौ ।)

[9]कृष्णः—(युधिष्ठिरमुपगम्य ।) विजयतां निहतसकलारातिमण्डलः [10]सानुजो युधिष्ठिर ।

[11]अर्जुनः—[12]जयत्वार्य ।

साप्रत नाथस्य प्रसादेन पुनरपि शिक्षिष्ये ॥ **क्रोधान्धैरिति** । यस्य मोक्षे मोचननिमित्त पार्थिवान्त पुराणि पाण्डवै क्षेपाच्चालनादधिक्षेपाद्वा निर्मुक्तकेशानि कृतानि । पार्थिवोऽत्र दुर्योधन । तथा च दुर्योधने हते तदन्त पुरनार्योऽनिबद्धकेशा कृता इति भाव ॥ ४२ ॥ पुण्डरीकाक्ष कृष्ण । आशास्ते स्वीकरोति ।

---

१ 'महाममरानल राजन्यकुलाय' इत्येष पाठ कचिन्नास्ति. २ 'भवतु राजकुलाय', 'भवति राजन्यकुलाय', 'भवते राजन्यलोकाय' इति पाठान्तराणि. ३ 'मोक्षात्कुरुनरपतिभि ', 'मोक्षे हतनरपतिभि ' ४ 'प्रत्याश मुक्तकेशान्यतुलभुजबलै ', 'क्षेपान्निर्मुक्तकेशान्यनुदिनमधुना' ५ 'सोऽय बद्ध प्रजाना', 'सोऽय बद्ध प्रजाभ्य ' ६ 'राजन्यकेभ्य ' ७ 'युधि०—देवि, एष ते वेणीसहारोऽभिनन्दते नभस्तलसचारिणा सिद्धजनेन' इति बहुसमत पाठ । 'कञ्चुकी—कुमार, एष वेणीसहारोऽभिनन्दित सिद्धजनेन' इत्यपि पाठ कचिदुपलभ्यते ८ 'सिद्धचारणजनेन' ९ 'वासुदेवार्जुनौ', 'केशवार्जुनौ' १० 'वासुदेव —(उपगम्य ।) विजयता निहतसकलारातिमण्डल ', 'उभौ—(उपगम्य ।) कृष्ण.—विजयता निहतसकलारातिमण्डल ' इति पाठौ ११ 'सानुज पाण्डवकुलचन्द्रमा महाराजो युधिष्ठिर ' इति बहुपुस्तकाना पाठ १२ 'जयत्वार्य ', 'जयतु जयतु देव '

युधिष्ठिरः—(विलोक्य ।) अये, भगवान्पुण्डरीकाक्षो वत्सश्च किरीटी । भगवन्, कुतस्तस्य विजयादन्यद्यस्य भगवान्पुराणपुरुषो नारायणः स्वय मङ्गलान्याशास्ते ।

कृतगुरुमहदादिक्षोभसभूतमूर्तिं
गुणिनमुदयनाशस्थानहेतुं प्रजानाम् ।
अजममरमचिन्त्यं चिन्तयित्वापि न त्वा
भवति जगति दु खी किं पुनर्देव दृष्ट्वा ॥ ४३ ॥

(अर्जुनमालिङ्ग्य ।) वत्स, परिष्वजस्व माम् ।

कृतेत्यादि । हे देव, जगति त्वा चिन्तयित्वापि जनो दु खी न भवति । कि पुनर्दृष्ट्वा दु खी भवति । अपि तु न भवतीति भाव । कीदृशम् । कृता गुरो स्थूलद्रव्यस्य महदादेर्महत्तत्त्वबुद्धितत्त्वादे पर्वतादेर्वा क्षोभेन परिणामेन सभूता व्यापिका मूर्तिस्त्रिनयनत्वादिरूपा येन तम् । यद्वा । कृतो गुरु पर्वतादिर्येन स तथा । महदादेराकाशादे क्षोभेन मिलनेन महाभूतसमाधिना सभूता कृतास्पदा-देर्मूर्ति शरीरं येन स तथा । पश्चाद्विशेषणसमास । यद्वा । कृत गुरुकार्यं द्रव्य येन तादृशेन महदादिना कालाकाशादिना सभूता मिलिता मूर्तिर्यस्य तम् । सामान्यकारणेन सह भगवान्वेदादिकर्तेति भाव । अत एव गुणिन वेदादिसृष्टि योग्यप्रयत्नादिमन्तम् । यद्वा । गुणा सत्त्वरजस्तमोरूपास्त्रयोगिनं लोकसृष्टिनाश-स्थैर्यकारण च । तथा च सत्त्वरजस्तमोरूप गुणत्रय सहकारि समासाद्य हरिहर-हिरण्यगर्भैरवतारैरयं भगवान्कार्यत्रयकर्तेति भाव । अजमजन्यम् । अमरम-नाश्यम् । अचिन्त्य वाङ्मनसागोचरम् । तदुक्तम्—'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति । अथ च विरोधाभास । यो हि सभूतमूर्ति स कथमज । यो ह्यचिन्त्यस्तस्य कथ चिन्तेति । अविरोधस्तु दर्शित एव ॥४३॥ व्यासोऽयमिति ।

---

१ 'युधि०—(विलोक्य ।) अये, कथ भगवान्वासुदेव किरीटी च । ('वत्सश्च किरीटी' इत्यपि पाठ) भगवन्, अभिवादये । (किरीटिन प्रति ।) एहि वत्स, परिष्वजस्व माम् । (अर्जुन प्रणमति ।) युधि०—(वासुदेव प्रति ।) देव, कुतस्तस्य विजयादन्यद्यस्य खलु भगवान्पुण्डरीकाक्ष स्वयं मङ्गलमाशास्ते' इति पुस्तकान्तरे पाठ २ 'अयं' ३ 'किमुत मे विजयात्' ४ 'भगवान्पुराणपुरुषो नारायणो मङ्गलान्याशास्ते', 'भगवान्पुराणपुरुष स्वयमेव नारायणो मङ्गलान्याशास्ते' ५. 'स-मूर्तिमुक्त' इति वा पाठ ६ 'अजमजरमचिन्त्य चिन्तयित्वा भवन्त भवति जगद-दुःखं किं पुनर्देव दृष्ट्वा' इति बहव पठन्ति

कृष्णः—[1]महाराज युधिष्ठिर,

व्यासोऽय भगवानमी च मुनयो वाल्मीकिरामादयो
धृष्टद्युम्नमुखाश्च सैन्यपतयो माद्रीसुताधिष्ठिता ।
प्राप्ता मागधमत्स्ययादवकुलैराज्ञाविधेयै सम
स्कन्धोत्तम्भिततीर्थवारिकलशा राज्याभिषेकाय ते ॥ ४४ ॥

[2]अहं पुनश्चार्वाकेण रक्षसा व्याकुलीकृत भवन्तमुपलभ्यार्जुनेन सह त्वरिततरमायात ।

युधिष्ठिरः—[3]कथ चार्वाकेण रक्षसा वयमेव विप्रलब्धा ।

भीमसेनः—(सरोषम् ।) कासौ धार्तराष्ट्रसखो राक्षस पुण्यजनापसदो येनार्यस्य [4]महांश्चित्तविभ्रम कृतः ।

कृष्णः—निगृ[5]हीत स दुरात्मा [6]नकुलेन । [7]तत्कथय महाराज, किमस्मात्पर समीहित सपादयामि ।

जाबालिनामा मुनि । रामनामा च । धृष्टद्युम्नो मुखमाद्यो येषा ते तथा । उत्तम्भित उत्तोलित । तीर्थवारि जाह्नवीप्रभृतिजलम् । एते तेऽभिषेकाय सन्तीति शेष ॥ ४४ ॥ इहोच्यतां किमन्यदित्यनेन काव्यसहाररूपकनिर्वहणसधि । यदाह

---

१ 'कृष्ण —एते खलु भगवन्तो व्यासवाल्मीकिजामदग्न्यजाबालिप्रभृतयो महर्षय कल्पिताभिषेकमङ्गला नकुलसहदेवसात्यकिमुखाश्च सेनापतयो यादवमत्स्यमागधकुलसभवाश्च राजकुमारा स्कन्धोत्तम्भिततीर्थवारिकलशास्तवाभिषेक धारयन्ति' इत्यपि पाठ २ 'महाराज युधिष्ठिर' इत्यत्र 'महाराज, अजातारे, सत्यवादिन्' इति पुस्तकान्तरे पाठ ३ 'अहमपि चार्वाकेण विप्रकृत भवन्तमुपलभ्यार्जुनेन सह सत्वरमागत', 'अन्यच्चाह पुनश्चार्वाकेण दुरात्मना विप्रकृत भवन्तमुपलभ्यार्जुनेन सह त्वरितमागतोऽसि'; 'अहमपि चार्वाकेण रक्षसा व्याकुलीकृत भवन्त जयधरमुखादुपश्रुत्यार्जुनेन सह त्वरिततरमायात' इति पाठान्तराणि ४ 'किं नाम चार्वाकेण विप्रलब्धा वयम् । (सरोषम् ।) कासौ धार्तराष्ट्रसख पुण्यजनापसदो येन मे महाश्चित्तविभ्रम कृत' इत्यपि केचित्पठन्ति ५ 'महानय चित्तविभ्रम,' ६ 'गृहीत', 'निहत' ७ 'कुमारनकुलेन' ८ 'तत्कथय महाराज, किमस्मात्पर समीहितम् ।', 'कथय महाराज, किमस्मात्पर समीहितम् ।', 'युधिष्ठिर —प्रिय न, । वासुदेव —उच्यता किं ते भूय प्रियमुपकरोमि ।' इति नानाविधानि पाठान्तराणि,

युधिष्ठिरः—[1]न किंचिन्न ददाति भगवान्प्रसन्न । [2]अह तु[3] पुरुषसाधारणया बुद्ध्या सतुष्यामि । न खल्वत परमभ्यर्थयितु[4] क्षमः । पश्यतु देव ।

क्रोधान्धै[5] सकल हत रिपु[6]कुल पञ्चाक्षतास्ते वय
पाञ्चाल्या मम दु[7]र्नयोपजनितस्तीर्णो निकारार्णव ।
त्व देव पुरुषोत्तम सुकृतिन मामाह[8]तो भाषसे
किं नामान्यदत पर भगवतो[9] याचे प्रसन्नादहम् ॥ ४५ ॥

प्रीततरश्चेद्भगवास्तदिदमस्तु[10] ।

[11]अकृपणमरुकश्रान्त जीव्याज्जन पुरुषायुष
भवतु भगवन्भक्तिर्द्वैत विना पुरुषोत्तमे ।

'वरप्रदानसप्राप्ति काव्यसहार उच्यते' ॥ किंचिन्न न ददासि । किं तु ददास्येव । द्वौ निषेधौ प्रकृतमर्थं गमयत । पुरुषकार पुरुषव्यापार । **क्रोधान्धैरिति** । क्रोधान्धैरर्थात्पञ्चपाण्डवैरेव । पञ्च पाण्डवा अक्षता इत्यन्वय । पाञ्चाल्या निकारसिन्धुर्मम दुर्नयेन विहितस्तीर्ण । पुरुषोत्तम इति । पुरुषेभ्य उत्तम इति समास । न तु पुरुषेषूत्तम इति । 'न निर्धारणे' इति निषेधात् । न चानेन षष्ठीसमासनिषेधो न तु सप्तमीसमासनिषेध इति वाच्यम् । तथा सति षष्ठीसमासस्याप्राप्तेरेव निषेधात्सर्वत्र सप्तमीसमासेनैव प्रयोगसिद्धे । तस्मात्पञ्चमीसमास एवायमित्यदोष । सुकृतिन पुण्यवन्तम् ॥ ४५ ॥ **अकृपणमिति** । अकृपण कार्पण्यरहितमरुकश्रान्त न रोगेण परिश्रान्त च यथा स्यादेव लोक पुरुषायुष

---

१ 'एव पुण्डरीकाक्ष, न किंचिन्न ददाति भगवान्प्रसन्न ।', 'भगवन्, पुण्डरीकाक्ष, किं न ददासि प्रसन्न । परमपि प्रियमस्ति ।', 'भगवन्, पुण्डरीकाक्ष, किं न ददासि प्रसन्न । अत परमपि प्रियमस्ति ।' इति पाठान्तराणि २ 'अह तु पुरुषसाधारणया बुद्ध्या न खल्वत पर प्रियमभ्यथये । यत पश्यतु देव.', 'अह तु पुरुषार्थैचतुष्टयया बुद्ध्या न खल्वत पर प्रियमभ्यर्थयितु क्षम । पश्यतु देव ' इति पाठौ ३ 'तु' इति क्वचिन्नास्ति ४ 'अर्थयितु' ५ 'क्रोधान्ध', 'क्रोधात् तत्' ६ 'रिपुबल' ७ 'दुर्नये पतितया', 'दुर्नयेन विहित ' ८ 'निकारोदधि ' ९ 'मामद्य सभाषसे' १० 'प्रियतर यत्प्रार्थये त्वामहम्' इति वा पाठ ११ 'तथापि प्रीतश्चेद्भगवास्तदिदमस्तु', 'तथापि प्रीतश्चेद्भगवास्तदिदमस्तु भरतवाक्यम् ।', 'प्रीततरश्चेद्भवास्तदिदमेवमस्तु', 'प्रसन्नतरश्च भगवास्तदिद भवतु', 'तथापीद भवतु' इति नानाविधानि पाठान्तराणि १२ 'अकृपणमति काम जीव्याज्जन पुरुषायुष भवतु च भवद्भक्तिर्द्वैध विना पुरुषोत्तम' इत्यपि पाठ

दयितभुवनो विद्वद्बन्धुर्गुणेषु विशेषवि-
त्सततसुकृती भूयाद्भूप प्रसाधितमण्डलः[1] ॥ ४६ ॥

कृष्णः[2]—एवमस्तु ।

(इति निष्क्रान्ता सर्वे ।)

इति षष्ठोऽङ्कः ।

समाप्तमिदं वेणीसंहारं नाम नाटकम् ।

जीव्याज्जीवतु । पुरुषायुषमिति 'अचतुर–' इत्यादौ साधितम् । हे भगवन्, द्वैत विनाऽद्वैतक्रमेण पुरुषोत्तमे भक्तिर्भवतु । मम जनानामिति शेष । पण्डित-गुणेषु पण्डितजनो विहितहृदयो दत्तचित्त सानुरागो वा भवतु । भूप सदा पुण्यवान्प्रसाधितराजचक्रश्च भूयात् ॥ ४६ ॥

---

१ अस्य श्लोकस्य स्थाने—

'अवनिमवनिपाला पान्तु वृष्टिं विधत्ता
जगति जलधरालीं शस्यपूर्णासु भूमिं ।
त्वयि मुरनरकारौ भक्तिरद्वैतयोगा-
द्भवतु मम सुदीर्घं हव्यमश्नन्तु देवा ॥ १ ॥

अपि च ।

स्वस्ति श्रीस्तनपत्रभङ्गमकरीमुद्राङ्कितोरःस्थलो
हैतु सर्वजये सुरासुरवधूवक्त्राब्जचन्द्रोदय ।
क्रीडाक्रोडतनोनवेन्दुविशदे दंष्ट्राङ्कुरे यस्य भू-
र्भाति स्म प्रलयाब्धिपङ्किलतलोत्खातैकमुस्ताकृति ॥ २ ॥'

इति पाठ क्वचिदुपलभ्यते २ 'कृष्ण —एवमस्तु' इति क्वचिन्नास्ति

इदं च विदग्धस्निग्धवियोगदुर्मनसा विप्रलपितं तेन कविना—

काव्यालापसुभाषितव्यसनिनस्ते राजहंसा गता-
स्ता गोष्ठ्य क्षयमागता गुणलवश्लाघ्या न वाचः सताम्।
सालंकाररसप्रसन्नमधुराकारा कवीना गिर
प्रायः नाशमय तु भूमिवलये जीयात्प्रबन्धो महान् ॥४७॥

विदग्धा नागरा। स्निग्धा स्नेहवन्त। तेषा योऽत्र वियोगो विश्लेषस्तेन दुर्मनायमान मनो यस्य तेन कविनेद विप्रलपितम्। तदाह—**काव्यानामिति**। ते राजहसा राजश्रेष्ठा गता। 'राजवश्या' इति पाठे राजान इत्यर्थ। कीदृशा। काव्याना किरातादीना सुभाषिते सूक्तौ व्यसन येषा ते तथा। ताश्च गोष्ठ्य क्षय नाशमागता। तथा च सत्कविताग्राहका नरपत्यादयो न सन्त्येवा-धुनेति भाव। सता साधूना वाच पुनर्गुणलवैर्गुणकणै श्लाघ्या श्लाघाविषया। सत्कवीना या गिर सालकारा रसोक्त्या वक्रा। अनृजवो मधुरा कोमलाश्च। तासा गुणान्तर गुणाधिक्यमिदमस्तु। यथाकामेप्सितानां मनीषितानां गुणान्तर भवति तथेत्यर्थ। अत्र च कवेरयमाशय। मत्कविताया अप्यलकारशालिता रसयोगिता च स्वभावसिद्धैव। भगवत्प्रसादेन पुनर्गुणान्तरयोगित्वमपि भवतु। तथा च काव्यलक्षण समस्तमिहापि स्यात्। तत्कर्तृतया च कीर्तिर्विवर्तलाभ प्रीतिलाभश्च स्यादिति। तदुक्त सरस्वतीकण्ठाभरणे—'निर्दोषं गुणवत्काव्यमल-कारैरलकृतम्। रसान्वित कवि कुर्वन्कीर्तिं प्रीतिं च विन्दति' इति ॥ ४७ ॥

कतीह नाटकाम्बुधौ स्फुरन्ति नोज्ज्वला रसाः।
मदीयबुद्धिरल्पिका क्व वेद तानशेषत ॥ १ ॥
नानादर मम कृतौ नियत तनुध्व-
मत्राधुनातनतया गुणदोषविज्ञा।
ग्राह्य शिशोरपि सुभाषितमित्थमात्थ
यूय ततोऽपि मम टिप्पनमादियध्वम् ॥ २ ॥
लब्ध दुर्लभशासन सुरगणग्रामोऽभिरामो गुणै-
र्विद्यावंशविभूषणे अपि शुभे छत्रे उभे धारिते।
येनाय समभूद्द्विजातितिलकश्चण्डेश्वर पण्डितो
मीमासैकरहस्यवश्यहृदयो दातावदाताशय ॥ ३ ॥

---

१ 'विदग्धविवेकदुर्मनसा' २ 'राजवश्या' ३ 'गुणलवश्लाघ्य प्रवाद सताम्' इति पाठः ४ 'शान्ति प्रापुरवाप दुर्जनगणो वाक्यावलीं साम्प्रतम्' इति पाठ

प्रासूतासावहितनगरीनागरीगीतकीर्तिं
विप्रे क्षिप्र गुणदमधिक वेदपूर्वं धर तम् ।
कैवर्तानामलभत नृपाच्छासन सोऽयमुच्चै-
रापत्पुत्र गुणमयतनु रामपूर्वं धरं तम् ॥ ४ ॥
सोऽय शुवामनगरे पदमाप शुद्धे
मीमासको विमलकीर्तिपवित्रमूर्ति ।
पुत्र गदाधरमवाप गुणैरगाध
सत्ताञ्त्रिक गुणिगणप्रथिताभिमानम् ॥ ५ ॥
असूत विद्याधरमेष धीरं गुणैरनून सुकृताधिवासम् ।
त रत्नपूर्वं धरमाप पुत्र सोऽपि प्रसिद्ध गुणिना गुणेन ॥ ६ ॥
दमयन्त्यामथ धीरो लेभे सुतमरिंदमम् ।
श्रीजगद्धरनामानमनर्घगुणशालिनम् ॥ ७ ॥
विद्याछत्र कुलच्छत्र धरित येन धीमताम् ।
जगद्धर सुरगणे सोऽय नैयायिक कवि ॥ ८ ॥
येनापाठि कठोरगौतममत वैशेषिक खण्डन
येनाश्रावि सकोषकाव्यनिवह तत्पाणिनीय मतम् ।
छन्दोऽलकरण च शुद्धभरत येनाध्यगायि स्थिरं
तेनानेन जगद्धरेण कविना टीका कृतेय मुदा ॥ ९ ॥
नानालकृतिसुन्दरी रसवती नानागुणाना निधि-
र्नानाभावविभावनैकचतुरा नानार्थसार्थाधिका ।
टीकेय विमलाङ्गनेव रहिता दोषैरशेषैरत-
स्तामेतामधिभूषयन्तु कृतिनस्तेभ्यो नम सर्वदा ॥ १० ॥
यदि भवति मदीयग्रन्थमध्ये प्रमाद
क्वचिदपि स महिम्ना शोधनीयो महद्भि ।
स्खलति गमनकारी प्रायशो नात्र चित्र
भवति च गुरुहस्तालम्बनोऽपि प्रकार ॥ ११ ॥
असूत य रत्नधरो गुणीशो नानागुणाढ्या दमयन्तिकापि ।
जगद्धरं तस्य कृतौ व्यरसीत्षष्ठोऽयमङ्को वरटिप्पनेऽत्र ॥ १२ ॥

इति महामहोपाध्यायधर्माधिकारिकश्रीजगद्धरकृतौ
वेणीसंहारटीकायां षष्ठोऽङ्कः समाप्तः ।
॥ शुभमस्तु ॥

वेणीसंहारस्यपद्यानामनुक्रमणी ।

पद्यारम्भ	अङ्क	पद्यम्	पृष्ठम्
अकलितमहिमान	५	४०	१५६
अकृपणमरुकृश्रान्त	६	४६	२१०
अक्षतस्य गदापाणे	४	४	९९
अत्रैव कि न विशसेय	५	३२	१५१
अद्यप्रभृति वारीद	६	२९	१९३
अद्य मिथ्याप्रतिज्ञो-	३	४२	९०
अद्यैवावा रणमुपगतौ	४	१५	१२७
अन्योऽनुभूतशत	५	१३	१४२
अन्योन्यास्फालभिन्न-	१	२७	३२
अपि नाम भवेन्मृत्यु	४	९	१०२
अप्रियाणि करोत्येष	५	३१	१५१
अयि कर्ण कर्णसुखदा	५	१४	१४२
अय पापो यावन्न	३	४५	९२
अवनिमवनिपाला (पा)	६	१	२११
अवसानेऽङ्गराजस्य	५	३९	१५५
अश्वत्थामा हत इति	३	११	७५
असमाप्तप्रतिज्ञेऽपि	६	३३	१९५
अस्त्रग्रामविधौ कृती	४	१२	१२५
अस्त्रज्वालावलीढ-	३	७	७२
आचार्यस्य त्रिभुवन-	३	२०	७९
आजन्मनो न वितथं	३	१५	७६
आत्मारामा विहित-	१	२३	२७
आ शस्त्रग्रहणादकुण्ठ-	२	२	३४
आशैशवादनुदिन	६	३८	२०१
इन्द्रप्रस्थ वृकप्रस्थ	१	१६	१९
इयमस्मदुपाश्रयैक-	२	१०	४२
उत्तिष्ठन्त्या रतान्ते(पा)	१	३	४
उद्धातक्वणितविलोल-	२	२९	६१
उपेक्षिताना मन्दाना	३	४३	९१
ऊरू करेण परिघट्टयत	६	३५	१९८
एकस्य तावत्पाकोऽय	३	१४	७६
एकेनापि विषाद्रुजेन	५	७	१३७
एतज्जलं जलद्वनील-	६	३०	१९३
एतेऽपि तस्य कुपितस्य	३	१०	७४
एवमस्मदर्थहत तात	३	२९	८४
कथमपि न निषिद्ध	३	४०	८९
कर्णक्रोधेन युष्मद्विजयि	५	३७	१५४
कर्णदु शासनवधात्	६	११	१६८
कर्णाननेन्दुस्मरणात्	५	१९	१४४
कर्णालिङ्गनदायी वा	५	२४	१४७
कर्णेन कर्णसुभग	५	३८	१५५
कर्ता द्यूतच्छलाना	५	२६	१४८
कलितभुवना भुक्तै-	५	८	१३८
कालिन्द्या पुलिनेषु	१	२	२
काव्यालापसुभाषित	६	४७	२१२
कि कण्ठे शिथिली	२	९	४१
कि नो व्याप्तदिशा	२	१७	५१
कि शिष्याद्गुरुदक्षिणा	३	९	७४
कुरु घनोरु पदानि	२	२१	५३
कुन्त्या सह युवामद्य	५	४	१३२
कुर्वन्त्वाप्ता हताना	५	३६	१५३
कुसुमाञ्जलिरपर इव	१	५	५
कृतगुरुसहदादि-	[illegible]	[illegible]	[illegible]
कृतमनुमत दृष्ट वा	३	२४	८१
कृष्टा केशेषु भार्या	५	३०	१५१
कृष्टा येन शिरोरुहे	३	४७	९३
कृष्टा येनासि राज्ञा	३	४१	२०५
कृष्णा केशेषु कृष्टा	५	२९	१५०
कोदण्डज्याकिणाङ्कै	२	२७	६०
कौरव्यवशदावेऽस्मिन्	१	१९	२२
क्रोधान्धै सकल हत	६	४५	२१०
क्रोधान्धैर्यस्य मोक्षात्	६	४२	२०७
क्रोधोद्दूर्णगदस्य नास्ति	६	१३	१७२
गते भीष्मे हते द्रोणे	५	२३	१४६
गतो येनाद्य त्व	३	१६	७७
गुप्त्या साक्षान्महानल्प	२	३	३७

पद्यारम्भ	अङ्क	पद्यम्	पृष्ठम्
गुरूणा बन्धूना	६	५	१६२
गृहीत येनासौ	३	१९	७८
ग्रहाणा चरित स्वप्नो-	२	१५	४६
चञ्चद्भुजभ्रमितचण्ड-	१	२१	२५
चत्वारो वयमूत्विज	१	२५	२९
चूर्णिताशेषकौरव्य	५	२८	१५०
जन्मेन्दोरमले कुले	६	७	१६५
जयति स नाभि (पा)	१	१	४
जयति स भगवान्(पा)	१	२	४
जातोऽहमप्रतिकृता	५	२	१३१
जाल्मा काममवध्यो-	३	४१	९०
जीवत्सु पाण्डुपुत्रेषु	१	१८	२२
जृम्भारम्भप्रवितत-	२	८	३९
ज्ञातिप्रीतिर्मनसि न	६	२०	१८२
ज्ञेया रह शङ्कित	६	३	१६०
ज्वलन शोकजन्मा	५	२०	१४४
तथाभूता दृष्ट्वा	१	११	१३
तद्धीरुत्व तव मम पुर	२	११	४३
तस्मिन्कौरवभीमयो	६	१६	१७७
तस्मै देहि जल कृष्णे	६	३२	१९४
तस्यैव देहरुधिरोक्षित-	६	२१	१८३
तस्यैव पाण्डवपशो	४	८	१०१
तातस्तव प्रणयवान्	३	३०	८५
तात शस्त्रग्रहणविमुख	३	२३	८०
ता वत्सलामनभिवाद्य	६	३४	१९७
तीर्णे भीष्ममहोदधौ	६	१	१५८
तेजस्वी पितृहतबन्धु-	३	२७	८२
त्यक्तप्राजनरश्मि-	५	१०	१४०
त्यक्तोत्थित सरभस	६	४	१६७
त्रस्त विनापि विषयात्	६	४	१६१
दग्धु विश्व दहन	३	८	७२
दत्ता द्रोणेन पार्थात्	४	२	९८
दत्ताभय सोऽतिरथो-	३	२८	८४
दत्ता मे करदीकृता-	६	१९	१८१
दायादा न ययोर्बलेन	५	५	१३३
दिक्षु व्यूढाद्रिपाङ्ग	२	१९	५२
दिष्ट्यार्धश्रुतविप्रलम्भ-	२	१३	४५
दु शासनस्य रुधिरे	३	४९	९५
दु शासनस्य हृदय-	२	२८	६०
दृष्ट सप्रेम देव्या	१	३	३
देश सोऽयमराति-	३	३३	८६
द्रक्ष्यन्ति न चिरात्सुप्त	५	३४	१५२
धर्मात्मज प्रति यमौ	२	२६	५९
धिक्सानुज कुरुपतिं	३	१३	७६
धृतराष्ट्रस्य तनयान्	१	९	१२
धृतायुधो यावदह	३	४६	९३
निर्लज्जस्य दुरोदर-	६	१७	१८०
निर्वाणवैरदहना	१	७	१०
निर्वीर्यं गुरुशाप	३	३५	८८
निर्वीर्यं वा सवीर्यं वा	३	३६	८८
निवापाञ्जलिदानेन	३	१८	७८
निषिद्धैरप्येभिर्ललित-	१	१	१
नून तेनाद्य वीरेण	६	६	१६२
नोचै सत्यपि	२	१	३३
न्यस्ता न भृकुटिर्न	२	२०	५३
पङ्के वा सैकते वा	६	२	१५९
पञ्चग्गहदाण मशए	३	२	६३
पञ्चाना मन्यसेऽस्माक	३	१०	१६८
पदे सदिग्ध एवास्मिन्	६	१४	१७६
परित्यक्ते देहे रण-	३	२२	८०
पर्यासनेत्रमचिरोदित-	४	१०	१२२
पर्यायेण हि दृश्यन्ते	२	१४	४६
पाञ्चाल्या मन्युवह्नि	६	८	१६५
पापप्रियस्तव कथ	३	४४	९१
पापेन येन हृदयस्य	५	२२	१४५
पितुर्मूर्ध्नि स्पृष्टे	३	२५	८१
पीनाभ्या मद्भुजाभ्यां	५	३५	१५३
पूर्यन्ता सलिलेन	६	१२	१६९
प्रत्यक्षमात्तधनुषा	३	२१	७९
प्रत्यक्ष हतबन्धूना	४	११	१२२
प्रत्यक्ष हतबान्धवस्य	५	९	१३९
प्रयत्नपरिबोधित	३	३४	८७
प्रवृद्ध यद्वैर मम	१	१०	१३
प्राप्तावेकरथारूढौ	५	२५	१४७

पद्यारम्भ	अङ्क	पद्यम्	पृष्ठम्
प्रालेयमिश्रमकरन्द-	२	७	३९
प्रियमनुजमपश्यस्त	६	३६	१९९
प्रेमाबद्ध स्तिमित	२	१८	५१
बालस्य मे प्रकृति-	४	५	१००
भग्न भीमेन भवतो-	२	२४	५६
भवति तनय लक्ष्मी	५	२१	१४५
भूवेदभीष्ममद्रोण	३	२६	८२
भीष्मे द्रोणे च निहते	५	१२	१४२
भूमौ क्षिप्त शरीर	६	३९	२०३
भूमौ निमग्नचक्र	५	१८	१४४
भूय परिभवक्लान्ति	१	२६	३१
भ्रातुस्ते तनयेन	६	२७	१९०
मक्षामि कौरवशत	१	१५	१८
मदकलितकरेणु-	४	३	९८
मैद्वियोगभयात्तात	३	१७	७७
मन्थायस्तार्णवाम्भ -	१	२२	२६
मम प्राणाधिके	५	१५	१४३
मम हि वयसा	६	२४	१८८
मया पीत पीत तदनु	६	३१	१९४
मयि जीवति यत्तात	३	३१	८५
महाप्रलयमारुत	३	४	७०
मात किमप्यसदृश	५	३	१३२
मामुद्दिश्य त्यजन्	५	१७	१४४
यत्तद्दूर्जितमत्युग्र	१	१३	१६
येत्सत्यव्रतभङ्गभीरु	१	२४	२८
यदि शस्त्रमुज्झित	३	३९	८९
यदि समरमपास्य	३	६	७१
यद्दुर्योधनपक्षपात-	६	५	७०
यद्वैद्युतमिव ज्योति	१	१४	१६
यन्मोचितस्तव पित	५	४२	१५७
यस्मिंश्चिरप्रणय-	२	१२	४३
युक्तो यथेष्टमुपभोग-	४	६	१०१
युष्मच्छासनलङ्घनाहसि	१	१२	१४
युष्मान्हर्षयति	१	१७	२०
येनासि तत्र जन्तु-	६	२३	१८७
यो यः शस्त्र बिभर्ति	३	३२	८५
रक्षणीयेन सतत	४	७	१०१
रक्षो नाह न भूत	६	३७	१९९
राज्ञो मानधनस्य	४	१	९७
रिपोरास्ता तावत्	६	४०	२०४
रेणुर्बाधा विधत्ते	२	२२	५४
लाक्षागृहानलविषान्न	१	८	११
लुहिलाशवपाणमत्तिए	३	३	६३
लोलाशुकस्य पवना	२	२३	५५
विकिर धवलदीर्घा	२	१६	५०
विस्मृत्यास्मान्श्रुति	६	२५	१८८
व्यासोऽय भगवानमी	६	४४	२०९
वृषसेनो न ते पुत्रो	४	१४	१२६
शक्ष्यामि तौ परिघ	६	२२	१८५
शल्यानि व्यपनीय	५	१	१३०
शल्येन यथा शल्येन	५	११	१४१
शाखारोधस्थगित	६	२६	१८९
शोक स्त्रीवन्नयन	५	३३	१५२
शोचामि शोच्यमपि	५	१६	१४३
श्रवणाञ्जलिपुटपेय	१	४	४
श्रुत्वा वध मम मृषा	३	१२	७५
सकलरिपुजयाशा	५	२७	१४९
स कीचकनिषूदनो-	६	१८	१८०
सत्पक्षा मधुरगिर	१	६	९
सत्यादप्यनृत श्रेयो-	३	४८	९५
स भीरु शूरो वा	३	[illegible]	[illegible]
सर्वथा कथय ब्रह्मन्	६	१५	१७७
सहभृत्यगण सबान्धव	२	५ / ६	३८
सूतो व सूतपुत्रो वा	३	३७	८८
स्वस्ति श्रीस्तनपत्र(पा)	६	२	२११
स्त्रीणा हि साहचर्यात्	१	२०	२४
स्मरति न भवान्पीत	५	४१	१५६
हते जरति गाङ्गेये	२	४	३८
हत्वा पार्थान्सलिल	४	१३	१२६
हृदमाणुशमशभालए	३	१	६२
हली हेतु सत्यं	६	२८	१९३
हस्ताकृष्टविलोल-	२	२५	५८
हीयमाना किल	५	६	१३६